Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्री मन्मोहन यशः स्मारक ग्रन्थमाला ग्रन्थाङ्क ९

परम सुविहित श्री खरतरगच्छ विभूषण शासनप्रभावक क्रियोद्धारक श्री मन्मोहनमुनीश्वर शिष्य रत्न
श्रीमद्रामुनीश्वरान्तिषदुपाध्याय श्रीमल्लब्धिमुनिवर सन्दृब्धो।

# द्वादशपर्वकथा-संग्रहः (श्लोकबद्धः)

: प्रकाशक :

मन्त्री श्री जिनदत्तसूरि ज्ञान भंडार, बम्बई

: संशोधक :

स्वर्गीय अनुयोगाचार्य पं. श्रीमत्केशरमुनिजी गणिवर विनेय
**स्वर्गीय श्रीमत् बुद्धिसागर गणि.**

| वीर संवत | प्रतियाँ | द्वितीय आवृत्तिः | विक्रम संवत् |
|---|---|---|---|
| २४८८ | ५०० | | २०१८ |

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ग्रन्थना प्रकाशनमां उदारभावे द्रव्य सहाय करनार दाताओनी शुभ नामावली.

५००) श्री खरतरगच्छ ज्ञान भंडार — कच्छ-मांडवी

५००) सुरतवाला झवेरी प्रेमचंद कल्याणचंदजी धर्मशाळा कल्याणभुवनना ज्ञान खातामांथी हाः झवेरी फतेचंद प्रेमचंद — पालीताणा

१००) लुणिया ईश्वरलाल चुनीलाल — कच्छ-मांडवी

१००) मुंबई पालागली कच्छी वि. ओ. दे. सामायिक मंडळ तरफथी. हाः पुनशीभाई मोनजी — कच्छ-कायजा

मुद्रक : अमरचंद बहेचरदास, श्री बहादुरसिंहजी प्रि. प्रेस—पालीताणा (सौराष्ट्र)



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वादी गज केशरी स्वर्गीय अनुयोगाचार्य श्रीमत् केशरमुनिजी गणिवर्यना शिष्य रत्न अने प्रस्तुत ग्रंथना संशोधक स्वर्गीय श्रीमत् बुद्धिसागरजी गणि.



खरतरगच्छ विभूषण श्री मन्मोहनलालजी महाराजना प्रशिष्य अने प्रस्तुत ग्रंथना कर्ता कवित्व लब्धि संपादक पाठकप्रवर श्रीमल्लब्धिमुनिजी महाराज.



जेमना अत्यंत आग्रहथी आ ग्रंथनुं सर्जन थयुं, ते आचार्य श्री जिनरत्न-सूरिश्वरजीना विद्वान शिष्य रत्न गणि-वर्य श्री प्रेममुनिजी महाराज.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# प्र स्ता व ना.

आजथी लगभग आठ महिना पहेला अमारा पू० उपाध्यायजी श्रीमान लब्धिमुनिजी महाराज साहेबे तेमने पोतानी रचेली श्लोकबद्ध द्वादशपर्व कथानी बीजी आवृत्ति बहार पडे ते माटे पोतानी ईच्छा प्रदर्शित करी. कारणके जे पहेली आवृत्ति बहार पडी हती तेनी लगभग नकलो खलास थइ गइ हती अने साधु-साध्वीओनी मांग वधती जती हती. आ कारणने लइने अमारा गुरुवर्य अने आ कथाओना संशोधनकार श्रीमान गणिवर्य श्री बुद्धिमुनिजी महाराजे पोतानी नादुरस्त तबियत होवा छतां पण उपाध्यायजी महाराजनी आज्ञाने मान आपीने आ कथा फरीथी छापवा माटे प्रेसमां मोकली अने तेनुं संशोधन कार्य पोते चालु कर्युं. शरुआतमां तो कार्य बराबर चाल्युं पण ६-७ कथाओनुं संशोधन कार्य थया पछी तेमनी तबियत विशेष बगडी तेथी तेओश्रीए कपुरचंदजी मास्तरने आ कार्य सुप्रत कर्युं छतां पण प्रेसमांथी ज्यारे त्रीजी वखत फारम आवतुं त्यारे तेओ पोते जाते जोई जता अने त्यारपछी ज छापवानुं ओर्डर आपता. आवी रीते कार्य चालतु हतुं त्यां ओचींती श्रावण सुद ४ थी तबियत विशेष बगडी अने अशक्ति खुब वधती गई छतां पण आवेली वेदनाने तेओश्री समभावे सहन करता हता. आम सहन करता करता गत श्रावण सुद ८ ना श्री पार्श्वनाथ भगवानना निर्वाण कल्याणकने दिवसे सिद्धक्षेत्र पालीताणा कल्याण-भुवनमां सवारना ३॥ वागे सावधानपणे नवकार महामंत्रनुं स्मरण करता करता अने अनित्य भावना भावतां भावतां तेओश्रीनो आत्मा आ नश्वर देहनो त्याग करीने स्वर्ग भुवनमां गयो।

॥ ३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तेओश्रीए अंतिम समय सुधी साहित्यनी खूब खूब सेवा करी हती. मृत्युथी महिना पहेला पण तेओश्री पोतानाथी बनती साहित्यनी सेवा करता हता. आटली नादुरस्त तबियत, खांसीनो सख्त उपद्रव तथा ताव आदि अनेक जातना शरीरमां रोग होवा छतां पण क्यारे पण मनमां कंटाळो लावता ज नहिं अने आ कारणने लइने तेमने आरंभेल सुयगडांग सूत्र द्वितीय भाग कल्पसूत्र (गुजराती टीका) तथा श्री जिनचन्द्रसूरीजी महाराजनुं चरित्र आदिनुं कार्य तेमना स्वर्गवासथी थोडा दिवस पहेला ज पोतानी हाजरीमां पूर्ण करी गया छे, तेमना देह विलयथी जैन समाजे एक महान आगमप्रभावक क्रियापात्र अने अध्यात्मिक पुरुष गुमावेल छे. तेमनी खोट क्यारे पण पूराय तेम नथी. आजना आ नामना महत्ता अने भौतिक सुखोनी पाछळ भान भूलेला आत्माओथी तेओ तदन निराळाज हता. संघे तेमने घणी वखत आचार्यपदवी आपवानी ईच्छा दर्शावी हती पण तेओश्रीनो एक ज उत्तर हतो के आचार्य थईने हुं जे सेवा शासननी करवानो छुं तेटली ज सेवा पंचम पदमां स्थित साधुपणे रहीने करी शकीश अने मारामां आचार्य जेटली योग्यता पण नथी. मारुं साधुपणुं पण बराबर सचवाई रहे तो घणुं छे। अस्तु।

प्रस्तुत ग्रंथमां जे अंतिम सुव्रतशेठनी प्राकृत कथा आपेली छे ते पूर्वाचार्य रचित छे।

अंतमां तेओश्रीना स्वर्गगमनथी आ प्रस्तावना आदि लखवानुं कार्य मारा उपर आवी पडेल छे तो तेमां कांइपण क्षति होय तो ते सुधारीने वांचवा सुज्ञ वांचकोने मारी नम्र प्रार्थना छे. इतिशम्॥

संवत २०१८
श्रा. वद २ शुक्रवार
कल्याण भुवन,
**पालीताणा**

संशोधनकार,
गणिवर्य श्री बुद्धिमुनिजीना शिष्य–
**जयानंद मुनि.**



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ णमोत्थुणं समणस्स भगवओ महावीरस्स ॥

श्रीमत्खरतरगच्छविभूषण–सुविहितशिरोमणि–क्रियोद्धारक–श्रीमन्मोहनलालजीमुनीश्वर-
विनेयविनेयोपाध्याय-श्रीमल्लब्धिमुनिवरसङ्कलितो ।

# द्वादशपर्वकथा–संग्रहः

## (१) अथ ज्ञानपञ्चमी–कथा ।

श्रीमत्पार्श्वजिनाधीशं, सुराऽसुरनमस्कृतम् । प्रणम्य परया भक्त्या, सर्वाऽभीष्टार्थसाधकम् ॥ १ ॥ कार्तिकशुक्ल-पञ्चम्या, माहात्म्यं वर्ण्यते मया । भव्यानामुपकाराय, यथोक्तं पूर्वसूरिभिः ॥२॥ युग्मम् ॥ भुवने हि परं ज्ञानं, ज्ञानं सर्वार्थसाधकम् । अनिष्टवस्तुविस्तार–वारकं ज्ञानमीरितम् ॥३॥ ज्ञानादासाद्यते मुक्ति–र्ज्ञानात् स्वर्गोद्भवं सुखम् । लभन्ते प्राणिनो यस्मात्, तज्ज्ञानं स्वर्द्रुमोपमम् ॥ ४ ॥ भव्यैरासाद्यते ज्ञानं, पञ्चम्याराधनाद् ध्रुवम् । अतः प्रमादमुत्सृज्या-ऽऽराध्या सा विधिना तथा ॥५॥ मञ्जरीवरदत्ताभ्यां, यथैवाराधिता किल । पञ्चमी भावतोऽथाऽत्र, दृष्टान्तः प्रोच्यते तयोः ॥६॥ अस्यैव जम्बूद्वीपस्य, दक्षिणार्द्धे च भारते । पद्मपुराऽभिधे द्रंगे—ऽजितसेनो नृपोऽभवत् ॥७॥ तस्य यशो-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





मती राज्ञी, रूपलावण्यशोभिता। वरदत्तस्तयोः पुत्रो-ऽभूत्क्रमादष्टवार्षिकः ॥ ८ ॥ पित्रा स पाठशालायां, मुक्तस्तस्य मुखे परं। एकमप्यक्षरं नैव, चटत्यशुभकर्मणा ॥ ९ ॥ क्रमात्स यौवनं प्राप्तो—ऽभूत्कुष्ठरोगपीडितः। न कुत्राऽपि रतिं प्राप, प्रागूभवकृतकर्मणा ॥ १० ॥ इतश्चास्मिन्पुरे सप्त-कोटिद्रव्येश्वरोऽभवत्। जिनधर्मरतः श्रेष्ठी, सिंहदासो वणिग्वरः ॥११॥ कर्पूरतिलका तस्य, प्रिया तयोः सुताऽभवत्। आजन्मरोगिणी मूका, दुःखिनी गुणमञ्जरी ॥१२॥ विविधै-रौषधैस्तस्या, रोगशान्तिर्न जायते। न नरो यौवने कोऽपि, तां परिणेतुमिच्छति ॥१३॥ तस्याः षोडशवर्षिण्या, दुःखेन समजायत। सकलः स्वजनो माता-पित्रादिरतिदुःखितः ॥१४॥ तत्राऽन्यदा पुरे पूज्या, विजयसेनसूरयः। चतुर्ज्ञानधरा धर्मो-पदेशकाः समागताः ॥१५॥ तदा पौरजनो भूपः, सपुत्रः सकुटुम्बकः। श्रेष्ठी च सिंहदासाख्यो, वन्दनार्थमुपागतः ॥१६॥ गुरुणाऽपि सभामध्ये, चारब्धा धर्मदेशना। भो जना! ज्ञानमस्त्यत्र, सर्ववस्तुनिरूपकम् ॥१७॥ ज्ञानस्याराधने यत्नो—ऽध्ययन-श्रवणादिभिः। भव्यैर्विधेयः सततं, निर्वाणपदमिच्छुभिः ॥१८॥ विराधयन्ति ये ज्ञानं, मनसा ते भवान्तरे। नराः स्युः शून्यमनसो, विवेकपरिवर्जिताः ॥१९॥ विराधयन्ति ये ज्ञानं, वचसाऽपि हि दुर्धियः। मूकत्व-मुखरोगित्व—दोषास्तेषामसंशयम् ॥२०॥ विराधयन्ति ये ज्ञानं, कायेनायत्नवर्त्तिना। दुष्टकुष्ठादिरोगाः स्यु-स्तेषां देहे विगर्हिते ॥२१॥ युग्मम्॥ मनोवाक्काययोगैर्ये, ज्ञानस्याऽऽशातनां सदा। कुर्वन्ते मूढमतयः, कारयन्ति परानपि ॥२२॥ तेषां परभवे पुत्र-कलत्रसुहृदां क्षयः। धनधान्यविनाशश्च, तथाऽऽधिव्याधिसम्भवः ॥२३॥ युग्मम्॥ इत्यादिदेशनां श्रुत्वा, सिंहदासोऽवदद्गुरो!। मम सुतातनौ रोगाः, संजाताः केन कर्मणा? ॥२४॥ गुरुणोचे महाभाग!, कर्मणा किं न सम्भवेत्?। अत्राऽस्या गुणमञ्जर्याः, पूर्वभवो निशम्यताम् ॥२५॥ धातकीखण्डमध्यस्थे, भरते खेटके पुरे। जिनदेवाऽभिधः



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





श्रेष्ठी, भार्याऽभूत्तस्य सुन्दरी ॥२६॥ पञ्चपुत्रास्तयोरास—पालाख्यस्तेजपालकः। गुणपालो धर्मपालो, धनसाराभिधः पुनः ॥२७॥ तयोर्लीलावती शील—वती रंगावती पुनः। मंगावती चतस्रश्च, सुता रूपादिशोभिताः ॥२८॥ एकदा जिनदेवेन, पञ्चाऽपि तनया निजाः। कलाचार्यान्तिके मुक्ताः, कलाग्रहणहेतवे ॥२९॥ चापल्यं ते प्रकुर्वन्ति, परं लध्ययनं न हि। प्रकुर्वन्ति यदा विद्वां—स्ताँस्ताडयति कम्बया ॥३०॥ रुदन्तस्ते तदाऽऽगत्य, मातुर्निवेदयन्ति हि। दुःखं माताऽप्यवादीत्किं, पठनेन प्रयोजनम्? ॥३१॥ उक्तञ्च—"पठितेनाऽपि मर्त्तव्यं, शठेनाऽपि तथैव च। उभयोर्मरणं दृष्ट्वा, कण्ठशोषं करोति ? कः ॥३२॥" पण्डितस्याऽप्युपालम्भं, दत्ते पुस्तकमीर्षया। साऽज्वालयत्सुतान् वक्ति, न गन्तव्यमतः परम् ॥३३॥ एतद् व्यतिकरं ज्ञात्वा, श्रेष्ठी प्रोवाच हे प्रिये!। को जडेभ्यः सुतेभ्यो नो, निजकन्याः प्रदास्यति? ॥३४॥ व्यवसायं कथं चैते, करिष्यन्ति? निजोदरम्। भरिष्यन्ति? कथं मान—मवाप्स्यन्ति? कथं जने ॥ ३५ ॥ उक्तञ्च—"माता वैरी पिता शत्रु—र्बालो येन न पाठितः। न शोभते सभामध्ये, हंसमध्ये बको यथा ॥ ३६ ॥ विद्वत्वञ्च नृपत्वञ्च, नैव तुल्यं कदाचन। स्वदेशे पूज्यते राजा, विद्वान् सर्वत्र पूज्यते ॥ ३७ ॥" इति श्रेष्ठिवचः श्रुत्वा, सा प्रोवाच न किं सुतान्। यूयं पाठयथाऽत्रास्ति, को दोषो मे निरागसः ॥३८॥ इत्युक्त्वा हक्कितः श्रेष्ठी, तया मौनं चकार सः। अथ पञ्चाऽपि ते पुत्राः, तयोः प्राप्ताश्च यौवनम् ॥ ३९ ॥ परन्तु कोऽपि तेभ्यो न, दत्ते मूर्खतया सुताम्। ततः श्रेष्ठी जगाद स्त्रीं, पापेऽन्तरायकारिणि! ॥४०॥ मूर्खा एव त्वया पुत्रा, रक्षिताः कोऽप्यतः सुताम्। न ददात्यथ सा प्राह, पापिष्ठो जनकस्तव ॥४१॥ येनैवं शिक्षितोऽसि त्वं, विमूढमतिनेति हि। दम्पत्योः कलहो बाढं, जातस्तयोः परस्परम् ॥ ४२ ॥ यथा चोक्तं—"आः किं सुन्दरि! सुन्दरं न कुरुषे? किं न करोषि?



For Private and Personal Use Only

स्वयं। आः पापे! प्रतिजल्पसि प्रतिपदं, पापस्त्वदीयः पिता। धिक् त्वां क्रोधमुखीमलीकमुखरां त्वत्तोऽपि कः? कोपनो, दम्पत्योरिति नित्यदन्तकलह-क्लेशार्त्तयोः किं सुखम्? ॥४३॥" रुष्टेन जिनदेवेनो-पलान्मर्मणि सा हता। ततो मृत्वा तव श्रेष्ठिन्?, पुत्रीयं समजायत ॥४४॥ पूर्वे भवेऽनया ज्ञाना-शातना महती कृता। रोगोऽजनि तनौ चास्या, मूकता तेन कर्मणा ॥ ४५ ॥ उक्तञ्च—"कृतकर्मक्षयो नास्ति, कल्पकोटिशतैरपि। अवश्यमेव भोक्तव्यं, कृतं कर्म शुभाऽशुभम्" ॥ ४६ ॥ इति गुरोर्वचः श्रुत्वा, ददर्श गुणमञ्जरी। निजं पूर्वभवं जात-जातिस्मृत्यवबोधतः ॥ ४७ ॥ ततो गुरुं प्रति प्राह, सत्यं सेति ततो गुरुम्। श्रेष्ठी प्राह गुरो! रोगा, यास्यन्त्यस्यास्तनोः कथम्? ॥४८॥ गुरुणाऽभाणि भो श्रेष्ठिन्!, ज्ञानाराधनतोऽखिलम्। सुखं सम्पद्यते दुःखं, विलयं याति निश्चितम् ॥४९॥ ज्ञानस्याराधना चैव-मुपवासो विधीयते। विधिना शुक्लपञ्चम्यां, पट्टे संस्थाप्य पुस्तकम् ॥५०॥ तत्पुरः स्वस्तिकः कार्यो, दीपश्च पञ्चवर्त्तिकः। ढौक्यं च पञ्चवर्णीयं, धान्यं वरफलानि च ॥५१॥ यावद्वि पञ्चवर्षाणि, पञ्चमासांस्त्रिशुद्धितः। समाराध्याऽनया रीत्यै-वं कर्तुं यदि न क्षमः ॥५२॥ यावज्जीवं तदाऽऽराध्या, कार्त्तिकशुक्लपञ्चमी। सम्यगाराधिता दत्ते, सा सर्वं सुखमीप्सितम् ॥५३॥ एवं गुरोर्वचः श्रुत्वा, सिंहदासोऽवदद्गुरो!। न विद्यते तपःशक्ति-र्मे पुत्र्या ईदृशी ततः ॥५४॥ गुरुरुवाच कार्त्तिक्या, धवलपञ्चमीदिने। संस्थाप्य पुस्तकं पट्टे, वासादिभिः समर्च्य च ॥५५॥ ढौक्यन्ते पञ्चवर्णानि, धान्यानि फलपञ्चकम्। स्वस्तिकपञ्चकं कार्यं, धूपदीपादिपूर्वकम् ॥५६॥ ततो गत्वा गुरोरग्रे, भक्त्या नत्वा यथाविधि। कर्त्तव्यमुपवासस्य, प्रत्याख्यानं च निर्मलम् ॥५७॥ ॐ ह्रीं श्रीं नमो नाणस्स, पदस्य द्विसहस्रिकः। उत्तराभिमुखं तस्मिन्, वासरे गुण्यते जपः ॥५८॥ पौषधः क्रियते चेत्त-द्दिने नाऽयं तदा विधिः। भवेत्किंतूपवासस्य, कार्यः



For Private and Personal Use Only

पारणके हि सः ॥५८॥ तपःपूर्णे यथाशक्ति, कार्यमुद्यापनाद्यपि । स्वीकृतं गुणमञ्जर्या, ततस्तत्पञ्चमीतपः ॥६०॥ तस्मिन्न-
वसरे राजा, पृच्छति हे मुनीश्वर ! । मत्सूनोर्वरदत्तस्य, कुष्ठरोगोऽभवत्कथम् ॥६१॥ आयाति पठनं नैव, तस्य किं कारणं ?
ततः । गुरुणाऽभाणि भो राजन् ! तस्याऽपि प्राग्भवं शृणु ॥६२॥ अस्मिंश्च भरतक्षेत्रे, श्रीपुरेऽभूद्वणिग्वसुः । वसुसार-
वसुदेवौ, तस्याऽभूतां सुतौ वरौ ॥६३॥ एकदा कानने ताभ्यां, मुनिसुन्दरसूरयः । दृष्टाश्च वन्दिताः पूज्यैः, प्रारब्धा
धर्मदेशना ॥६४॥ यत्प्रातः संस्कृतं धान्यं, मध्यान्हे तद्विनश्यति । तदीयरसनिष्पन्ने, काये का नाम सारता ? ॥६५॥
इत्यादिदेशनां श्रुत्वा, वैराग्यभावनांचितौ । दीक्षां जगृहतुस्तातं, समापृच्छ्य च तावुभौ ॥ ६६ ॥ गुरुणा वसुदेवोऽथ,
सर्वसिद्धान्तपारगः । चारित्री स्थापितः सूरि-पदे सूरिगुणान्वितः ॥६७॥ स पञ्चशतसाधुभ्यो, ददाति सूत्रवाचनाम् ।
एकदा स रुजाक्रान्तः, सुप्तः संस्तारके निजे ॥६८॥ तं साधुः कोऽपि सूत्रार्थं, पृच्छति च प्रगच्छते ॥७०॥ किञ्चिन्नि-
द्रायमाणोऽथ, पृष्टः केनाऽपि साधुना । अग्रेतनं पदं वाच्य-मर्थो वाच्यः पदस्य च ॥ ७१ ॥ कुविकल्पांस्तदा सूरि-
रकरोन्निजमानसे । कृतपुण्यो बृहद्भ्राता, मेऽस्मै कोऽपि न पृच्छति ॥७२॥ स भुंक्ते भाषते शेते, चरति स्वेच्छया पुनः ।
अत एव गुणा मूर्खे, बहवः सन्ति सौख्यदाः ॥७३॥ यथा चोक्तं—"मूर्खत्वं हि सखे ! ममाऽपि रुचितं तस्मिन् यदष्टौ
गुणा, निश्चिन्तो बहुभोजनो त्रपमना नक्तंदिवाशायकः । कार्याऽकार्यविचारणान्धबधिरो मानाऽपमाने समः, प्रायेणा-
ऽऽमयवर्जितो दृढवपुर्मूर्खः सुखं जीवति ॥७४॥ " अतः परं तु कस्मैचि-त्कथयिष्याम्यहं न हि । पदमात्रमपीत्येवं, ध्यात्वा
मौनं चकार सः ॥७५॥ ततो द्वादशघस्रान् स, यावत्संजीव्य पातकम् । तदनालोच्य रोगार्त्त-श्चार्त्तध्यानपरो मृतः ॥७६॥
राजंस्तव सुतो जातः, पूर्वोपार्जितकर्मणा । अतिमूर्खश्च कुष्ठादि-रोगप्रपीडितोऽजनि ॥७७॥ इति गुरोर्वचः श्रुत्वा, जाति-



For Private and Personal Use Only

स्मृत्या ददर्श सः। वरदत्तः सुतः स्वानु-भूतं पूर्वभवं निजं ॥७८॥ नृपोऽथ प्राह सूरीशं, गमिष्यन्ति भदन्त हे!। कथं कदाऽस्य कुष्ठादि-रोगास्तदाऽवदद्गुरुः ॥७९॥ पूर्वोक्तविधिनाऽऽराध्या, कार्त्तिकशुक्लपञ्चमी। प्रतिपन्नं कुमारेण, भावेन पञ्चमीतपः ॥८०॥ गुरुं नत्वाऽथ सर्वेऽपि, स्वस्वस्थानं ययुस्ततः। तत्तपः कुर्वतस्तस्य, सर्वे रोगाः क्षयङ्गताः ॥८१॥ स्वयंव-रागताश्चैक-सहस्र राजकन्यकाः। वरदत्तकुमाराय, पितृभ्यां परिणायिताः ॥८२॥ नृपोऽपि वरदत्ताया-ऽधीताऽशेषकलाय च। दत्वा राज्यं स्वयं दीक्षां, जग्राह गुरुसन्निधौ ॥८३॥ अखण्डाज्ञो निजं राज्यं, वरदत्तोऽथ पालयन्। प्रतिवर्षं महा-शक्त्या, विदधे पञ्चमीविधिम् ॥८४॥ राज्यं दत्वा स्वपुत्राय, वरदत्तनृपो ललौ। भुक्तभोगी व्रतं त्यक्त-बाह्यान्तरपरि-ग्रहः ॥८५॥ ततोऽथ गुणमञ्जर्या-स्तनोस्तपः प्रभावतः। रोगाः क्षयं गताः सर्वे, साऽजनि सुन्दराकृतिः ॥ ८६ ॥ सा चाऽथ जिनचन्द्रेण, परिणीता महोत्सवात्। करमोचनवेलायां, पित्रा दत्तं धनं बहु ॥८७॥ चिरं भुक्त्वा सुखं याव-ज्जीवं सा पञ्चमीतपः। कृत्वा प्रान्ते पुनर्दीक्षां, जग्राह गुणमञ्जरी ॥ ८८ ॥ तौ गुणमञ्जरीसाध्वी-वरदत्तमुनीश्वरौ। जिनोदितश्च चारित्रं, पालयामासतुर्वरम् ॥८९॥ प्रान्ते चाऽनशनं कृत्वा, तौ द्वौ मृत्वा समाधिना। वैजयन्तविमाने च, समुत्पन्नौ सुरोत्तमौ ॥९०॥ इतो महाविदेहेऽभू-दमरसेनभूपतिः। नगर्यां पुण्डरीकिण्यां, तस्य गुणवती प्रिया ॥ ९१ ॥ स वरदत्तजीवोऽथ, ततश्च्युत्वा तयोः सुतः। शूरसेनाऽभिधो जातः, प्राप्तश्च यौवनं क्रमात् ॥९२॥ कन्यकानां शतम् तेन, परिणीतं महोत्सवात्। स्वराज्ये स्थापितः पित्रा, न्यायी राज्यं करोति सः ॥९३॥ विहरन्नेकदा तत्र, सीमन्धर-जिनोऽगमत्। अर्हदागमनं श्रुत्वा, वन्दितुं भूपतिर्ययौ ॥९४॥ भगवता समारब्धा, प्रवरा धर्मदेशना। तत्र सौभाग्य-पञ्चम्या-स्तपःफलं प्रकाशितम् ॥९५॥ पृष्टं राज्ञा ततः स्वामिन्!, केनाऽपि तपसः फलं। प्राप्तं? तदाऽवदद्भूप-वरदत्त-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





कथां प्रभुः ॥९६॥ जातजातिस्मृतिः श्रुत्वा, निजं पूर्वभवं पुनः। शूरसेननरेशोऽलात्, सौभाग्यपञ्चमीव्रतम् ॥ ९७ ॥ शूरसेननृपो याव-द्दशसहस्रवत्सरान्। राज्यं कृत्वा जिनाधीश-पार्श्वे संयममग्रहीत् ॥९८॥ सहस्रवत्सरं याव-द्दीक्षां, प्रपाल्य कर्मणाम्। क्षयं कृत्वा स उत्पाद्या-ऽन्तिमज्ञानं शिवं ययौ ॥९९॥ स गुणमञ्जरीजीवः, सुखं भुक्त्वा ततश्च्युतः। विजये रमणीयाख्ये, शुभङ्करा महापुरी ॥१००॥ अमरसेनभूपस्या-ऽमरावतीप्रियोदरे। सुतत्वेन समुत्पन्नः, पूर्णे च समयेऽजनि ॥१०१॥ युग्मम्॥ पित्रा सुग्रीव इत्याख्या, दत्ता तस्य स यौवनं। प्राप्तस्तस्मै पुनर्भूरि, कन्याश्च परिणायिताः ॥१०२॥ तं विंशतितमे वर्षे, राज्यं दत्वा स्वयं नृपः। दीक्षां ललौ गुरोः पार्श्वे, वैराग्याश्रितमानसः ॥१०३॥ अथ सुग्रीवभूपोऽपि, यावत्प्रभूतवत्सरान्। राज्यं प्रपाल्य जग्राह, प्रव्रज्यां गुरुसन्निधौ ॥१०४॥ पूर्वलक्षं च चारित्रं, प्रपाल्य वरकेवलं। ज्ञानमुत्पाद्य निर्वाणा-क्षयसुखश्च सोऽन्वभूत् ॥ १०५ ॥ जायन्तेऽधिकसौख्यानि, पञ्चम्याराधनान्नृणाम्। इत्यस्या अभिधा जज्ञे, लोके सौभाग्यपञ्चमी ॥१०६॥ एवं विभाव्य भो भव्याः!, पञ्चम्याराधनोद्यमः। भवभीतिविभेदाय, कार्यो युष्माभिरद्भुतः ॥१०७॥ इति कार्त्तिकसौभाग्य-पञ्चमीतपसोऽकथि। महात्म्ये वरदत्ता-ऽन्वितगुणमञ्जरीकथा ॥१०८॥ क्षमाकल्याणकोपाध्या-यकृतगद्यसंस्कृतात्। श्लोकाः सन्दर्भिताः प्रेम-मुनिगणेः समाग्रहात् ॥ १०९ ॥ श्रीजिनरत्नसूरीणा-माज्ञानुवर्त्तिना मया। पाठकलब्धिना संवद्-बाणखखाक्षि(२००५)वत्सरे ॥ ११० ॥ युग्मम्॥

## ॥ इति ज्ञानपञ्चमीकथा समाप्ता ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





# (२) अथ कार्त्तिकपूर्णिमा-कथा ।

श्रीसिद्धाचलतीर्थेशं, प्रणम्य ऋषभप्रभुम् । कार्त्तिकशुक्लराकाया, माहात्म्यं तन्यते मया ॥ १ ॥ अस्यां कार्त्तिकराकायां, सिद्धाचले शिवं गता । द्राविडवारिखिल्लाद्या, मुनिवरा अनेकशः ॥२॥ तद् दृष्टान्तो यथा द्वीपे, जम्बूद्वीपाभिधे वरे । दक्षिणभरते मध्य-खण्डे चेक्ष्वाकुभूमिषु ॥३॥ एतस्यामवसर्पिण्यां, नाभिकुलकरः पुरा । बभूव सप्तमस्तस्य, मरुदेव्यभिधा प्रिया ॥४॥ युग्मम् ॥ तस्याः कुक्षौ समुत्पन्नः, प्रथम ऋषभः । स च षड्लक्षपूर्वाणि, कुमारपदसंस्थितः ॥५॥ तदनन्तरमिन्द्रेण, द्वे सुनंदा-सुमंगले । संपरिणायिते भार्ये, स्वामिने विश्वबंधवे ॥६॥ भरतबाहुबल्याद्या, बभूवुः शतसूनवः द्वे ब्राह्मीसुन्दरी पुत्र्यौ, भगवतो जगद्गुरोः ॥७॥ संसारव्यवहारोऽत्र, सर्वो येन प्रवर्त्तितः । असि-कृषिमषिनीति-लेखनककलादिकः ॥८॥ विंशतिलक्षपूर्वाणि, व्यतीतानि ततोऽनु च । त्रिषष्टिलक्षपूर्वाणि, राज्यपदे स्थितः प्रभुः ॥९॥ प्रव्रज्याऽवसरं ज्ञात्वा, प्रभुर्ददौ विभज्य च । भरतादिस्वपुत्रेभ्यः, निजं राज्यं जिनेश्वरः ॥१०॥ विनीता नगरी मूल—राजधानी समागता । भरतस्य पुनर्बाहु-बलेस्तक्षशिलापुरी ॥११॥ दीक्षां लली स्वयं स्वामी, केवलज्ञानदर्शनम् । समुत्पाद्य च देशेषु, धर्मवृद्धिं चकार हि ॥१२॥ स्वनाम्ना द्रविडं देशं, तत्र च काञ्चनं पुरं । वासयित्वा



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





प्रभोः पुत्रो, द्रविडोऽपि शशास तम् ॥ १३ ॥ अथ द्रविडभूपस्य, राज्यं पालयतः क्रमात्। द्राविडवारिखिल्लाख्यौ, पुत्रौ शूरौ बभूवतुः ॥१४॥ क्रमाद्भोगसमर्थौ द्वौ, सुतौ प्रतिविवाहिताः। कन्याः पित्राऽथ संजाता, भूरिपुत्रास्तयोरपि ॥१५॥ अमोच्यथैकदा स्वाज्ञा—पालनार्थं पृथक्पृथक्। दूतोऽष्टनवतिभ्रातृ—पार्श्वे भरतचक्रिणा ॥१६॥ तदा सहोदराः सर्वे, दूतमुखाच्च शुश्रुवुः। भरतचक्रवर्त्तित्व—महापद्स्वरूपकम् ॥१७॥ ततो द्रविडभूपोऽपि, द्राविडाय स्वराज्यकम्। वारिखिल्लाय लक्षैक-ग्रामान् पृथग् वितीर्य च ॥१८॥ अन्येऽपि स्वस्वपुत्रेभ्यः, स्वस्वराज्यं वितीर्य च। सर्वं त्यक्त्वा प्रभोः पार्श्वे, दीक्षां भागवतीं ललुः ॥१९॥ युग्मम्॥ ऋषभस्वामिना सार्द्धं, विहरन्तोऽथ तेऽखिलाः। तपः संतप्य संप्रापुः, केवलज्ञानदर्शनम् ॥२०॥ द्राविडवारिखिल्लौ द्वौ, भ्रातरौ जनकार्पितम्। स्वस्वराज्यं प्रकुर्वाणौ, कालं सुखेन निन्यतुः ॥२१॥ एकदा द्राविडो भूपः, स्वचेतसि व्यचिंतयत्। लक्षग्रामाः वरा दत्ताः, पित्रा मे लघुबन्धवे ॥२२॥ तद्भव्यं न कृतं पित्रा, मद्राज्ये न्यूनता कृता। परं तूद्दाल्य तद्राज्य—महं लास्यामि हेलया ॥२३॥ विचार्येति स सम्मील्य, स्वसैन्यं प्रबलं स्वयम्। युद्धाय वारिखिल्लं स्व—बन्धुं प्रति चचाल हि ॥२४॥ तदागमनवृत्तान्तं, श्रुत्वा सोऽपि निजं बलम्। लात्वा च निजसीमान्ते, युद्धकामी रुरोध तम् ॥२५॥ संग्रामोऽभूद्द्वयोर्भ्रात्रो—र्यावद् द्वादशवत्सरम्। तत्र क्षयं गता अश्वा, गजा नरा रथा घनाः ॥२६॥ ईदृशो जायते युद्ध—स्तस्मिन्नवसरे वने। क्रीडार्थं द्राविडो भूपो-ऽगात्सरोवृक्षशोभिते ॥ २७ ॥ तन्मध्ये तापसा लोकाः, कुर्वाणा विविधं तपः। दृष्टा द्राविडभूपेन, चाश्वादुत्तीर्य वंदिताः ॥२८॥ तापसपतिना तस्मै, प्रदत्ता धर्मदेशना। संसाराऽसारतादृष्टा—ऽदृष्टपदार्थसूचिका ॥२९॥ तदुक्तम्—"गयकण्णचंचलाई, अपरिचत्ताई रायलच्छीए। जीवा सकम्मकलमल-भरियभरातो पडंति अहे ॥ ३० ॥"



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





इत्यादि देशनां श्रुत्वा, प्रतिबुद्धोऽथ द्राविडः। ज्ञात्वा सर्वमनित्यं हि, क्रोधं त्यक्त्वा व्यचारयत् ॥ ३१ ॥ अहो मे जीवितं धिग्मे, भ्रातैक एव विद्यते। यावद् द्वादशवर्षाण्य-हं तेन युयुधे समम् ॥३२॥ तदनिष्टं कृतं कार्यं, मयैत-त्स्तोकजीवने। एतत्किं क्रियते ? वैरं, राज्यलोभवशेन च ॥३३॥ विचार्यैवं स उत्थाय, द्राविडस्तापसाश्रमात्। क्षाम-णार्थं लघोर्भ्रातुः, पार्श्वेऽगात्सैन्यमध्यतः ॥३४॥ वृद्धं भ्रातरमायान्तं, वारिखिल्लोऽपि सम्मुखम्। आगत्य ज्ञातवृत्तान्तः, पपात तस्य पादयोः ॥३५॥ द्राविडो बाष्पपूर्णाक्षिः, स्नेहार्द्रहृदयश्च तम्। उत्थाप्योवाच हे भ्रात !, मद्राज्यं त्वं गृहाण तत् ॥३६॥ लास्यामि तापसीं दीक्षां, वारिखिल्लोऽवदत्तदा। अहमपि न लास्यामि, राज्यमनर्थदायकम् ॥३७॥ एवं परस्परं तौ द्वौ। समालोच्य विभज्य च। अर्धाऽर्धं स्वस्वपुत्राभ्यां, राज्यं वितीर्य हर्षितौ ॥३८॥ नृपश्चपञ्चकोटीय-परिवारेण तापसीम्। दीक्षां जगृहतुस्त्यक्त्वा, कुटुम्बादिपरिग्रहम् ॥३९॥ कुर्वन्तौ कन्दमूलाद्या-हारं वल्कलचीवरम्। धारयन्तौ तपस्यन्तौ, जातौ कृशतनू च तौ ॥४०॥ एवं बहुतरे काले, गते तत्र समागताः। गच्छन्तस्तीर्थया-त्रार्थं, मुनयो मुनिसत्तमाः ॥४१॥ द्राविडवारिखिल्लाभ्या-मत्यादरेण साधवः। सत्कृतास्तत्र वृक्षाध-स्ते प्रमार्ज्यावनिं स्थिताः ॥४२॥ उपविष्टौ मुखाग्रे तौ, तस्मिन् क्षणेऽथ पादपात्। पतितश्चटकश्चैको, मूर्च्छितो मुनिसम्मुखम् ॥४३॥ ज्ञात्वा तं चटकं स्तोका-युषमेकेन साधुना। सुश्रावितो नमस्कारः, सिद्धाद्रिमहिमा पुनः ॥४४॥ चटकस्तत्प्रभावेण, सुरो जातो महर्द्धिकः। आद्यस्वर्गे स आगत्य, ततो मुनीन्ननाम च ॥४५॥ तदानीं तापसौ साधुं, पप्रच्छतुर्मुनी-श्वरौ !। कोऽयं सुरोऽस्ति ? चात्यन्त-रूपकान्तिप्रधारकः ॥४६॥ तदा प्राह मुनिर्मृत्वा-ऽयं चटकः सुरोऽजनि। श्रीनमस्कारमाहात्म्या-त्सिद्धाद्रिभावधारणात् ॥४७॥ अधुना तीर्थराजं स, प्रणम्याऽत्राऽऽगतोऽस्ति च। श्रुत्वा गुरुमु-



For Private and Personal Use Only

खादेत-त्तौ च पप्रच्छतुः पुनः ॥४८॥ गुरोऽस्ति ? कीदृशः सिद्ध-गिरिर्माहात्म्यमस्य च । संश्राव्य कृपां कृत्वा, तदा वाचंयमोऽवदत् ॥४९॥ अस्यैव जम्बूद्वीपस्या-स्ति दक्षिणार्द्धभारते । सौराष्ट्रे श्रीमहातीर्थ-शत्रुञ्जयो महागिरिः ॥५०॥ अलंकृतो महातीर्थैः, सोऽष्टोत्तरशताभिधैः । १ शत्रुञ्जयः, २ पुण्डरीकः, ३ सिद्धाद्रिर्विमलाऽचलः ४ ॥५१॥ ५ सुरगिरिर्महाशैलः ६, ७ पुण्यराशिर्गिरिस्तथा । ८ श्रीपदः ९ श्रीपदस्थान-१० मिन्द्रप्रकाशपर्वतः ॥५२॥ ११ महातीर्थगिरिर्मुक्ति-१२ निलयः १३ शाश्वतो नगः । १४ दृढशक्तिगिरिः १५ पुष्प-दन्तो १६ महादिपद्मकः ॥५३॥ १७ पृथ्वीपीठः १८ सुभद्राद्रिः, १९ कैलाशपर्वतस्तथा । २० पातालमूलशैलेशः, २१ सर्वकामगिरिस्तथा ॥५४॥ एकविंशतिसंज्ञाभिः, ख्यातोऽस्त्ययं गिरिर्जिने । शाश्वतो नामनिक्षेपा-न्महातीर्थो नगोत्तमः ॥५५॥ अनन्ता मुनयः पूर्वं, सिद्धाचले शिवं गताः । यास्यन्त्यागामिकाले च, निर्वाणं भव्यजन्तवः ॥५६॥ नवनवतिपूर्वाणि, वाराणि ऋषभप्रभुः । समवसृतवांस्तत्र, राजादनीतरोरधः ॥५७॥ संप्रत्याख्यचतुर्विंश-तमार्हतो गतः शिवम् । कदम्बगणभृदाद्य-स्तत्र तन्नामतो गिरिः ॥५८॥ ऋषभस्वामिनः शिष्यः, पुण्डरीकाभिधोऽधुना । आद्यो गणधरः सार्द्धं, साधूनां पञ्चकोटिभिः ॥५९॥ चैत्रधवलराकायां, ययुः शत्रुञ्जयोपरि । मोक्षं कर्मेन्धनं दग्ध्वा, शुक्लध्यानाग्निनाऽखिलम् ॥६०॥ श्रीनमिविनमी तत्र, विद्याधरौ शिवं गतौ । द्विद्विकोटिपरिवारैः, दशम्यां फाल्गुनाऽर्जुने ॥६१॥ चैत्रशुक्लचतुर्दश्यां, नमिविनमिभूपयोः । चतुष्षष्टिसुतास्तत्र, सिद्धाचले शिवं गताः ॥६२॥ तेन शिवगृहारोहे, सोपानसदृशो मतः । सिद्धाद्रिर्जलवत्पाप-मलप्रक्षालने पुनः ॥६३॥ येन नरभवं प्राप्य, गत्वा शत्रुञ्जये गिरौ । आदिजिनस्य नाऽकारि, द्रव्यभावेन पूजनम् ॥६४॥ नरत्वं हारितं तेन, पुनश्च तस्य जीवितम् । सफलं तीर्थबुद्ध्या य-स्तत्रार्चति जिनेश्वरम् ॥६५॥ युग्मम् ॥ एवं गुरुमुखात्सिद्धा-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ऽद्रिमाहात्म्यं बृहत्तरम्। श्रुत्वा तौ तापसौ जातौ, स्वचित्तेऽतीव हर्षितो ॥६६॥ ततो निजगुरोराज्ञां, लात्वा शत्रुंजयं प्रति। चेलतुस्तौ समं पञ्च—पञ्चकोटिस्वतापसैः ॥६७॥ द्राविडवारिखिल्लौ स्व—परिवारान्वितौ क्रमात्। गत्वा शत्रुञ्जयं चेत्थं, जगृहतुरभिग्रहम् ॥६८॥ कर्मक्षयो यदाऽस्माकं, भविष्यति तदाऽशनम्। ग्रहिष्याम इति ध्यात्वा, गृहित्वाऽवग्रहं पुनः ॥६९॥ स्वीकृत्य भावतः साधु—धर्मं श्रीविमलाचले। तौ चक्रतुश्चतुर्मासीं, तपस्यन्तौ वरं तपः ॥७०॥ युग्मम् ॥ तौ शुभभावनायुक्तौ, शुभध्यानपरायणौ। त्रयोदशगुणस्थाना—रूढौ क्रमेण तापसौ ॥७१॥ कार्तिकशुक्लराकायां, चतुर्मास्यान्तवासरे। शुक्लध्यानेन निर्दग्ध्वा, घातिकर्मचतुष्टयम् ॥७२॥ द्राविडवारिखिल्लाभ्यां, केवलज्ञानदर्शनम्। उपार्जितश्च षड्द्रव्य—लोकाऽलोकप्रकाशकम् ॥७३॥ युग्मम् ॥ बहुकालं विहृत्याऽथ, प्राणिनः प्रतिबोध्य च। प्रान्ते चाऽघातिकर्माणि, क्षपयित्वा सुयोगतः ॥७४॥ द्राविडवारिखिल्लर्षी, दशकोटिकसाधुभिः। सार्द्धं शत्रुञ्जये कर्म—प्रहीणौ जग्मतुः शिवम् ॥७५॥ युग्मम् ॥ कार्त्तिकशुक्लराकाऽस्ति, तेनाऽतीवोत्तमा तिथिः। चैत्रीयशुक्लराकाऽपि, तद्वदत्युत्तमा मता ॥७६॥ कार्त्तिकचैत्रराकायां, ततः शत्रुञ्जये गिरौ। अवश्यमेव कर्त्तव्या, यात्रा विशुद्धभावतः ॥ ७७ ॥ कुर्यात्तस्मिन् दिने सामा—यिकं देशावकाशिकम्। पौषधादियथाशक्ति—चोपवासादिकं तपः ॥७८॥ पुनः स्नात्रबृहत्पूजा, रथयात्रामहोत्सवम्। वर्द्धमानसुभावेन, कुर्याज्जिनेन्द्रपूजनम् ॥ ७९ ॥ पुनर्ग्रामाद्बहिर्गत्वा, श्रीशत्रुञ्जयसम्मुखम्। तत्पटाग्रे क्रिया कार्या, श्रीचैत्यवन्दनादिका ॥८०॥ इत्यादिधर्मसत्कृत्यैः समाराध्या तिथिश्च सा। यतो स्यान्निर्जरा बह्वी—कर्मक्षयः शिवस्तथा ॥८१॥ पुनस्ततः परं जग्मुः, श्रीऋषभादिशासने। अनेके मुनयो मोक्षं, संस्पर्श्य विमलाचलम् ॥८२॥ तिर्यञ्चो मनुजा भद्रा, विलोक्य भावचक्षुषा। सिद्धाद्रिं सद्गतिं जग्मु—र्गमिष्यन्ति क्रमाच्छिवम् ॥८३॥ शत्रुञ्जयमहातीर्थं, पश्यन्ति भव्यजन्तवः।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





आन्तरचक्षुषा नैवा-ऽभव्यदुर्भव्यपापिनः ॥८४॥ नवनवतिवारांस्त-द्यात्रार्चादिविधानतः। षष्ठाष्टमतपःपूर्वं, महती निर्जरा भवेत् ॥८५॥ पुनस्तत्र चतुर्मासीं, कुर्वतो दानमर्पतः। सप्तक्षेत्रे निजं द्रव्यं, वपतः स्यान्महाफलम् ॥८६॥ अनादिभव-चक्रेषु, प्राणिनां भ्रमतामयम्। तीर्थराजोऽस्ति विश्राम-भूतो निर्भयकारकः ॥८७॥ प्राप्य नरभवं सिद्धा-ऽचलयात्राऽ-ऽर्चनादिकम्। न कृतं येन भावेन, स ज्ञेयो दुःखिशेखरः ॥ ८८ ॥ शत्रुञ्जयप्रभावेणा-ऽतिनिन्द्यकर्मकारिणः। भवन्ति निर्मलाः शुद्ध-प्रवृत्तिकारिणः पुनः ॥८९॥ द्विकोटिमुनिभिः सार्द्धं, श्रीसागरमुनिः पुनः। सिद्धाचले ययौ मोक्ष-मक्षय-सुखशाश्वतम् ॥९०॥ कोटिभिर्मुनिभिः सार्द्धं, श्रीसारोऽगाच्छिवं पुनः। सोममुनिस्त्रयोदश-कोटिभिर्मुनिभिर्गिरौ ॥९१॥ पुनरादित्यकान्त्याख्य-मुनिर्लक्षैकसाधुभिः। चतुर्दशसहस्रार्यै-र्दमितारी शिवं गतः ॥९२॥ स सप्तदशकोट्याऽऽर्यो-ऽजित-सेनमुनीश्वरः। आनन्दरक्षितौ साधू, सिद्धाचले शिवं गतौ ॥९३॥ शिवंगतश्च कालाशी, चैकसहस्रसाधुभिः, समं सप्त-शतार्यैश्चा-ऽत्र समुद्रमुनिः पुनः ॥९४॥ रामचन्द्र मुनिः कोटि—मुनिभिर्भरतः पुनः। नारदमुनिथावच्चा-पुत्रस्तत्र शिवं ययौ ॥९५॥ पाण्डवपञ्चकं सार्द्धं-विंशतिकोटिसाधुभिः। शैलकः पन्थकश्चापि, शुकमुनिः शिवं ययौ ॥ ९६ ॥ प्रद्युम्न-शाम्बसाधुश्च, सार्द्धत्रिकोटिसाधुभिः। तत्र शिवं गतावेव-मनेके मुनयः पुनः ॥९७॥ पुनरनेकशः साध्व्यो, वैदर्भ्याद्याः शिवं ययुः। समूलाखिलकर्मारी-नुत्खात्य विमलाचले ॥९८॥ समाराध्य च संस्पर्श्य, सुतीर्थं विमलाचलम्। अनेके भूचरा विद्या-धराः शिवालयं गताः ॥९९॥ यन्नामस्मरणात्क्रूराः, श्वापदाः प्रभवन्ति न। अनिष्टकारिणश्चौरा, उपद्रोतुं सुराधमाः ॥१००॥ यन्नामस्मरणादत्र, परत्र सर्वसम्पदम्। क्रमाच्छिवसुखं चानु-भवन्ति भव्यजंतवः ॥१०१॥ श्रीखर-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तरगच्छीय, श्रीजिनरत्नसूरयः। तेषां शिष्यगणिप्रेम-मुनेः समाग्रहेण च ॥१०२॥ कार्त्तिकशुक्लराकायाः, कथा पाठक-लब्धिना। जयपुरे शराभ्राभ्र-नयन (२००५) वत्सरे कृता ॥ १०३ ॥ युग्मम् ॥

## ॥ इति कार्त्तिकपूर्णिमाकथा समाप्ता ॥

## ( ३ ) अथ मौनएकादशी पर्व-कथा।

नत्वा प्रभुं महावीरं, वर्द्धमानं जिनेश्वरम्। मार्गशीर्षशुक्लैका-दशीमाहात्म्यमुच्यते ॥१॥ अरस्याऽस्मिन् दिने दीक्षा, नमिप्रभोश्च केवलम्। ज्ञानं जन्मव्रतज्ञान-त्रयं मल्ल्यर्हतोऽभवत् ॥२॥ यथाऽस्मिन् भरते पञ्च-कल्याणकानि साम्प्रतम्। चतुर्भरतपञ्चैर-वतक्षेत्रे तथाऽभवन् ॥३॥ मिलित्वा दशक्षेत्रेषु, साम्प्रतसमयेऽभवत्। त्रिंशज्जिनेन्द्रपञ्चाश-त्कल्याणककदम्बकम् ॥४॥ एवं भूतभविष्यद्द्वि-काल संकलनात्त्रिषु। कालेषु चाऽभवन् सार्द्ध-शतकल्याणकानि च ॥५॥ कृत एकोपवासोऽपि, वासरेऽस्मिन् भवेत्फलम्। सार्द्धशतोपवासानां, निर्वाणसुखदायकम् ॥ ६ ॥ अस्मिन् दिने विधायोप-वासं मौनं प्रधार्य च। नाऽन्यत्किमपि वक्तव्यं, भणनं गुणनं विना ॥७॥ यावद्यामाष्टकं स्थेयं, पौषधे सुसमाधिना। कार्यं-



For Private and Personal Use Only

मेकाशनं तस्य, पूर्वोत्तरीयपारणे ॥ ८ ॥ पारणकदिने कृत्वा, जिनाऽर्चां ज्ञानपूजनम्। प्रणम्य सुगुरून् शुद्धा-हारेण प्रतिलाभ्य च ॥९॥ कर्त्तव्यं पारणं चैवं, सदैकादशवत्सरम्। मासैकादशपर्यन्तं, कार्यमेकादशी व्रतम् ॥१०॥ युग्मम् ॥ द्वादशे वत्सरे पूर्णे, व्रते प्रपाल्य पौषधम्। अभिवंद्य गुरून् देवान्, ज्ञानं संपूज्य भावतः ॥११॥ धान्यसत्फलपक्वान्ना-द्यानि जिनेशितुः पुरः। सारैकादशवस्तूनि, ढौक्यानि च पृथक् पृथक् ॥ १२ ॥ पुनर्जघन्यतश्चैका-दशसाधर्मिवत्सलम्। भावेनैकादशाङ्गानां, कार्यं पुस्तकलेखनम् ॥१३॥ इत्याद्युद्यापनं कार्यं, यथाशक्तिविशेषतः। ज्ञानदर्शनचारित्रो-पकरण-विधानतः ॥१४॥ अन्यदा द्वारिकापूर्याः, परिसरे समाययौ। नेमिनाथो जिनाधीशो, भव्यांश्च प्रतिबोधयन् ॥ १५ ॥ श्रीकृष्णोऽपि प्रभुं नंतुं, समागत्य प्रणम्य च। प्रोवाचास्ति प्रभो! घस्र-षष्ठ्यधिकशतत्रयम् ॥१६॥ तन्मध्याद्वासरं चैकं, प्रवरं कृपया वद। व्रतहीनो यमाराध्य, निस्तीर्णो हि भवाम्यहम् ॥ १७ ॥ स्वामी जगाद यद्येवं, समाराधय तर्हि भोः! प्रवरां मार्गशीर्षस्य, धवलैकादशीं तिथिम् ॥१८॥ अपि मिथ्यादृशां मान्या, सा मौनैकादशी तिथिः। मार्ग-शीर्षाख्यमासस्य, शुक्लपक्षे प्रकीर्त्तिता ॥१९॥ तत्र पुण्यं कृतं स्वल्प-मपि प्रौढफलं भवेत्। तस्मादाराधनीया सा, विशेषेण विशारदैः ॥ २० ॥ सर्वेभ्योऽपि च पर्वभ्यः, पर्वपर्युषणाह्वयं। दिनेभ्योऽप्यखिलेभ्योऽयं, तथा मुख्योऽस्ति वासरः ॥२१॥ श्रमणैः श्रमणीमिश्र, श्रावकैः श्राविकादिभिः। धर्मकर्म विधातव्य-मऽस्मिन् दिने विशेषतः ॥ २२ ॥ कृष्णः श्रुत्वेत्यवक् स्वामिन्!, पूर्वमेकादशीव्रतम्। आचीर्णं? केन तस्याऽभूत्, फलप्राप्तिश्च कीदृशी? ॥२३॥ भगवा-न्प्राह भो कृष्ण!, तस्या माहात्म्यसूचिका। सूरश्रेष्ठिकथाऽत्र त्वं, सावधानतया शृणु ॥ २४ ॥ बभूव धातकाखण्डे, इषुकाराख्यभूधरात्। पश्चिमे दिग्विभागे च, विजयपुरपत्तनम् ॥ २५ ॥ पृथ्वीपालनृपस्तत्रा-ऽभवत्सज्जनपालकः। राज्ञी



For Private and Personal Use Only

चन्द्रावती तस्य, शीलादिगुणशालिनी ॥२६॥ तत्र सूराभिधः श्रेष्ठी, व्यवहारिशिरोमणिः । न्यायार्जितबहुद्रव्यः, ख्यातो बहुसुतोऽवसत् ॥२७॥ षड्विधावश्यके रक्तो, जिनेन्द्रभक्तिकारकः । वृद्धावस्थो गुरोः पार्श्वे, स आगत्यैकदाऽवदत् ॥२८॥ स्वामिन्निदृग्विधं धर्मं, कथय येन मे भवेत् । स्तोकेनाऽपि महाकर्म-क्षयस्तदाऽवदद्गुरुः ॥ २९ ॥ एकादशाब्दमासैका-दशान्तैकादशीव्रतम् । कुरु सोऽप्यथ चक्रे तद्-व्रतं गुर्वाज्ञया मुदा ॥३०॥ समाप्ते च व्रते तेन, तस्य चोद्यापनं कृतम् । उद्यापनदिनात्पञ्च-दश घस्रा यदा ययुः ॥३१॥ स तदोदरशूलेन, मृत्वाऽऽरणे सुरोत्तमः । एकविंशतिसिन्ध्वायुः, स्वर्गे चैकादशेऽजनि ॥३२॥ इतः समृद्धिदत्ताख्यः, शौर्यपुरे वणिग्वरः । प्रीतिमती प्रिया तस्य, बभूव गुणशालिनी ॥३३॥ देवलोकसुखं भुक्त्वा, ततश्च्युत्वा स निर्जरः । तस्याः कुक्षौ समुत्पन्नः, पुत्रत्वेन शुभे क्षणे ॥३४॥ तन्नालस्थापनायाथ, गर्तां च खनितुं यदा । समारब्धं तदाऽकस्मा-त्तत्स्थाने निर्गतो निधिः ॥३५॥ तद्वर्धापनिका जाता, सर्वत्र हर्षितः पिता । महज्जन्मोत्सवं चक्रे, यावद्दशदिनावधि ॥३६॥ प्राप्ते च द्वादशे घस्रे, निवृत्तेऽशुचिकर्मणि । भोजयित्वा स्व-जातीय-बान्धवस्वजनादिकम् ॥३७॥ गर्भस्थेऽस्मिन् व्रतेच्छाऽभू-त्तन्मातुरिति सुव्रतः । तन्नाम गुणनिष्पन्नं, कृतं पित्रा न निर्गुणम् ॥३८॥ युग्मम् ॥ यथा चोक्तं—" भौमं मंगल विष्टिनामकरणे भद्रा कणानां क्षये, वृद्धिः शीतलिका च दुष्ट-पिटके राजा रजःपर्वणि । मिष्टत्वं लवणे विषे मधुरता दग्धे गृहे शीतलम्, पात्रत्वं च पणाङ्गनासु गदितं नाम्ना परं नार्थतः ॥३९॥" पञ्चभिरथ धात्रीभि-र्लाल्यमानं च सुव्रतम् । तमष्टवार्षिकं दृष्ट्वा, तज्जनकेन चिन्तितम् ॥४०॥ रूपलावण्यसंयुक्ता, नरा जात्यादिसंभवाः । विद्याहीना न राजन्ते, ततोऽमुं पाठ्याम्यहम् ॥ ४१ ॥ विचिन्त्यैवमुपाध्याया-भ्यर्णे महोत्सवा-त्पिता । द्वासप्ततिकलाभ्यासं, कर्तुं मुमोच सुव्रतम् ॥४२॥ सोऽपि सर्वाः कलाः स्वल्प-कालेनैवाऽपठत्सुधीः । षड्विधा-



For Private and Personal Use Only

वश्यकादीनि, सूत्राणि कार्मिकाणि च ॥४३॥ श्रीकान्ताख्या पुनः पद्मा, लक्ष्मीगङ्गाभिधा पुनः। पद्मलताभिधा तारा, रंभा गोरी च पत्नीनि ॥ ४४ ॥ गांगेया रतिनाम्नीति, महेभ्यव्यवहारिणाम्। एकादश सुतास्तस्मै, पित्रा च परिणायिताः ॥४५॥ रूपलावण्ययुक्ताभिः, ताभिः सार्द्धं स सुव्रतः। भुञ्जानो विविधान् भोगान्, दोगुंदसुरवद्बभौ ॥४६॥ समारोप्यान्यदा श्रेष्ठी, गृहभारं सुते स्वयम्। ललौ दीक्षां गुरोः पार्श्वे, स्वपरक्षेमकारिणीम् ॥ ४७ ॥ सम्यक्प्रपाल्य चारित्रं, कृत्वान्तेऽनशनं पुनः। मृत्वा समाधिना स्वर्गं, प्राप्तो वाचंयमः स च ॥४८॥ अथाऽभूत्सुव्रतः श्रेष्ठी, तेन च पूर्वजन्मनि। सम्यगाराधिता मार्ग-धवलैकादशीतिथिः ॥ ४९ ॥ तेन चैकादशस्वर्ण-कोटिस्वामी स चाऽजनि। कालं निनाय सौख्येन, धर्मकर्मपरायणः ॥ ५० ॥ तथैकैकप्रियैकैक-पुत्रत्वेन गुणाकराः। सर्वत्र विश्रुताः जाता—स्तस्यैकादश सूनवः ॥५१॥ तेषाञ्च परिवारोऽपि, विपुलोऽजन्यथैकदा। पुरोद्याने समायाता, धर्मघोषमुनीश्वराः ॥५२॥ गता राजादयस्तत्र, सुव्रतो वंदितुं ययौ। तदानीं गुरुणाऽप्येषां, तपसो महिमाऽकथि ॥५३॥ यद् दूरं यद् दुराराध्यं, यच्च दूरे व्यवस्थितम्। तत्सर्वं तपसा साध्यं, तपो हि दुरतिक्रमम् ॥५४॥ पञ्चमीतपसा तत्रा-ऽवाप्यते ज्ञानपञ्चकम्। अष्टमीतपसा कर्मा-ऽष्टकनिषूदनं भवेत् ॥५५॥ एकादशी तपस्यैका-दशाङ्गावगमः सुखात्। चतुर्दशीतपस्यातः, सर्वपूर्वागमो भवेत् ॥५६॥ पूर्णिमातपसा सर्व-सिद्धान्तावगमो भवेत्। चतुर्दश्यष्टमीराका-ऽमावास्या चरणात्मिका ॥५७॥ ज्ञानात्मिका द्वितीया च, पञ्चम्येकादशीतिथिः। सर्वा परा तिथिर्ज्ञेया, दर्शनशुद्धिकारिका ॥ ५८ ॥ ज्ञान-दर्शन-चारित्र-शुद्धिरवाप्यते जनैः। तपस्याराधिताभिश्चो-क्तसर्वतिथिभिः पुनः ॥५९॥ श्रुत्वैव सुव्रतश्रेष्ठी, जातिस्मृतिमवाप सः। प्रागूभवे तेन विज्ञातं, स्वकृतैकादशी व्रतम् ॥६०॥ पुनरपि गुरोः पार्श्वे, सोऽकादाजन्म तद्व्रतम्। गुरुः प्राह



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



महाभाग!, त्वया प्राक् तद्व्रतं कृतम् ॥६१॥ तेन त्वं निर्मलं ज्ञानं, संप्राप्तमधुना पुनः। उद्यापनवशादेका-दशको-टीश्वरोऽजनि ॥६२॥ सुनिर्मलं यशो लोके, प्रभुत्वमधिकारिताम्। नगरश्रेष्ठितां राज-मान्यत्वं त्वं गतोऽधुना ॥६३॥ तत एकादशाङ्गाना-माराधनातपोऽमलम्। त्वया विधीयतां शुद्ध-धर्मकार्ये परिश्रमः ॥ ६४ ॥ सोऽथ समं कुटुम्बेन, करोत्येकादशीदिने, मौनेन पौषधं यामा-ष्टकं चतुर्विधं सदा ॥६५॥ तेन लोकेऽपि मौनैका-दशीसंबंधिपर्वणः। प्रसि-द्धिर्मान्यता जाता-ऽऽराधयति जनोऽपि ताम् ॥६६॥ अन्यदा सकुटुम्बोऽथ, श्रेष्ठी विधाय पौषधम्। विधिवत्तत्र सर्वे च, कायोत्सर्गे स्थिता निशि ॥६८॥ चौरा ज्ञात्वा तदा श्रेष्ठि-मौनं चौर्यार्थमागताः। गृह्णन्ति तद्धनं याव-त्तावत्ते स्तम्भिताः दृढम् ॥६८॥ प्रातस्तान् स्तंभितान् दृष्ट्वा, कोट्टपालो नृपाग्रतः। निनाय तद्वधायाथ, तमादिदेश भूपतिः ॥६९॥ प्रपाल्य पौषधं प्रातः, श्रेष्ठी लात्वा च प्राभृतम्। राज्ञः पार्श्वे समागत्य, सर्वांश्चौरानमोचयत् ॥७०॥ पुनरप्येकदा वह्नि-लग्नः प्रज्वलितं पुरम्। मुक्त्वात्तपौषधश्रेष्ठि-सर्वगृहापणादिकम् ॥७१॥ प्रातः पौरजना वीक्ष्या-खण्डगृहापणादिकम्। तं च प्रशंसयामासुः, सुव्रतश्रेष्ठिनं यथा ॥७२॥ सत्त्वेन धार्यते पृथ्वी, सत्त्वेन तपते रविः। सत्त्वेन वायवो वान्ति, सर्वं सत्त्वे प्रतिष्ठितम् ॥७३॥ अहो!! धर्मस्य माहात्म्य-मस्याहो दृढता व्रते। पालयेद् व्रतमेवं यो, द्विधाऽप्यस्य शिवं भवेत् ॥७४॥ यतः—"धर्म्माज्जन्मकुले शरीरपटुता सौभाग्यमायुर्बलम्, धर्म्मेणैव भवन्ति निर्मलयशो विद्यार्थ-सम्पत्तयः। कान्ताराच्च महाभयाच्च सततं धर्मः परित्रायते, धर्मः सम्यगुपासितो हि भवति स्वर्गापवर्गप्रदः ॥७५॥" एकादशीव्रते पूर्णे, श्रेष्ठिनोद्यापनं कृतम्। महता विस्तरेण श्री-सङ्घार्चाभक्तिपूर्वकम् ॥७६॥ वृद्धत्वे श्रेष्ठिनाऽचिन्त्य-थाऽकार्येकादशीतपः। पुनरुद्यापनं तस्य, पालितं श्रावकव्रतम् ॥ ७७ ॥ विहायासारसंसारं, सद्गुरुयोगतो मया।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सर्वविरतिरादातुं, ममोचिताऽस्ति साम्प्रतम् ॥ ७८ ॥ तस्मिन् क्षणे चतुर्ज्ञान-धरास्तत्र समागताः। गुणसुन्दरसूरीशा-स्तरणतारणक्षमाः ॥ ७९ ॥ आगत्य सुव्रतश्रेष्ठी, पुर्जनस्थ प्रणम्य तान्। यथास्थाने स्थितः पूज्यै-रारब्धा वरदेशना ॥ ८० ॥ चारित्ररत्नान्न परं हि रत्नं, चारित्रवित्तान्न परं हि वित्तम्। चारित्रलाभान्न परो हि लाभ-श्चारित्रयोगान्न परो हि योगः ॥ ८१ ॥ दीक्षा गृहीता दिनमेकमेव, येनोग्रचित्तेन शिवं स याति। न तत्कदाचित्तदवश्यमेव, वैमानिकः स्यात् त्रिदशप्रधानः ॥ ८२ ॥ श्रुत्वैवं देशनां पुत्रे, गृहभारं समर्प्य च। जग्राह सुगुरोः पार्श्वे, दीक्षां सस्त्रीकसुव्रतः ॥८३॥ तस्यैकादश भार्यास्ताः, कृत्वा कर्मक्षयं लघु। शिवं ययुः समुपार्ज्य, केवलज्ञानदर्शनम् ॥ ८४ ॥ सुव्रतोऽथ मुनिः शुद्ध-चारित्रं पालयन् सदा। तपो विशेतश्चक्रे, षष्ठाष्टमादिकं यथा ॥८५॥ जनिते द्वे शते षष्ठे, अष्टमानां शतं तथा। चतुष्टयं चतुर्मास्या, एकं षाण्मासिकं तपः ॥८६॥ स मौनैकादशीतिथ्या-स्तपस्तपनतत्परः। पाठको द्वादशाङ्गीनां, शुद्धां दीक्षामपालयत् ॥८७॥ अथैकदा तपः कृत्वा, मौनमाधाय सुव्रतः। एकादशीतिथौ तस्थौ, कायोत्सर्गे समाधिना ॥८८॥ मिथ्यादृष्टिसुरः कश्चि-च्चक्रे चालयितुं च तम्। महतीं वेदनां साधोः, कस्यचित्कर्णयोर्द्वयोः ॥८९॥ उपचारे कृतेऽप्यस्य, महती वेदना न सा। शाम्यती तेन देवेन, तदा प्रोक्तं मुनीन्प्रति ॥९०॥ सुव्रतमुनिरागत्य, बहिर्यदि करिष्यति। भैषज्यं च तदा पीडा, तस्य यास्यति नाऽन्यथा ॥९१॥ श्रुत्वेति साधवस्तत्र, समेत्याऽभ्यर्थयंश्च तम्। तदर्थं स बहिर्याति, न स्थानान्निशि वक्ति न ॥९२॥ ततो देवानुभावेन वेदनार्त्तो मुनिर्मुनिम्। सुव्रतं मस्तके मार-यामास लकुटादिना ॥९३॥ अतीव वेदना तस्य, संजाता क्षमया स च। सहते कर्मणाऽऽयातां, पीडां चिन्तयते पुनः ॥९४॥ अर्हन्तो भगवन्तो ये, साधवो गणधारिणः। इन्द्राश्चन्द्रा दिनेन्द्राश्च, नागेन्द्रा व्यन्तरेन्द्रकाः ॥९५॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सचक्रीवासुदेवाश्च, प्रतिनारायणाः पुनः। बलदेवा नराधीशा, मानवा अपरेऽपि च ॥ ९६ ॥ कर्मणा पापिनाऽनेन, ते सर्वेऽपि विडम्बिताः। कियन्मात्रो वराकोऽयं, पुरस्तात् तस्य कर्मणः ॥९७॥ अरे जीव ! क्षमस्व त्व-मुदितं कर्म तेऽस्ति यत्। तद् भोगेन विना नैव, प्रक्षीयते कदाचन ॥९८॥ "लद्धं अलद्धपुव्वं, जिणवयणसुभासिअं अमयभूयं। गहिओ सुग्गइमग्गो, नाहं मरणाओ बीहेमि ॥९९॥" तपस्तीव्रघरट्टोऽयं, क्षमामर्कटिकान्वितः। धृतिहस्तो मनःकीलः, कर्म-धान्यादि चूर्णयेत् ॥ १०० ॥ सोऽथ देवो विभङ्गाख्य-ज्ञानेनाक्षुभितं मुनिम्। ज्ञात्वाऽकरोद्विशेषेणो-पसर्गानतिदुस्सहान् ॥१०१॥ क्षपकश्रेणिमारूढः, केवलज्ञानदर्शनम्। संप्राप्य सुव्रतो भव्यान्, प्रतिबोध्य शिवं ययौ ॥१०२॥ नेमिनाथमुखा देवं, श्रुत्वा ह्येकादशीव्रते। श्रीकृष्णवासुदेवाद्या, बभूवुः सादरा जनाः ॥१०३॥ भो! भो! भव्यजना! एवं, श्रुत्वा कल्याणमिच्छुभिः। युस्माभिस्तु समाराध्या, सा मौनैकादशी सदा ॥१०४॥ खरतरगणाधीश-श्रीजिनरत्नसूरयः! तेषां शिष्यगणिप्रेम-मुनेः समाग्रहेण च ॥१०५॥ पाठकलब्धिनाऽकारी-यं मौनैकादशीदिने। जयपुरे च बाणाभ्रा-भ्रनेत्र-(२००५)वत्सरे कथा ॥ १०६ ॥ युग्मम् ॥

## ॥ इति मौनएकादशीपर्व-कथा समाप्ता ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





# (४) अथ पौषदशमीपर्व-कथा ।

प्रणम्य जितमोहारिं, पार्श्वनाथं जिनेश्वरम् । अर्हन्तं कथ्यते पौष—मेचकदशमीकथा ॥ १ ॥ इहैव भरतक्षेत्रे, मगधविषयेऽस्ति च । धन-धान्यादिसंपूर्णा, चम्पानाम्नी महापुरी ॥ २ ॥ तस्या ईशानकोणेऽस्ति, चैत्यालयं मनोहरम् । पूर्णभद्राख्ययक्षस्यो-पवनेन विशोभितम् ॥ ३ ॥ अथ चरमतीर्थेशः, ज्ञानदर्शनधारकः । गौतमादिगणाधीश-वाचंयमसमन्वितः ॥ ४ ॥ पादाब्जैः पावयन् भूमिं, भव्यांश्च प्रतिबोधयन् । तत्राऽन्यदा महावीर-स्वामी च समवासरत् ॥५॥ युग्मम् ॥ श्रोतुं जिनोपदेशं च, वन्दनार्थं जिनेशितुः । मगधाधिपतिस्तत्र, समागतो महोत्सवात् ॥६॥ तिस्रः प्रदक्षिणी कृत्य, समवसरणे प्रभुं । स्तुत्वा स्तोत्रैर्यथास्थान-मुपविष्टो नृपः स च ॥७॥ प्रारेभे देशनां स्वामी, योजनगामिभाषया । संसारसागरब्रुड-द्भव्यात्मोद्धारकारिणीम् । ॥ ८ ॥ यथा—" जीवदयाइ रमिज्जइ, इंदियवग्गो दमिज्जइ सयावि । सच्चं चेव वदिज्जइ, धम्मस्स रहस्समिणमेव ॥ ९ ॥" इत्यादिदेशनां श्रुत्वा, केचिद्भद्रिकतां गताः । केचित्श्राद्धव्रतं केचि-त्साधुधर्मं ललुः पुनः ॥१०॥ तदानीं गौतमस्वामी, नत्वा वीरजिनेश्वरम् । पप्रच्छ भव्यजीवाना-मनुग्रहाय पर्षदि ॥११॥ पौषकृष्णदशम्याश्च, महात्म्यं कथ्यतां प्रभो ! । श्रुत्वा चैवं महावीर-स्वामी प्रोवाच गौतमम् ॥१२॥ पौषकृष्णदशम्यां च, पार्श्वनाथजिनेशितुः । जन्मकल्याणकं चास्ति, जीवकल्याणकारकम् ॥१३॥ द्विसंध्यावश्यकं कार्यं, तद्दिने देववन्दनम् । भूशयनं त्रिशुद्धया च, ब्रह्मचर्यप्रपालनम् ॥ १४ ॥ चैत्ये स्नात्राष्टधा सप्त-दशधा वाऽर्चनोत्सवम् । प्रभावनं विधातव्यं, रथयात्रादिकं पुनः ॥१५॥ गुरोः पार्श्वे समागत्य, श्रोतव्या धर्मदेशना । कार्य-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





मेकाशनप्रत्या-ख्यानमात्महितार्थिभिः ॥१६॥ पूर्वोत्तरदशम्यां च, कार्यमेकाशनत्रयम्। एकस्थाने दशम्यां चा-हारं जलं विधीयते ॥ १७ ॥ अस्या आराधको जीवो, धन-धान्यादिकं सुखम्। इह परत्र देवादि-संप्राप्नोति क्रमाच्छिवम् ॥ १८ ॥ एवं भगवता प्रोक्ते, प्राह श्रीगौतमप्रभुः। हे भगवन्! पुरा केन, सा समाराधिताऽत्र च ॥ १९ ॥ तदुच्यतां प्रभुः प्राह, गौतम! पार्श्वशासने। सम्यगाराधिता सूर-दत्ताख्यश्रेष्ठिना च सा ॥ २० ॥ तद्यथा भरतक्षेत्रे—ऽस्मिन् सुरेन्द्रपुरेऽभवत्। नरसिंहनृपस्तस्य, प्रिया च गुणसुन्दरी ॥ २१ ॥ तस्मिन्पुरेऽवसत् सूर-दत्तश्रेष्ठी महाधनः। यशस्वी च पुरख्यात-स्तस्य शीलवती प्रिया ॥२२॥ मिथ्यात्ववासितः सांख्य-मतभक्तः स चाऽभवत्। शौचधर्मरतो जैन-धर्मं न वेत्ति शर्मदम् ॥ २३ ॥ यतः—"न देवं नाऽदेवं न शुभगुरुमेवं न कुगुरुं, न धर्मं नाऽधर्मं न गुणपरिणद्धं न विगुणम्। न कृत्यं नाकृत्यं न हितमहितं नापि निपुणं, विलोकन्ते लोका जिनवचनचक्षुर्विरहिताः ॥२४॥" मिथ्यात्वग्रसितः श्रेष्ठी, स कदापि शृणोति न। जिनेन्द्रवचनं जीव-देहमेकं हि मन्यते ॥२५॥ परं स राज्यमान्योऽभूत्, पुरश्रेष्ठिपदे स्थितः। कियान्कालो गतस्तस्य, व्यवसायं प्रकुर्वतः ॥ २६ ॥ प्राहिणोदन्यदा यान-पात्रसार्द्धशतद्वयम्। स श्रेष्ठी व्यवसायार्थं, रत्नद्वीपं प्रति मुदा ॥ २७ ॥ तद्भृत्यास्तत्र गत्वा च, वस्तूनां क्रयविक्रयम्। विधाय वलिता मध्य-सागरे यावदागताः ॥ २८ ॥ तावत्प्रवहणाः सर्वेऽ-निष्टकर्मोदयाद्गताः। प्रचण्डवायुना काल-कूटद्वीपे न सद्मनि ॥ २९ ॥ पुनः श्रेष्ठिगृहे भूस्थै-कादशद्रव्यकोटयः। पन्नगवृश्चिकांगार-कादिरूपेण चाऽभवन् ॥ ३० ॥ पुनः पतिता धाटि-भिल्लानां सहसा पथि। पञ्चशतशकटेषु, गृहाऽगच्छत्सु तस्य च ॥ ३१ ॥ श्रेष्ठी ततश्च निर्द्रव्यो-ऽजनि दारिद्र्यपीडितः। तस्य श्रेष्ठीपदं लोके, सम्मानमपि चाऽगमत् ॥३२॥ यतः—"धनमर्जय काकुत्स्थ!,



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धनमूलमिदं जगत्। अन्तरं नैव पश्यामि, निर्धनस्य शवस्य च ॥३३॥" दुहा—"बाप कहे मेरे पूत सपूता, बेन कहे मेरा भइया। घर की जोरू भी लेत बलैया, सोइ बडो जाकी गांठ रुपैया ॥३४॥" दुःखितो निर्धनत्वेन, कालं सोऽगमयत्पुरे। तत्राऽन्यदा च देवेन्द्र-सूरीश्वराः समाययुः ॥३५॥ तान्वंदितुं नृपः सूर-दत्तश्रेष्ठी च नागराः। जना ययुर्यथा स्थानं, निषण्णास्ते प्रणम्य तान् ॥३६॥ सूरिणा देशनाऽऽरब्धा, भोऽत्र जीवहितंकरः। सर्वश्रेयस्करः धर्मः, समाराध्यश्च जन्तुभिः ॥ ३७ ॥ "धर्मतः सकलमंगलावलि-धर्मतः सकलसौख्यसंपदः। धर्मतः स्फुरति निर्मलं यशो, धर्म एव तदहो! विधीयताम् ॥३८॥ विवेकः परमो धर्मो, विवेकः परमं तपः। विवेकः परमं ज्ञानं, विवेको मुक्तिसाधनम् ॥३९॥ भक्ष्याऽभक्ष्यविचारः स्याद्, गम्याऽगम्यविभेदकृत्। मार्गाऽमार्गपरिज्ञानं, गुणाऽगुणविचारणा ॥ ४० ॥ निद्राऽऽहारो रतिभीतिः, पशूनां च नृणां समम्। विवेकोऽन्तरमत्राऽस्ति, तं विना पशवः स्मृताः ॥ ४१ ॥ एक उत्पद्यते जन्तु-र्यात्येकश्च भवान्तरम्। एको दुःखी सुखी चैक-स्तथैकः सिद्धिसौख्यभाक् ॥४२॥" इत्यादिदेशनां श्रुत्वा, स्वस्वस्थानं गता जनाः। सूरश्रेष्ठी तदाऽवादीन्, स्वामिन्! किं जीवलक्षणम्? ॥४३॥ सूरिणोक्तं तदा श्रेष्ठीन्!, जीवो ज्ञेयः स एव यः। ज्ञानदर्शनचारित्र-तपोवीर्योपयोगवान् ॥४४॥ यतः—"नाणं च दंसणं चेव, चरित्तं च तवो तहा। वीरियं उवओगो य, एयं जीवस्स लक्खणं ॥४५॥" चेतनालक्षणश्चात्मा, सामान्येन बुधैः स्मृतः। संसारात्मा तथा जीवः, परमात्मा द्विधा मतः ॥४६॥ संसारात्मा सदा दुःखी, जन्ममरणशोकभाक्। चतुरशीतिलक्षासु, जीवो भ्राम्यति योनिषु ॥४७॥ न सा जातिर्न सा योनि-र्न तत्क्षेत्रं न तत्कुलम्। यत्र कर्मवशादात्मा, नोत्पन्नोऽयमनेकधा ॥४८॥ "एगया देवलोएसु, नरएसु वि एगया। एगया आसुरं कायं, अहाकम्मेहिं गच्छइ ॥४९॥ एगया खत्तिओ होइ, तओ चंडाल-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





बुक्सो। तओ कीडपयंगो य, तओ कुंथुपिवीलिया ॥५०॥" सुभगो दुर्भगः श्रीमान्, रूपवान् रूपवर्जितः। स एव सेवकः स्वामी, नरो नारी नपुंसकः ॥ ५१ ॥ संसारी कर्मसंबंधा-न्नटवत् परिभ्राम्यति। अनन्तकालपर्यन्तं, जीवः संसारवर्त्मनि ॥५२॥ भव्यजीवे दयादानं, धर्मकल्पतरूपमम्। दानशीलतपोभावं, शाखा मुक्तिसुखं फलम् ॥५३॥ धर्मा-देव कुले जन्म, धर्माद्धि विपुलं यशः। धर्माद् धनं सुखं रूपं, धर्मः स्वर्गापवर्गदः ॥५४॥ दोहा—"धर्म करत संसार सुख, धर्म करत निर्वाण। धर्मपन्थ साधन विना, नर तिर्यंच समान ॥ ५५ ॥ सुपुरुष तीन पदार्थ साधे है, धर्म विशेष जानी आराधे हे। धर्म प्रधान कहे सब कोई, अर्थ काम धर्महित होइ ॥५६॥" इति धर्मकथां श्रुत्वा, सम्यक्त्व-संगतः स च। जीवाऽजीवादिषड्द्रव्य-नवतत्त्वादिवेदकः ॥५७॥ पुनः पप्रच्छ हे स्वामिन्!, किमपि तपसः फलम्?। ममोपदिश्यतां येना-ऽऽयाति पुनर्गतं धनम् ॥५८॥ तदोक्तं सूरिणा पौष-मेचकदशमीव्रतम्। गृहाणाऽस्मिन्दिने जन्मा-ऽस्ति श्रीपार्श्वजिनेशितुः ॥५९॥ पूर्वोत्तरदशम्यह्नि, कार्यमेकाशनत्रयम्। पूर्वोक्तविधिना भूमि-शयनं शीलपालनम् ॥६०॥ द्विटंकाऽऽवश्यकं कार्यं, त्रिवेलादेववन्दनम्। चैत्ये महोत्सवस्नात्र-पूजादिकरणं पुनः ॥६१॥ ॐ ह्रीं श्रीं पार्श्वनाथाया-र्हते नमः पदस्य च। द्विसहस्रजपः कार्यः, पारणे स्वामिवत्सलः ॥६२॥ यावच्च द्विमासोनै-कादशवत्सरं तपः। कार्य-मेवं समाराध्या, विधिना दशमीतिथिः ॥६३॥ लोकेऽस्मिन् धान्यसौभाग्य-धनादिसर्वसंम्पदम्। परत्र स्वर्गसौख्यं च, मोक्षसुखं क्रमाद्भवेत् ॥६४॥ श्रेष्ठिनाऽथ गुरुं नत्वा, स्वीकृत्य धर्ममार्हतम्। उच्चरितं गुरोः पार्श्वा-द्भावेन दशमी-व्रतम् ॥६५॥ तत्तपः कुर्वतस्तस्य, दशम्येका गता यदा। तदाऽकस्माच्च! प्रोतास्ते, कालकूटात्समागताः ॥६६॥ अनु-चरमुखात् श्रेष्ठी, श्रुत्वैवं श्रद्दधौ न हि। तदा प्राह प्रिया स्वामिन्!, जानातु सत्यमेव तत् ॥६७॥ माऽसत्यं मन्यता-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





मद्य, यदि गृहे भविष्यति । निधानं प्रकटं नूनं, सत्यं ज्ञेयं तदा च तत् ॥६८॥ ततस्तौ द्वौ निधिं द्रष्टुं, गतौ विलोक्य तं निधिम् । श्रेष्ठी प्राह प्रिये ! प्रादु-र्भूतोऽखिलः पुनर्निधिः ॥ ६९ ॥ जैनधर्मप्रभावेण, पोतवर्णापनागता । देवगुरु-प्रसादेन, जातोऽहं धनवान्पुनः ॥७०॥ पुनः श्रेष्ठिपदं प्राप्तं, राज्ञा सम्मानितः स च । जाता दशसुतास्तस्य, कालः सुखेन गच्छति ॥७१॥ तत्राऽन्यदाऽथ देवेन्द्र-सूरीश्वरः समागतः । श्रुत्वैवं गतवान् श्रेष्ठी, नत्वा निजं गुरुं स्थितः ॥७२॥ सूरिणा देशना दत्ता, देशनान्तेऽवदत्स च । दशम्युद्यापने कार्यं, किं स्वामिस्तन्निगद्यताम् ॥ ७३ ॥ गुरुरुवाच भो श्रेष्ठिन् ! कार्याण्युद्यापने वरे । ज्ञान-दर्शन-चारित्रो-पकरणदशाऽत्र च ॥७४॥ अष्टाह्निकोत्सवस्वामि-वात्सल्यार्चा-प्रभावना । रथयात्रा पुनस्तत्र, कर्त्तव्या विधिना बुधैः ॥७५॥ श्रेष्ठी श्रुत्वेति कृत्वोद्या-पनकं विस्तराद्वरम् । दशदश-नवीनार्ह-चैत्यचैत्यान्यचीकरत् ॥७६॥ वैराग्यवासितः श्रेष्ठी, सोऽन्यदा सुन्दराभिधे । ज्येष्ठे पुत्रे समारोप्य, गृहभारं सुतान् जगौ ॥७७॥ पूर्वोक्तविधिना पुत्रा !, युष्माभिर्दशमीव्रतम् । समाराध्यं सदाऽस्माभि-राराधितं च तद्व्रतम् ॥७८॥ तेनाऽत्र धनकुटुम्बेन, संजाता सुखिनो वयम् । यूयमपि भविष्यथ, मद्वद्धि सुखिनः सदा ॥७९॥ एवं शिक्षां वितीर्यानु-मतिं लात्वा ललौ स च । प्रव्रज्यां सुगुरोः पार्श्वे, प्रवर्द्धमानभावतः ॥८०॥ विविधान्यथ षष्ठाष्ट-मादि तपांसि कुर्वता । तेन द्वादश वर्षाणि, यावद्दीक्षा च पालिता ॥८१॥ प्रान्ते पञ्चदशाहानि, विधायानशनं स च । साधुः पञ्च-नमस्कारं, ध्यायन्मृत्वा समाधिना ॥ ८२ ॥ विंशतिसागरायुष्को, दशमे च सुरालये । देवो महर्द्धिको जात-स्तपोव्रत-प्रभावतः ॥८३॥ युग्मम् ॥ अस्यैव जम्बूद्वीपस्य, महाविदेहनामके । क्षेत्रे श्रीपुष्कलावत्यां, विजये च मनोहरे ॥ ८४ ॥ नगर्यां मंगलावत्यां, सिंहसेनाख्यभूपतिः । सद्गुणसुन्दरी तस्य, प्रियाऽभूद् गुणसुन्दरी ॥ ८५ ॥ स सूरदत्तजीवोऽथ,



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





भुंक्त्वा सुरसुखानि तु । च्युत्वा च जयसेनाख्यः, पुत्रस्तयोर्भविष्यति ॥८६॥ वैषयिकं सुखं भुंक्त्वा, चारित्रं च गृहिष्यति ! । पुनरेकादशाङ्गानि, सोपाङ्गानि पठिष्यति ॥८७॥ एकाकी विहरन्कायो-सर्गे स्थास्यति सोऽन्यदा । तत्राऽधिष्ठायको देवो, दुष्टो मिथ्यात्वत्रासितः ॥८८॥ एकविंशोपसर्गांश्चै-कस्यां रात्रौ करिष्यति । तस्य मुनेः पिशाचाऽहिसिंहव्याघ्रगजादिकान् ॥ ८९ ॥ युग्मम् ॥ शमसंवेगनिर्वेद-दयाऽऽस्तिक्यगुणान्वितः । स साधुरुपसर्गांस्तान्, क्षमया च क्षमिण्यति ॥९०॥ घातिकर्मचतुष्कं तु, क्षपयित्वा महामुनिः । प्राप्स्यति शुभध्यानेन, केवलज्ञानदर्शनम् ॥९१॥ विहृत्य भूतले भव्य-जीवांश्च प्रतिबोधयन् । भवोपग्राहिकर्माणि, क्षिप्त्वा शिवं गमिष्यति ॥ ९२ ॥ निरतिचारचारित्रं, प्रपाल्य शीलवत्यपि । सा प्रान्तेऽनशनं कृत्वा, मृत्वा गता सुरालयम् ॥९३॥ स च शीलवती जीव-स्ततश्च्युत्वा भविष्यति । क्षेत्रे महाविदेहाख्ये, मानुष्ये ह्युत्तमे कुले ॥ ९४ ॥ तत्र सुगुरुसंयोगा-त्प्रव्रज्यां स गृहिष्यति । क्षपयित्वाऽष्टकर्माणि, मोक्षपुरीं गमिष्यति ॥ ९५ ॥ महावीरजिनेनैवं, गौतमस्वामिनः पुरः । पौषकृष्णदशम्याश्च, माहात्म्यं हि निरूपितम् ॥९६॥ भो भव्या ! अस्य वृत्तान्तं, निशम्य दशमीव्रतम् । अवश्यमेव कर्त्तव्यं, सर्वसम्पत्तिकारकम् ॥९७॥ अस्यास्तपःप्रभावेण, धन्यधान्यादिकं जनः । इह पर भवे स्वर्ग-मोक्षौ प्राप्नोति निश्चयात् ॥ ९८ ॥ खरतरगणाधीशाः, श्रीजिनरत्नसूरयः । तेषां शिष्यगणिप्रेम-मुनिसमाग्रहेण च ॥ ९९ ॥ पाठकलब्धिनाऽकारी-यं पौषदशमीतिथौ । जयपुरे च वाणाभ्र-शून्यनयन (२००५) वत्सरे ॥ १०० ॥ युग्मम् ॥

## ॥ इति पौषदशमीपर्व-कथा समाप्ता ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





# (५) अथ मेरुत्रयोदशी पर्व-कथा।

ऋषभस्वामिनं नत्वा, भगवन्तं प्रकीर्त्यते। माहात्म्यं माघकृष्णस्य, मेरुत्रयोदशीतिथेः ॥१॥ अथेहाऽष्टमहाप्रातिहार्यादिगुणधारिणा। केवलिना महावीर-स्वामिभगवताऽन्यदा ॥२॥ स्वशिष्यगौतस्वामि-प्रमुखयमिनां पुरः। माघकृष्णत्रयोदश्या, माहात्म्यं कथितं यथा ॥३॥ तथैवोच्यतेऽस्मामि-स्तन्माहात्म्यं समुद्भवम्। तीर्थेशऋषभस्वाम्य-ऽजितनाथजिनान्तरे ॥ ४ ॥ त्रिभिर्विशेषकम् ॥ अयोध्यायां महापुर्या-मिक्ष्वाकुवंशजोऽभवत्। महान् काश्यपगोत्रीयो-ऽनंतवीर्याख्यभूपतिः ॥५॥ तस्य प्रियमती राज्ञी, पञ्चशतप्रियासु च। मुख्या धनञ्जयो मन्त्री, चतुर्बुद्धिधरोऽजवि ॥६॥ राज्यं पालयतस्तस्या-ऽजनि चिन्ता स्वचेतसि। अद्यावधि सुतो नास्ति, मम राज्यधुरन्धरः ॥७॥ एतद्राज्यस्य को भोक्ता, भविष्यति? सुतं विना। गृहं शून्यं ततो राज्ञा, सदुपायाः कृता घनाः ॥ ८ ॥ परं नाऽभूत्सुतोत्पत्ति-स्तस्मिन्नवसरेऽन्यदा। राज्ञो गृहं समायातः, भिक्षार्थं कोणको मुनिः ॥९॥ भूपराज्ञ्यौ तदोत्थाय, वन्दित्वा विधिना च तम्। वितीर्य प्रासुकाऽऽहारं, कृत्वाऽञ्जलिं पप्रच्छतुः ॥१०॥ गुरो! नास्ति सुतोऽस्माकं, कदाऽपि स भविष्यति?। न वा मुनिरथाऽवादी-न्नेदं वदन्ति साधवः ॥११॥ तदा भूपतिराज्ञीभ्यां, प्रार्थ्यमानः पुनः पुनः। मुनिर्जगाद भो!



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





राजन् !, भावी पंगुः सुतस्तव ॥१२॥ उक्त्वेत्यगान्मुनिर्भूप-राज्ञीभ्यां चिन्तितं तदा। पङ्गुरपि सुतो नोऽस्तु, सा सगर्भाऽभवत्क्रमात् ॥१३॥ पूर्णे काले सुतः पङ्गु-र्जातो नृपो निशम्य तत्। पिङ्गलराय इत्यस्य, नाम चकार हर्षितः ॥१४॥ तं ततोऽन्तःपुरे भूप-राज्ञ्यौ रहो ररक्षतुः। प्रकटीचक्रतुर्नैव, बहिः कदापि लज्जया ॥१५॥ ऊचतुस्तौ जने पृष्टे-ऽस्य कुमारस्य वर्त्तते। रूपं मनोहरं तेन, प्रकटीक्रियते न सः ॥ १६ ॥ मा कदाचिद्भवेद् दृष्टि-दोषो ह्यस्येति सर्वतः। वार्त्तेयं प्रसृता नास्ति, तत्तुल्यो रूपवान् जने ॥ १७ ॥ क्रमात्पिङ्गलरायोऽथ, वृद्धिं प्राप्त इतोऽस्ति च। मलयविषये रम्यं, पद्मपुराऽभिधं पुरम् ॥१८॥ तत्र चैक्ष्वाकुवंशीय-काश्यपगोत्रिकोऽभवत्। शतरथनृपस्तस्य, मुख्या चेन्दुमती प्रिया ॥१९॥ तत्कुक्षिसम्भवा पुत्री, राज्ञोऽभूद् गुणसुन्दरी। रूपलावण्यसौभाग्य-सद्गुणगणशालिनी ॥२०॥ तस्य राज्ञः सुतो नास्ति, सैवैकाऽतीववल्लभा। पुत्रीं तां यौवनप्राप्तां, दृष्ट्वा राज्ञाऽथ चिन्तितम् ॥ २१ ॥ इयं कस्मै सुता देये-त्यऽस्मिन्नवसरे जनाः। अत्रत्या व्यवसायार्थं, चलिता विषयान्तरे ॥२२॥ तदा तेभ्यो नृपेणोक्तं, भ्रमद्भि-र्विषयान्तरे। युष्माभिर्गुणसुन्दर्या, योग्यं वरं विलोक्य च ॥ २३ ॥ तस्या विवाहसम्बन्धः, कार्यस्तथेति भूपतेः। वचोऽङ्गीकृत्य ते चेलु-रयोध्यायां गताः क्रमात् ॥२४॥ युग्मम् ॥ तत्र तैर्बहुलाभश्च, मेलितः क्रयविक्रयम्। कृत्वा पुनः श्रुतं लोका-त्कुमाररूपमद्भुतम् ॥२५॥ कुमारेण समं तस्याः, सम्बन्ध विदधुश्च ते। सन्तोषिता नृपेणाऽपि, शुल्कस्य मोचनादिना ॥२६॥ हर्षितास्तेऽपि संचेलुः, स्वविषयं प्रति क्रमात्। तैः प्राप्य स्वपुरं राज्ञे, तद्वृत्तान्तो निवेदितः ॥२७॥ अद्भुतरूपलावण्य-सौभाग्यादिगुणान बहून्। श्रुत्वा पिंगलरायस्य, संतोषं भूपतिर्गतः ॥ २८ ॥ अथ सुताविवाहार्थं, नृपेण प्रेषिता नराः। तेऽप्यऽयोध्यापुरीं गत्वा, प्रणम्य जगदुर्नृपम् ॥ २९ ॥ कुमारः प्रेष्यतां



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





राजन्!, विवाहार्थं च सत्वरम्। श्रुत्वैवं तत उत्थाय, नृपो ययौ स्वमन्दिरम् ॥ ३० ॥ एकान्ते नृप आहूयो-वाच राज्ञीं च मन्त्रिणम्। किं कर्त्तव्यं? सुतस्त्वस्ति, पंगुर्दास्यति? कः सुताम्? ॥ ३१ ॥ चित्ते किञ्चिद्विचार्याऽथा-ऽऽहूय तान् सचिवोऽवदत्। नाधुनाऽत्र कुमारोऽस्ति, किन्तु मातुलसद्मनि ॥३२॥ इतो मातुलसद्माऽस्ति, दूरं द्विशतयोजनम्। मोहनीपत्तने तेना-ऽधुना लग्नं भवेन्नहि ॥ ३३ ॥ पश्चाच्च ज्ञास्यतेऽथोक्तं, तैर्दूरेऽध्वा तु वर्त्तते। अतो लग्नं च निर्धार्य, प्रदेयं भवता वरम् ॥ ३४ ॥ स्वयमपि समागम्यं, लग्ने श्रुत्वेति भूपतिः। लग्नं षोडशमासान्ते, भावीति निरधारयत् ॥ ३५ ॥ ततो लग्नं गृहीत्वाऽगुः, स्वदेशं तेऽप्यऽथावदत्। चिन्तातुरो नृपः कार्यं?, उपायः शीघ्रमत्र कः ॥३६॥ सत्वरमेव यास्यन्ति, षोडशमासकास्तदा। नृपराज्ञीप्रधानैश्चो-पायाः संशोधिता घनाः ॥३७॥ परं न घटितो हस्ते, कोऽप्युपायोऽथ तेऽखिलाः। निराशीभूय दुःखेन, समयं गमयन्ति च ॥ ३८ ॥ तस्मिन्नवसरे तत्र, साधुपञ्चशतीयुतः। चतुर्ज्ञानधराचार्यो, गांगिलसूरिरिराययौ ॥३८॥ सार्द्धं स्वपरिवारेण, राजा पौरा मुनीश्वरम्। नत्वा, स्थिता यथास्थानं, सूरिणाऽऽरंभि देशना ॥ ४० ॥ "जीवदयाइ रमिज्जइ, इंदियवग्गो दमिज्जइ सयावि। सच्चं चेव वदिज्जइ, धम्मस्स रहस्समिणमेव ॥ ४१ ॥ जयणा उ धम्मजणणी, जयणा धम्मस्स पालिणी चेव। तह वुड्ढिकरी जयणा, एगंतसुहावहा जयणा ॥ ४२ ॥ आरंभे नत्थि दया, महिलासंगेण नासए बंभं। संकाए सम्मत्तं, पव्वज्जा अत्थगहणेणं ॥४३॥ जे बंभचेरभट्ठा, पाए पाडंति बंभयारीणं। ते हुंति टुंटमुंटा, बोहि वि पुण दुल्लहा तेसिं ॥४४॥" मूलं दयाऽस्ति धर्मस्य, हिंसा मूलमघस्य च। हिंसां करोति यो जीवः, कारयत्यनुमोदते ॥ ४५ ॥ एते त्रयोऽपि विज्ञेयाः, सदृशाश्च भवान्तरे। रोगी पङ्गुर्महादुःख-स्थानं भवति हिंसकः ॥४६॥ देशनान्ते नृपोऽपृच्छ-द्भगवन्! केन



For Private and Personal Use Only

कर्मणा। मम सुतोऽभवत्पङ्गु-स्तत्प्रागूभवमवग् मुनिः ॥ ४७ ॥ बभूव जम्बूद्वीपस्य, क्षेत्रे चैरवताभिधे। श्रीअचलपुरे द्रंगे, महेन्द्रध्वजभूपतिः ॥४८॥ तस्याऽभूदुमया राज्ञी, सामन्तसिंहसंज्ञकः,। तत्पुत्रो द्यूतकृत्संगा-त्तेन द्यूतं च शिक्षितम् ॥४९॥ स सप्तव्यसनी जातः, क्रमान्निषेधितोऽपि सः। नृपेण व्यसनान्नैव, विरमति कदाचन ॥ ५० ॥ तमयोग्यं नृपो ज्ञात्वा, स्वदेशान्निरवासयत्। ततो देशाटनं कुर्वन्, सुरपुरं समाययौ ॥५१॥ चम्पकश्रेष्ठिना तत्रा-र्हच्चैत्यरक्षणाय सः। स्थापितो मंदिरे चौर्यं, कृत्वा द्यूतं च खेलते ॥५२॥ तज्ज्ञात्वा श्रेष्ठिना प्रोक्तं, भद्र! यो भक्षयेत्पुमान्। देवद्रव्यं स चाऽनंत-कालं यावद्भवेऽटति ॥५३॥ तस्मादतः परं कार्यं, न कर्त्तव्यमिदं त्वया। इत्थं स उपदिष्टोऽपि, शिक्षां न मनुते हिताम् ॥ ५४ ॥ तेनैकदा जिनच्छत्रा-दिकं लात्वा च सेवितः। अनाचारस्ततो ज्ञात्वा, श्रेष्ठिना कर्षितः स च ॥५५॥ सोऽथाखेटकसंगेन, वने भ्रमन् मृगादिकान्। मारयित्वा बहून् जीवान्, चकारोदरपूर्तिकम् ॥५६॥ तस्मिन् वने तपस्यंति, तापसास्तापसाश्रमे। तत्र मृगाः समागत्यो-पविशंति च निर्भयाः ॥ ५७ ॥ तेन सामंतसिंहेन, तत्रायान्ती मृगी हता। सगर्भा तीक्ष्णशस्त्रेण, छिन्नास्तस्याश्चतुष्पदाः ॥ ५८ ॥ भूमौ सा पतिता दृष्टा, तापसैर्निकषाश्रमम्। तैस्तस्याः श्राविता धर्मः, सा तदा सद्गतिं ययौ ॥ ५९ ॥ दुष्ट! यथा त्वया मृग्याः, पादाश्छिन्ना भवान्तरे। भूयात्पंगुस्तथा त्वं ही-ति तस्मै सशपुश्च ते ॥६०॥ ततः सामंतसिंहोऽपि, दृष्ट्वा क्रुद्धांश्च तापसान्। वने नश्यंश्च सिंहेन, मारितो नरकं ययौ ॥६१॥ सामन्तसिंहजीवोऽथो-द्धृत्य ततश्चकार सः। बहून्नरकतिर्यक्षु, महादुःखमयान् भवान् ॥६२॥ ततो महाविदेहे स, कुसुमपुरपुर्वरे। विशालकीर्त्तिभूपस्य, शिवादस्याः सुतोऽजनि ॥६३॥ वज्रनामा क्रमात्सोऽभूद्-गलत्कुष्ठी च यौवने। गलितौ च करौ पादौ, दुःखी स पंगुतां गतः ॥ ६४ ॥ मात्रा



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पञ्चनमस्कारो–ऽन्ते तस्मै श्राविस्ततः । मृत्वा समाधिना व्रज्रो, बभूव व्यन्तरः सुरः ॥ ६५ ॥ भरते जम्बूद्वीपस्य, सौहार्दपुरकेऽजनि । सुरदासाभिधः श्रेष्ठी, वसन्ततिलका प्रिया ॥६६॥ वज्रजीवस्तयश्च्युत्वा, तयोः पुत्रः स्वयंप्रभः । अभूत्स गुणवान् श्रेष्ठ–विवेकवांश्च शिष्टधीः ॥६७॥ परन्तु स समुत्पन्न–श्चरणव्रणरोगयुक् । चलितुं न शशाकाऽसौ, तस्माद्रोगात्स्वयंप्रभः ॥६८॥ क्रमेण सोऽष्टवर्षीयो, जात एकसुतस्ततः । तद्दुःखदुःखितौ जातौ, पितरौ सुतवत्सलौ ॥६९॥ संघोऽगमत्क्षणे तस्मिन्, सिद्धाद्रिदर्शनाय च । तेन सहाऽचलच्छ्रेष्ठी, यात्रायै ससुतप्रियः ॥ ७० ॥ सिद्धाद्रौ विधिना गत्वा, संघः श्रेष्ठी स सप्रियः । पुत्रं लात्वाऽर्चनं चक्रे, ऋषभस्वामिनः प्रभोः ॥७१॥ सूर्यकुण्डजलेनाऽथ, देवाधिष्ठेन रोगिणम् । स्वसुतं स्नपयामास, श्रेष्ठी भावेन सप्रियः ॥७२॥ परन्तु तज्जलं तस्य, स्पृशति चरणौ नहि । दृष्ट्वा तद्गुरवे पृष्टं, तद्धेतुर्विस्मितैर्जनैः ॥७३॥ गुरुः प्राह जिनद्रव्यं, प्राग्भवेऽनेन भक्षितम् । छिन्ना मृगीचतुष्पादाः, प्राग्भवास्तस्य जल्पिताः ॥ ७४ ॥ तत्कर्मास्य बहु क्षीणं, किञ्चिदद्यापि विद्यते । तेन तीर्थजलं पादौ, न स्पृशति कदाचन ॥७५॥ तीव्रकर्मक्षयो नास्ति, भुक्तिं विनेति तद्वचः । श्रुत्वा माता पिता पुत्रो, वैराग्यं प्रगतास्त्रयः ॥७६॥ ततः श्रीऋभस्वामी, चरणानभिवन्द्य च । गृहमागत्य संजाताः, सद्धर्मकरणोद्यताः ॥७७॥ षोडशसहस्राब्दानि, कुष्ठव्रणादिवेदनाम् । अनुभूय च तत्कर्मा–लोच्य मृत्वा सुरोऽजनि ॥७८॥ आद्यस्वर्गात्स च च्युत्वा, राजंस्तव सुतोऽजनि । पिंगलरायनामाऽयं, पंगुः प्राक्कृतकर्मणा ॥७९॥ एतन्मुनिवचः श्रुत्वा, राजा प्राहाऽथ सद्गुरो ! । नश्यति ? केन पुण्येन, कर्मैतत् मुनिनाऽकथि ॥८९॥ तृतीयकारकप्रान्ते, श्रीऋषभजिनेश्वरः । माघकृष्णत्रयोदश्यां, निर्वाणपदमाप्तवान् ॥८१॥ तस्मिन् दिने विधातव्य–मुपवासं च निर्जलम् । रात्नं वा राजतं हैम–सार्पिषं मेरुपञ्चकम् ॥८२॥ मध्यमेरुमहान्तं च,



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ढौकयेदर्हतः पुरः। नन्दावर्तांश्चतुर्दिक्षु, कुर्याद्दीपादिपूर्वकम् ॥ ८३ ॥ पुनर्जिनार्चनं कार्य-मेवं मासत्रयोदशम्। यावत्-त्रयोदशाब्दानि, वा कर्त्तव्यमिदं तपः ॥ ८४ ॥ ॐ ह्रीं श्रीं ऋषभस्वामि-पारंगताय युगुनमः । एतत्पदस्य कर्त्तव्यः, द्विसहस्रजपः पुनः ॥८५॥ एतत्तपःप्रभावेण, सर्वरोगक्षयो भवेत् । संपद्यते सुखं सर्व-मिह परत्र चाऽतुलम् ॥८६॥ यदि कुर्यात्त्रयोदश्यां, पौषधं पारणादिने । तदा सर्वविधिं कृत्वा, कर्त्तव्यं पारणं ततः ॥७७॥ एतद्गुरुवचः श्रुत्वा, चक्रे पिंगलरायकः । माघकृष्णत्रयोदश्यां, गुरूक्तविधिना व्रतम् ॥८८॥ प्रादुर्भूतौ कुमारस्य, तावता चरणाङ्कुरौ, वै त्रयो-दशमासान्त-र्जातौ पादौ च सुन्दरौ ॥८९॥ परिणीता कुमारेण, ततः सा गुणसुन्दरी । अपरा अपि बह्व्यश्च, परि-णीता नृपात्मजा ॥९०॥ ततो राजा कुमाराय, राज्यं दत्वा स्वयं पुनः । दीक्षां गांगिलसूरीश-पार्श्वे भागवतीं ललौ ॥९१॥ स च प्रपाल्य चारित्रं, गृहीत्वा विमलाऽचले । अनशनं स्वकर्माणि, क्षपयित्वा शिवं ययौ ॥९२॥ पिंगल-राथभूपेन, यावद्वर्षत्रयोदश । पुनराराधिता माघ-कृष्णमेरुत्रयोदशी ॥९३॥ ज्ञानदर्शनचारित्रो-पकरणविधानतः । उद्यापनं चकाराऽसौ, महदाडम्बरेण च ॥९४॥ ततः कियन्ति वर्षाणि, राज्यं प्रपाल्य भूपतिः, महसेनकुमाराय, प्राज्यं राज्यं निजं ददौ ॥९५॥ ततः स सुव्रताचार्य-पार्श्वे दीक्षां ललौ नृपः। बहुभिः पुरुषैः सार्द्धं, वैराग्याश्रितमानसः ॥९६॥ द्वादशाङ्गीमधीत्याऽभू-त्स चतुर्दशपूर्वभृत् । क्रमात्सूरिपदं प्राप्त-स्तीव्रतपः क्रियाधरः ॥९७॥ ततः स क्षपकश्रेणि-समा-रूढो मुनीश्वरः । विनाश्य घातिकर्माणि, केवलज्ञानमाप्तवान् ॥ ९८ ॥ प्रतिबोध्याऽथ भव्यांश्च, पिंगलरायकेवली । प्रान्ते चाऽघातिकर्माणि, क्षपयित्वा शिवं ययौ ॥ ९९ ॥ इत्थं मेरुत्रयोदश्या, जातं पिंगलरायतः । माहात्म्यं तद्व्रतं चाऽत्र, परत्र सुखकारकम् ॥१००॥ माघकृष्णत्रयोदश्या, व्रताराधनतत्पराः । भवन्तु भो जना ! येन, निर्वाणादिसुखं



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





भवेत् ॥१०१॥ खरतरगणाधीशाः, श्रीजिनरत्नसूरयः। तेषां शिष्यगणिप्रेम-मुनिसमाग्रहेण च ॥१०२॥ पाठकलब्धिना चेयं, जयपुरे कथा कृता। बाणाभ्राभ्रकराब्दे (२००५) च, मेरुत्रयोदशीतिथौ ॥ १०३ ॥

## ॥ इति मेरुत्रयोदशी-कथा समाप्ता ॥

## ( ६ ) अथ होलिका-पर्व-कथा ॥

पार्श्वनाथं जिनाधीशं, पार्श्वयक्षेन सेवितम्। प्रणम्य जनविख्यातं, प्रोच्यते होलिकाकथा ॥१॥ होलिका फाल्गुने मासे, द्विविधा द्रव्यभावतः। तत्राद्या धर्महीनानां, द्वितीया धर्मिणां मता ॥२॥ होलिकेति वदन्त्यत्र, पर्वेदं प्राकृता जनाः। ये सारासारवस्त्वज्ञा, महामोहेन धूर्णिताः ॥ ३ ॥ विवेकविकला हीन-लोकप्रवाहसंगताः। गतानुगतिका लोका, जैनधर्मपराङ्मुखाः ॥ ४ ॥ ते द्रव्यहोलिकां वह्नि-मयीं च छगणादिभिः। कुर्वन्ति धर्मपर्वाणि, विराधयन्ति लीलया ॥ ५ ॥ त्रिभिर्विशेषकम् ॥ प्रतिपदादिने धूलि-क्रीडनाऽवाच्यजल्पनम्। मलमूत्रजलाच्छोट-रामादिवस्त्रकर्षणम् ॥ ६ ॥ भस्माद्युद्दालनं लेष्ठ्वा-दिभिश्च जनपीडनम्। रासभारोपणाऽसभ्य-प्रवृत्तिं विदधन्ति ते ॥ ७ ॥ युग्मम् ॥ संसारवर्द्धनं सर्व-मिदमनर्थदण्डकम्। धार्मिकैः परिहर्त्तव्यं, भवस्वभाववेदिभिः ॥ ८ ॥ ये पुनर्धर्मिणस्ते च, प्रकुर्वन्ति तपोऽग्निना। कर्म-छगणकाष्ठादि-भस्मीकृद्भावहोलिकाम् ॥९॥ आर्त्तध्यानपरित्यागा-द्धर्मध्यानजलेन ते। श्राद्धाः कुर्वन्ति कर्माऽग्नि-महा-तापोपशामनम् ॥१०॥ प्रवृत्तं लौकिकं चेदं, रजःपर्व कुतोऽस्य च। पर्वणः सम्प्रदायेनो-च्यते कथानकं यथा ॥ ११ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





जयपुरेऽभवत्पूर्व-देशस्थे नरवर्मकः। भूपो मदसेनाख्या, प्रिया तस्य पतिव्रता ॥१२॥ तस्याऽभून्मतिचन्द्राख्यो, मन्त्री तत्रैव चाऽवसत्। मनोरथाऽभिधः श्रेष्ठी, तस्य पुत्रचतुष्टयम् ॥१३॥ तेषामुपर्यभूत्तस्य, रूपिणी होलिका सुता। पित्रा विवाहिता साऽस्या, दुष्कर्मणा पतिर्मृतः ॥१४॥ सा च सदा पितुर्गेहे, तिष्ठति सुखपूर्वकम्। इतोऽभूद्धंगदेशेश-भुवन-पालभूपतिः ॥१५॥ कामपालाभिधः पुत्रो-ऽभूत्तस्याऽतीव रूपवान्। तां सोऽन्यदा गावक्षस्थां, दृष्ट्वाऽभूत्कामपीडितः ॥१६॥ दृष्ट्वा तं होलिकाऽपि सा, कामार्त्ताऽभूत्तदा सुताम्। विलोक्य विषसादासौ, श्रेष्ठी गुप्तस्मरार्त्तिनीम् ॥ १७ ॥ इतस्तत्र पुरे चैका, हि परिव्राजिकाऽवसत्। द्विजकुलोद्भवा चण्ड-रुद्रमाण्डस्य पुत्रिका ॥१८॥ भरडाचलभूतेश्च, पत्नी ढुण्ढेति नामतः। विख्याता साऽभवद्गूढा, भूतिकर्मादिकारिणी ॥१९॥ तथा क्षुधातुरा सा च, भिक्षार्थमभ्रमत्सदा। परं लाभान्तरायेण, भिक्षां न लभते क्वचित् ॥२०॥ ततश्चकार लोकेभ्यः, कोपं साऽथ मनोरथः। तां सत्कृत्याऽवदन्मान्तः!, पटूर्वो कुरु सुतां मम ॥२१॥ ततो रहसि सा पृष्टा, तयाऽवदच्च होलिका। स्वाभिप्रायं ततः श्रुत्वा, परिव्राजिकयाऽकथि ॥ २२ ॥ रविवारे त्वमागच्छेः, सूर्यसद्मनि संगमम्। तस्याऽहं कारयिष्यामी-त्युक्त्वा सा कुट्टिनी गता ॥२३॥ कामपालकुमारोऽपि, तत्र सा होलिका पुनः। संकेतिते तपस्विन्या, स्थाने रविदिने ययौ ॥२४॥ ततः सा विधिना सूर्य-मूर्तिं प्रपूज्य यावता। प्रतिचचाल तावत्ता-मालिलिङ्ग कुमारकः ॥२५॥ तदा तया कुमारस्य, पृष्ठे दत्वा चपेटिकाम्। पूच्चक्रेऽन्यनरस्पर्शं, इह सत्या ममाऽजनि ॥२६॥ तच्छुद्ध्यर्थं करोम्यग्नि-प्रवेशं तत्पिता तदा। मरणाभिमुखीं स्वीय-पुत्रीमानीतवान् गृहम् ॥२७॥ ततः फाल्गुनराकाया, रात्रौ पुनस्तपस्विनी। संगमं कारयामासो-च्चैर्दुराचारिणोस्तयोः ॥२८॥ स्वयं सा तद्गृहासन्नो-टजे प्रगाढनिद्रया। सुप्ताऽथ होलिकाकाम-पालाभ्यां च विचारितम् ॥२९॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





षट्कर्णो भिद्यते मन्त्र-श्चतुष्कर्णो न भिद्यते। द्विकर्णस्य च मंत्रस्य, ब्रह्माऽप्यन्तं न गच्छति ॥३०॥ विचार्येति गृहे सुप्तां, प्रज्वाल्य तापसीगृहम्। कुमारसहिता होली-र्नष्टाऽन्यत्र स्थिता ततः ॥३१॥ श्रेष्ठी प्रातः सुतां दग्धां, विज्ञाय व्यलपद्बहु। तदा लोकाः सतीं ज्ञात्वा, तां नेमुस्तकभस्म च ॥ ३२ ॥ अत्र स्वजीविकां कर्तुं, दुर्लभमित्यवेत्य च। अन्यदा कामपालोऽथ, जगाद होलिकां प्रति ॥३३॥ प्रियेऽधुना धनं नास्ति, तेन धनार्जनाय च। परदेशं प्रगच्छामी-ति श्रुत्वा होलिकाऽवदत् ॥३४॥ हे प्रिय ! कुरु मद्वाक्यं, धनप्राप्तिर्यतो भवेत्। त्वं हि मत्पितुर्हट्टा-न्मूल्येनाऽऽनय शाटिकाम् ॥३५॥ ततस्तेन समानीता, सा ततो होलिकाऽवदत्। इयं न मम योग्याऽस्त्य-परमानय हे प्रिय। ॥३६॥ तेन तत्र पुनर्गत्वा-ऽऽनीताऽपरा च शाटिका। साऽप्ययोग्या तया प्रोक्ता; पश्चाद्दत्ताऽथ शाटिका ॥३७॥ श्रेष्ठी प्राह तदा लातु, स्वयमागत्य ते प्रिया। शाटिकां संपरीक्ष्याऽथ, साऽपि तत्र समागता ॥३८॥ हट्टे समागतां तां च, दृष्ट्वा श्रेष्ठी प्रतिक्षणम्!। पश्यति स्वसुताभ्रान्त्या, किमियं मे सुतेति हि ॥३९॥ कामपालस्तदावादी-त्प्रपश्यन्तं निजां प्रियाम्। श्रेष्ठिनं भो ! मम स्त्रीं त्वं, पश्यसि ? किं मुहुर्मुहुः ॥ ४० ॥ मत्पुत्रीसदृशी चेय-मित्युक्तं श्रेष्ठिना तदा। कामपालोऽवदत् श्रेष्ठिन्!, वह्नौ दग्धा सुता तव ॥४१॥ तत्त्वं न वेत्सि ? किं यद्वा, त्वत्पुत्र्यां मे प्रियाभ्रमः। पूर्वं सूर्यगृहेऽप्याभू-न्मत्पत्न्यां ते सुताभ्रमः ॥४२॥ द्वयोरूपसमत्वेना-ऽत्राऽपरं नास्ति कारणम्। श्रुत्वेति हर्षितः श्रेष्ठी, कामपालं जजल्प तम् ॥४३॥ अद्यप्रभृति ते भार्या, मत्पुत्रीति निगद्य सः। पूरयामास सत्प्रीत्या, तस्यै वस्त्रादिकं सदा ॥४४॥ सा परिव्राजिका दुण्ढा, मृत्वा दुष्टा पिशाचिनी। जाता पूर्वभवं स्मृत्वा, ध्यातमिदं तया क्रुधा ॥ ४५ ॥ नगरवासिनो लोका, दुष्टा मह्यं ददुर्न ये। भिक्षामपि ततो लोक-चूरणाय शिला कृता ॥ ४६ ॥ प्रबलभाग्यसंयुक्तां, प्रतिहन्तुं न



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



होलिकाम् । समर्थाऽजनि लोकास्तां, शिलां दृष्ट्वा पुरोपरि ॥ ४७ ॥ जाता भयद्रुताश्चक्रु-र्बलिं तदा पिशाचिनी । सा कस्यचिच्छरीरे चा-वतीर्योवाच भो जनाः ! ॥ ४८ ॥ युग्मम् ॥ पूर्वं कुलद्वयस्याहं, वत्सला भांड-भारडान् । विहाय मारयिष्यामि, पुरस्थानपरान् जनान् ॥ ४९ ॥ ततो मृत्योर्जना भीताः, सर्वे स्वजीवितस्य च । अन्योपायमनालोक्य, भांडभावं समाश्रिताः ॥ ५० ॥ मुक्तसज्जनमर्यादा, असत्यवाक्यभाषिणः । एवं भांडा जना जाता, दुष्टवाजित्रवादिनः ॥ ५१ ॥ तत्प्रभृति च सर्वत्र, प्रवृत्तं प्रतिवत्सरम् । तद्दिने होलिकापर्व, कर्मबन्धन कारणम् ॥ ५२ ॥ बहिष्कृतं जनैः शिष्टै-रशिष्टैश्च समादृतम् । तदधुनाऽपि कुर्वन्ति, नेष्टवासनया जनाः ॥ ५३ ॥ पुनर्भस्मरजःपंक-मूत्राद्यमेध्यवस्तुभिः । मलिनदेहिनो जाता, ग्रथिला भरडा जनाः ॥ ५४ ॥ प्रतिवर्षं ततो होली-दिनात् द्वितीयवासरे । धूलिसंहरिकापर्व. प्रवृत्तं सा ततो गता ॥ ५५ ॥ कथ्यते होलिकापूर्व-भवोऽथ पाटलीपुरे । ऋषभदत्तनामाऽभूत्, श्रेष्ठी चन्द्रानना प्रिया ॥५६॥ तयोर्द्वौ तनुजौ चैका, देवी नाम्नी सुताऽभवत् । सा च लावण्यरूपादि-गुणैरतीव शोभिता ॥५७॥ पितृभ्यां पाठिताऽथ स्व-मात्रा समं चकार सा । सामायिकादिसत्कृत्यं, व्रत-नियमपालनम् ॥५८ वसन्ति तद्गृहासन्ने, मिथ्यात्विनो जनाः सदा । तत्पुत्रीभिः समं देवी, सा चोत्तिष्ठति तिष्ठति ॥५९॥ वाचयन्ति द्विजा यत्र, कथां तत्र कदापि सा । कथामपि शृणोति स्म, तत्संसर्गवशात्पुनः ॥ ६० ॥ यद्यपि श्राविकाधर्मं, पालयति तथापि सा । मिथ्यात्वस्यादरं चक्रे, मिथ्यात्विजनसंगतः ॥ ६१ ॥ ज्येष्ठे च श्रावणे मासे, गणगोराऽर्चनाद्यथा । सुन्दरवरसंप्राप्ति-र्धनधान्यादिकं भवेत् ॥६२॥ एतादृश्यः कथास्तस्यै, रोचते पुनरेकदा । तयाऽचिन्त्यार्हते धर्मे, देवोऽस्ति वीतरागकः ॥ ६३ ॥ कमपि न करोत्यर्ह-न्स सुन्दरमसुन्दरम् । सांख्यादिदर्शने ब्रह्मा,



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





जगत्कर्त्ताऽस्ति तत्पिता ॥६४॥ जगद्रक्षाकरो विश्णु-स्तत्संहारकरः शिवः। ततो यदीशपार्वत्योः, पूजादिकं विधीयते ॥६५॥ तौ च तुष्टौ तदा स्यातां, पार्वतीशंकरौ मम। मनोवाञ्छितसांसारि-सुखलाभोऽतुलो भवेत् ॥६६॥ ध्यात्वेति गणगौरादि-मिथ्यात्विसत्कपर्वसु। जाताऽऽदरवती साऽथ, पितृभ्यामूचतुः सुताम् ॥६७॥ यत्त्वं हे पुत्रि! मिथ्यात्वि-पर्वादरं च मा कुरु। चिन्तामणिसमार्हत्ये, धर्मे मा कुर्वनादरम् ॥६८॥ इत्यादिबोधिताऽपीयं, प्रतिबुद्धा कदापि न। प्रशंसंति च तां लोका, मिथ्यात्विनो यथा यथा ॥ ६८ ॥ तथा तथा मुमोदेयं, तत्र गाढतराऽभवत्। क्रमान्मातृ-पितृभ्यां, सा यौवने परिणायिता ॥७०॥ अल्पकालेन सा मृत्वा, श्रेष्ठिमनोरथात्मजा। जाता पुनः कथाव्यास-पुत्री ढुण्ढाऽत्र तच्छखी ॥ ७१ ॥ कथावाचकजीवोऽत्र, कामपालोऽभवत्पुनः। मिलिताः पूर्वसंबंधा-त्रयोऽप्येते भवेऽत्र च ॥७२॥ इत्थं वृथैव संजातं, होलिकापर्व धीधनैः। विज्ञाय दूरतस्त्याज्यं, भव्यैः स्वशुभार्थिभिः ॥ ७३ ॥ किन्तु तस्मिन् दिने कार्यं, व्रतजिनार्चनादिकम्। किमपि होलिकासत्कं, कृत्यं कार्यं न कर्हिचित् ॥७४॥ अज्ञो यो होलि-काज्वाला-मध्ये चैकां क्षिपेज्जनः। गुलालमुष्टिकां तस्यो-पवासदशदण्डकम् ॥ ७५ ॥ एकघटप्रमाणस्य, जलस्य क्षेपणे पुनः। उपवासशतप्राय-श्चित्तं ज्ञेयं विशारदैः ॥७६॥ मूत्रप्रक्षेपणे पञ्चा-शदुपवासदण्डकम्। छगणक्षेपणे चोप-वासानां पञ्चविंशतिः ॥७७॥ एका गालिप्रदानेन, पञ्चदशोपवासकाः। असभ्यगीतगानेन, सार्द्धशतोपवासकाः ॥ ७८ ॥ सप्त-तिरुपवासानां, तत्सत्कतूर्यताडने। विंशतिरुपवासाना-मेककरीषक्षेपणे ॥७९॥ छगणहारकक्षेपात्, होलिकाज्वलने पुनः। जन्मान्तरे शतं वारं, स्वभस्मीभवनं भवेत् ॥ ८० ॥ श्रीफलक्षेपणे वार-सहस्रशः भवान्तरे। पूगीफलप्रक्षेपेण, पञ्चाश द्वारकाः पुनः ॥८१॥ पुनर्धूलिप्रक्षेपेण, वारकपञ्चविंशतिः। तद्गर्तखनने वार-शतं भवान्तरे पुनः ॥८२॥ स्याद्भस्मी-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





भवनं काष्ठ-क्षेपे वारसहस्रशः। तद्व्रतकरणे म्लेच्छो-त्पत्तिर्वारसहस्रशः ॥ ८३ ॥ चाण्डालीयकुलोत्पत्ति-स्तद्दाहकरणे पुनः। वारसहस्रशः पर्वा-स्तीदं कर्मनिबन्धनम् ॥ ८४ ॥ विज्ञाय केवलं पापं, श्रेयोऽर्थिभिश्च जन्तुभिः। द्रव्यतो होलिकापर्व, संत्याज्यं दूरत इदम् ॥८५॥ एवमाराध्यते भाव-होलिकापर्व धर्मिभिः। तेनाऽत्र जगतीष्टार्थं, प्राप्यतेऽत्र न संशयः ॥८६॥ अन्याऽपि होलिका जाता, वसंतपुरपत्तने। विप्रकुलोद्भवा रूप-लावण्यगुणशालिनी ॥ ८७ ॥ देवशर्मा पिता यस्या, देवानन्दा प्रसूः पुनः। पञ्च सहोदरा आसन्, सौम्याकाराश्च पण्डिताः ॥८८॥ साऽजनि होलिका बाल-भावतो व्यभिचारिणी। परदेशीयविप्राय, पितृभ्यां सा विवाहिता ॥ ८९ ॥ तत्राऽपि पुंश्चलित्वेन, पत्या निष्कासिता च सा। पितृगृहे समागत्य, स्वप्रवृत्तिं न मुञ्चति ॥९०॥ तदा सा भ्रातृभिः सार्द्धं, पुराब्दहिः कृता द्विजैः। पुराब्दहि गृहं कृत्वा, स्थिता सा भ्रातृभिः समम् ॥९१॥ युवानः सर्ववर्णीयाः, सेवन्ते तत्र तां ततः। लोके राजाज्ञया दग्धा, सगृहभ्रातृहोलिका ॥९२॥ ततो मृत्वा च ते सर्वे, बभूवुर्ब्रह्मराक्षसाः। तैर्मारणादिना पौर-जना उपद्रुता भृशम् ॥९३॥ स्वजीवनार्थिनो लोका, जातास्तेषां प्रजल्पनात्। पूर्ववद्भरडा भाण्डा, ग्रथिलाऽसभ्यवादिनः ॥९४॥ ततः समग्रदेशेषु, होलिपर्व ससर्प तत्। प्रतिपुरं प्रतिग्रामं, प्रतिस्थानं प्रतिस्थलम् ॥ ९५ ॥ लौकिकहोलिका द्रव्य-पर्व विहाय भो! जनाः। लोकोत्तरचतुर्मासि, सत्पर्वाराधयन्तु हि ॥९६॥ खरतरगणाधीशः, श्रीमोहनमुनीश्वरः। तच्छिष्योऽमलचारित्री, श्रीमद्राजमुनीश्वरः ॥९७॥ तच्छिष्याऽऽद्या महाप्राज्ञाः, श्रीजिनरत्नसूरयः। तेषां शिष्यगणिप्रेममुनेः समाग्रहेण च ॥९८॥ संवब्दाणाभ्रशून्याक्षि-वर्षे पौषार्जुने कृता। पाठकलब्धिनाऽष्टम्यां, तिथौ जयपुरे वरे ॥९९॥

॥ इति होलिका-पर्व-कथा समाप्ता ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





# (७) अथ चैत्रीपूर्णिमा-माहात्म्यम् ।

ऋषभस्वामिनं नत्वा, श्रीसिद्धाचलभूषणम् । चैत्रस्य शुक्राकाया, माहात्म्यं लिख्यते मया ॥ १ ॥ सिद्धौ विद्याधराधीशौ, श्रीनमिविनमी मुनी । पुण्डरीकमुनीन्द्रश्च, वालिप्रद्युम्नसांबकाः ॥२॥ भरतशुकसाधू च, सिद्धौ शैलकपन्थकौ । द्राविडो नारदो रामः, पाण्डोः पञ्चसुताः पुनः ॥३॥ एवमनेकशो जग्मुः, सिद्धाचले शिवालयम् । सिद्धाचलमहातीर्थ-मिदं भावान्नमाम्यहम् ॥४॥ अयोध्यायां महापुर्यां, भगवान्नृषभप्रभुः । राज्यं स्वज्येष्ठपुत्राय, प्रददौ भरताय च ॥५॥ अन्येभ्योऽपि स्वपुत्रेभ्यो, वितीर्य विषयान्स्वयम् । दीक्षां गृहीतवान्स्वामी, निस्संगो निष्परिग्रही ॥६॥ श्रीनमिविनमी स्वामी-पुत्रकृतौ तदा गतौ । परदेशे च कस्मैचि-त्कार्याय तौ समागतौ ॥७॥ भरतदत्तराज्यं ता-वगृहीत्वा प्रभोः पुरः । समागत्य स्वराज्याय, याचयामासतुः सदा ॥ ८ ॥ एकदा धरणेन्द्रेणा-गतेन वंदितुं प्रभुम् । दृष्ट्वा भक्तिं च कुर्वन्तौ, प्रसन्नेन प्रजल्पितौ ॥ ९ ॥ भगवानस्ति निःसङ्ग-स्तद्भक्त्याऽहं ददामि वः । राज्यमिति भणित्वा तु, रम्ये वैताढ्यपर्वते ॥ १० ॥ दक्षिणश्रेणिपञ्चाश-न्नगराण्यर्पितानि च । वासयित्वोत्तरश्रेणि-षष्टीवरपुराणि च ॥ ११ ॥ त्रिभिर्विशेषकम् ॥ ताभ्यामिन्द्रो महाविद्याः, षोडश प्रददेऽपराः । सामान्या अष्टचत्वारिं-शत्सहस्रकसंख्यकाः ॥ १२ ॥ तौ च विद्याबलात्तत्र, वासयित्वा जनान् बहून् । प्रपालयामासतू राज्यं, चिरकालं प्रहर्षितौ ॥१३॥ तौ नमिविनमी प्रान्ते, त्यक्त्वा सर्वपरिग्रहम् । दीक्षामादाय सिद्धाद्रौ, समागत्य शिवं गतौ ॥१४॥ ऋषभस्वामिनः पौत्रो, भरतचक्रिणः सुतः ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पुण्डरीकः प्रभोः शिष्य, आदिगणाधिपोऽजनि ॥१५॥ सोऽथ गणधरः सार्द्धं, पञ्चकोटिस्वसाधुभिः पावयन्नगरग्रामान् , सौराष्ट्रविषयं ययौ ॥१६॥ तन्निशम्य नृपा लोकाः, सामंता श्रेष्ठिनः पुनः । नरा नार्यः गुरुं नन्तु-मनेकशः समाययुः ॥१७॥ तेनाऽपि देशनामध्ये, द्विधा धर्मः प्ररूपितः । साधुश्राद्धात्मकः सर्व-सुखसंपत्तिकारकः ॥१८॥ तस्मिन्नवसरे चैका, शोकाद्धाष्पजलार्द्रिका । चिन्तासागरनिमग्ना, दीना नारी समाययौ ॥१९॥ तया सार्द्धं च दौर्भाग्यै-का बालविधवाऽऽययौ । गुरुम्प्रणम्य सा नारी, पप्रच्छ कन्यया समम् ॥२०॥ अनया कन्यया स्वामिन् !, पापं किं प्राग् भवे कृतम् ? । येन पतिर्मृतश्चास्या, विवाहकरमोचने ॥२१॥ गुरुरुवाच भो भद्रे !, जीवैरशुभकर्मणाम् । फलमशुभमेवाऽत्र, परत्र भुज्यते भवे ॥ २२ ॥ तथाहि जम्बूद्वीपस्य, पूर्वमहाविदेहके । आसीज्जनाकुलं रम्यं, चन्द्रकान्तामिधं पुरम् ॥२३॥ तत्र समरसिंहाख्यो, भूपोऽभूत्तस्य धारिणी । प्रिया धनावहश्रेष्ठी, वरश्राद्धोऽवसत्पुनः ॥२४॥ तस्यैका कनकश्रीश्च, मित्रश्रीरपरा प्रिया । अभूत्ताभ्यां समं श्रेष्ठी, स तस्थौ सुखपूर्वकम् ॥२५॥ एकदा कनकश्रीश्च, मित्रश्रीसत्कवारकम् । समुल्लंघ्य ययौ भर्तुः, पार्श्वे पतिस्तदाऽवदत् ॥ २६ ॥ वारकमद्य ते नास्ति, मर्यादा लंघिता कथम् । त्वया सा प्राह मर्यादा, केयं प्राह तदा पतिः ॥२७॥ कुलीनानां सतां मर्या-दोल्लंघनं वरं न हि । संतोषरहिता साऽथ, निराशा स्वगृहं ययौ ॥२८॥ सा सपत्न्या समं द्वेष-मुद्वहंती स्मरार्दिता । पत्या समं वियोगं च, तस्याश्चिन्तयति स्म च ॥२९॥ ततः सा मन्त्रतन्त्रादि-सामग्रीं प्रविधाय च । तत्तनौ शाकिनी भूता-दिप्रवेशमकारयत् ॥३०॥ साऽपि दुष्कर्मयोगेन, पारवश्याऽमवत्तराम् । कनकश्रीर्विलोक्याऽस्याः, कुचेष्टितं जहर्ष सा ॥३१॥ पुनः सा स्ववशीचक्रे, भर्तारं ग्रथिला प्रिया । त्यक्ता तेनाऽपि पूर्वाऽत्र, कर्मफलं विचिन्त्य च ॥३२॥ कनकश्रीस्तदाऽतीव, हर्षिताऽभूत्तया समम् । सुखं श्रेष्ठी च भुंजानः,

For Private and Personal Use Only

कालमगमयत्सुखात् ॥३३॥ कियत्यथ गते काले, कनकश्रीर्मृताऽजनि । तत्र सुता सपत्नीय-पतिवियोगकारिणी ॥३४॥ सपत्नीदुःखदानेन, पतिविरहपीडया । पीडितं विषकन्यात्वं, भोगसुखविवर्जितम् ॥३५॥ उपार्जितं तया कर्म, तेनाऽतिदुःखदुःखिता पतिसुखप्रहीणा ते, सुता स्वकृतकर्मणा ॥३६॥ युग्मम् ॥ तज्जननी तदा प्राह, गुरो ! पतिवियोगतः । दुःखिता वृक्षशाखाया-मियं मर्तुं समुद्यता ॥ ३७ ॥ तावत्तत्र मया गत्वा, छिन्नः पाशश्च कण्ठगः । रुदन्तीयं सुता पूज्य ! समानीता भवत्पुरः ॥३८॥ दीक्षा प्रदीयतामस्यै, तदा गणधरोऽवदत् । एषा तव सुता दीक्षा-योग्या नास्ति हि साम्प्रतम् ॥३९॥ वर्त्तते नितरां बाला-ऽतीव चञ्चलमानसा । सुगुरुवचनं श्रुत्वा, जगाद तत्प्रसूर्गुरो ! ॥ ४० ॥ अस्या योग्यं च धार्मीय-कृत्यं निरूप्यतां यतः । दुष्टकर्मविपाकोऽयं, दूरीभवेत्पुराकृतः ॥ ४१ ॥ गुरुर्ज्ञानबलेनाऽस्या, योग्यं व्रतं जगाद च । हे भद्रे ! चैत्रशुक्लस्य, पूर्णिमाऽऽराधनं कुरु ॥ ४२ ॥ तस्या आराधनेऽस्याः प्राक्-कर्मनाशो भविष्यति । निशम्येति समुत्पन्ना, रुचिस्तस्या अपि व्रते ॥४३॥ तदा सा सावधाना च, शुश्राव सुगुरोर्वचः । गुरुस्तदाऽवदत्सिद्धा-ऽचलतीर्थं च शाश्वतम् ॥४४॥ अनंतानंतकालेन, तत्र चानन्तजंतवः । क्षपयित्वाऽष्टकर्माणि, कृतकृत्याः शिवं ययुः ॥४५॥ पुनरागामिकालेऽपि, स्पर्शयित्वा शुभाशयात् । अनन्तजन्तवस्तत्र, गमिष्यन्ति शिवालयम् ॥ ४६ ॥ मुख्यं सकलतीर्थेषु, सिद्धाद्रितीर्थमस्ति हि । यद्दर्शननमस्कारो-ऽस्ति सर्वाघविनाशकः ॥४७॥ ये भावचक्षुषा जीवाः, पश्यन्ति विमलाचलम् । तिर्यंचो मनुजा वाऽपि, प्रयान्ति सद्गतिं खलु ॥४८॥ एकविंशतिनामानि, सन्ति सिद्धगिरेर्जनैः । विधेयं हृदि तद्ध्यानं, सकलाघविनाशकम् ॥४९॥ चैत्रस्य शुक्राकायां, सर्वपर्वोत्तमे दिने । निरीहशुद्धभावेन, विधेयमुपवासकम् ॥ ५० ॥ तत्र जिनालये स्नात्र-पूजा महोत्सवादिकम् । कार्यं सर्वजिनेन्द्राणां, यथाशक्ति प्रपूजनम्



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





॥५१॥ चैत्रस्य शुक्लराकाया, माहात्म्यं सुगुरोर्मुखात् । श्रोतव्यं सावधानेन, प्रत्याख्यानादिपूर्वकम् ॥५२॥ तद्दिनं सफली-कार्यं, धार्मीयशुभकर्मणा । दीनहीनजनादिभ्यो, दानं देयं विशेषतः ॥५३॥ शीलं प्रपालनीयं च, विधेयं जीवरक्षणम् । धर्त्तव्या शम-संवेग-निर्वेदादिगुणाः पुनः ॥ ५४ ॥ सिद्धाचलं पटं श्रेष्ठं, संस्थाप्य विधिपूर्वकम् । उच्चैः स्थानेऽर्चनं कार्य-मक्षताद्यष्टवस्तुभिः ॥५५॥ पञ्चशक्रस्तवैर्देवान् , वंदित्वा गुरुसाक्षिकम् । दिवसरात्रिकृत्यानि, विधेयानि स्थिराशयात् ॥५६॥ पुनः पारणवेलायां, दानं वितीर्य साधवे । विधेयं पारणं भव्यैः, परमपदकांक्षिभिः ॥५७॥ यावत्पञ्चदशाब्दानि, विधेया प्रतिवत्सरम् । व्रतस्याराधना प्रोक्त-विधिना सूपयोगतः ॥ ५८ ॥ पश्चादुद्यापनं कार्यं, तेन स्यान्निर्धनो धनी । पुत्रकलत्रसौभाग्य-कीर्त्तिर्देवसुखं शिवम् ॥५९॥ स्त्रीणां पतिवियोगो न, रोगः शोकश्च नश्यति । पुनर्वैधव्यदौर्भाग्य-मृतवत्सादिकाऽशुभम् ॥६०॥ अस्या आराधनेन स्या-त्स्त्री पतिवल्लभा पुनः । नश्यति विषकन्यात्वं, भूतः प्रेतश्च शाकिनी ॥६१॥ ग्रहादिकं महाकष्टं, नश्यति तत्प्रभावतः । पारवश्यादिकं नेष्ट-कर्मफलादिकं पुनः ॥६२॥ किंबहुना ? सुभावेन, सम्य-गाराधिता भवेत् । चैत्रीयपूर्णिमाऽऽत्मीया-ऽक्षयसुखप्रदायिनी ॥६३॥ गणधरमुखादेवं, श्रुत्वा बाला जहर्ष सा । गुरून्प्रणम्य सा प्राह, करिष्येऽहमिदं व्रतम् ॥६४॥ पुण्डरीकगणेशोऽथ, विहृत्य मुनिभिः समम् । प्रतिबोध्य बहून् जीवान् , क्रमा-त्सिद्धाचलं ययौ ॥६५॥ स्वात्मध्यानरतैस्तत्र, पञ्चकोटिमुमुक्षुभिः । चैत्रस्य शुक्लराकायां, विधायाऽनशनं पुनः ॥६६॥ एकाग्रस्वात्मिकाभेद-ध्यानाज्ज्ञानं च केवलम् । समुपार्ज्याष्टकर्माणि, क्षपयित्वा शिवं ययौ ॥६७॥ युग्मम् ॥ ततो मात्रा समं बाला, सा चैत्रीपूर्णिमाव्रतम् । चकार विधिना जाता, सुखिनी तत्प्रभावतः ॥६८॥ वैषयिकविकारस्य, शान्तिस्तस्या-स्तदाऽभवत् । कृत्वा धर्मे मनः सा त-च्चकार प्रतिवत्सरम् ॥६९॥ व्रते पूर्णे तयाऽकारि, व्रतस्योद्यापनं पुनः । यात्रा-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सिद्धगिरेर्ध्यानं, पुण्डरीकगणेशितुः ॥ ७० ॥ ऋषभप्रभुजापेन, परमेष्ठिनमस्कृतेः । प्रान्ते मृत्वा च सा स्वर्गे, प्रथमेऽभूत्सुरोत्तमः ॥७१॥ तत्र देवसुखं भुक्त्वा, सोऽथ च्युत्वा विदेहके । सुकच्छविजये रम्ये, वसन्तपुरपत्तने ॥७२॥ ताराचन्द्राभिधश्रेष्ठी, भार्या तारा सुतोऽजनि । पूर्णचन्द्राभिधानेन, द्वासप्ततिकलायुतः ॥७३॥ युग्मम् ॥ स पञ्चदशकोटीयद्रव्यं पञ्चदश प्रियाः । पञ्चदश सुता इत्या-दिसुखालिङ्गितोऽभवत् ॥७४॥ तद्भवे स पुनश्चैत्रपूर्णिमाऽऽराधनं व्यधात् । प्रान्ते दीक्षां ललौ पार्श्वे, जयसमुद्रसद्गुरोः ॥७५॥ तत्र च स तपः शुक्ल-ध्यानाग्निप्रबलान्मुनिः । निर्दह्य कर्मकाष्ठानि, क्रमान्मोक्षपदं ययौ ॥७६॥ एवं घना जनाश्चैत्र-राकाव्रतविधानतः । संप्राप्ता परमानन्दं, स्वात्मरूपं हि शाश्वतम् ॥७७॥ पुनरपि शिवं प्राप्तो, वालिनामा महामुनिः । श्रीविमलाचले शांब-प्रद्युम्नौ च शिवं गतौ ॥ ७८ ॥ दशरथसुतस्तत्र, भरतोऽपि शिवं ययौ । पंथकः शैलकाचार्यः, शुकनामा मुनिः पुनः ॥७९॥ चक्रभृद्भरतो रामो, द्राविडो नारदादयः । अनेके मुनयोऽत्रैव, सिद्धाचले शिवं ययुः ॥८०॥ पाण्डवप्रमुखास्तत्र, सत्पुरुषाः शिवं ययुः । तद्भावभाविता जीवाः, स्वर्गादिसद्गतिं पुनः ॥८१॥ चैत्रराकादिने कृत्वो-पवासं विमलाचले । गत्वा कुर्वन्ति ये यात्रा-पूजाध्यानजपादिकम् ॥८२॥ ते विच्छेदं प्रकुर्वन्ति, तिर्यङ्नरकदुर्गतेः । सुमानुष्यसुदेवत्व-गतेरुद्घाटनं पुनः ॥८३॥ इत्यादिपर्वणश्चारा-धनस्वरूपमागमे । प्रवरपुरुषैः प्रोक्तं, भव्यजीवहिताय च ॥८४॥ तद्दिने श्रीगुरोः पार्श्वा-न्मंत्राक्षरपवित्रितम् । स्नात्रजलं गृहीत्वा च, सिंचनीयं स्वसद्मनि ॥८५॥ तेन मार्यादिभीतिश्च, यात्यानन्दो भवेद्गृहे । ऋद्धिवृद्धिः सुखं सर्व-सम्पत्तिश्च शिवं पुनः ॥८६॥ अस्मिन् पर्वणि चायाते, दानादिकं चतुर्विधम् । धर्मकृत्यं सदा कार्यं, नरैर्धर्मपरायणैः ॥ ८७ ॥ खरतरगणाधीशः, श्रीमोहनमुनीश्वरः । श्रीमज्जिनयशःसूरि-स्तच्छिष्यः प्रथमोऽजनि ॥ ८८ ॥ द्वितीयशिष्यशुद्धात्म-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राजमुनिमुनिः पुनः । तत्सुशिष्या महाप्राज्ञाः, श्रीजिनरत्नसूरयः ॥ ८९ ॥ तेषां शिष्यगणिप्रेम-मुनेः समाग्रहात्कृता । पाठकलब्धिना चैत्र-शुक्लस्य पूर्णिमा कथा ॥ ९० ॥ अजयमेरुदुर्गे च, पञ्चम्यां फाल्गुनार्जुने । संवद्बाणखशून्याक्षि (२००५)-वत्सरे रचिता कथा ॥ ९१ ॥

## ॥ इति चैत्रीपूर्णिमा-माहात्म्य-कथा समाप्ता ॥

## (८) अथ अक्षयतृतीया-पर्व-कथा ॥

ऋषभस्वामिनं देवा-धिदेवं प्रणिपत्य च । मयाऽक्षयतृतीयाया, माहात्म्यं कथ्यते खलु ॥१॥ "उसभस्स य पारणए, इक्खुरसो आसि लोगनाहस्स । सेसाणं परमन्नं, अमियरससरिसोवमं आसी ॥२॥" ऋषभेशोऽथ सर्वार्थ-सिद्धनाम-विमानतः । च्युत्वा चाषाढकृष्णस्य, चतुर्थ्यां प्रवरक्षणे ॥३॥ कुक्षौ श्रीमरुदेवाया, अवातरत्ततः प्रभुः । चैत्रकृष्णाष्टमी-रात्रौ, जातो भव्यहितावहः ॥४॥ विंशतिलक्षपूर्वाब्दं, कुमारभावसंस्थितः । त्रिषष्टिलक्षपूर्वाब्दं, राज्यमध्येऽवसत्प्रभुः ॥५॥ चैत्रकृष्णाऽष्टमी घस्रे, दीक्षां ललौ प्रभुस्तदा । गजपुरे सुतो बाहु-बलेः सोमयशा नृपः ॥६॥ श्रेयांसाख्यसुतस्तस्या-ऽथ यावदेकवत्सरम् । पूर्वकर्मोदयात्स्वामी, निराहारतया स्थितः ॥७॥ भूतले विहरन्स्वाम्ये-कदा गजपुरे ययौ । श्रेयांसश्रेष्ठि-भूमीशाः, स्वप्नांश्च ददृशुस्तदा ॥८॥ श्यामीभूतो नगो मेरुः, प्रक्षालितोऽमृतै रसैः । मयाऽतीवोज्ज्वलः सोऽभूत्,



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





श्रेयांसः स्वप्नमैक्षत ॥९॥ श्रेयांसेन रवेर्बिम्बा-त्पतन्तः किरणाः पुनः। स्थापिता नगरश्रेष्ठी, सुबुद्धिः स्वप्नमैक्षत ॥१०॥ एकः श्रेयांससाहाय्यात्, शूरो हि शत्रुरोधितः। जितकाश्यभवच्चेति, दृष्टः स्वप्नो नृपेण तु ॥११॥ प्रभाते ते त्रयो जग्मुः, सभायां जगदुर्मुदा। स्वस्वस्वप्नाँस्तदा सर्वे, विचार्य जगदुर्जनाः ॥१२॥ श्रेयांसस्य महालाभो, भविष्यत्यधुनेत्यथ। भिक्षार्थं भगवांस्तत्र, भ्रमति च गृहे गृहे ॥१३॥ क्रमात् श्रेयांसगेहेऽगा-त्प्रभुस्तत्सुकृतोदयात्। श्रेयांसो हर्षितो जातो, विलोक्य स्वामिनं तदा ॥१४॥ तस्मिन्काले जनाः साधु-मुद्रानालोकनान्न हि। अन्नपानीयदानादि-विधिं जानन्ति कुत्रचित् ॥ १५ ॥ तेन जना मणीन् रत्नान्, सुवर्णरजतं गजान्। अश्वान् कन्यादिवस्तूनि, निमंत्रयंति नित्यशः ॥ १६ ॥ तन्मध्याद्वस्त्वगृह्णन्तं, भगवन्तं विलोक्य च। प्रोचुर्मिथो जनाः स्वामी, नः किञ्चिदपि लाति न ॥ १७ ॥ इत्यूचानाः प्रभोः पृष्ठे, भ्रमन्ति परितो जनाः। पश्चात्तापं प्रकुर्वन्ति, परस्परं वदन्ति च ॥१८॥ जनकोलाहलं श्रुत्वा, भ्रमन्तं स्वामिनं पुनः। श्रेयांसस्य विलोक्याऽभू-त्पूर्वभवाखिला स्मृतिः ॥१९॥ ज्ञाताऽष्टभववृत्तान्तः, प्रभुणा हि समं ततः। विवेद प्राग्भवे साधु-त्वपालनादिकां क्रियाम् ॥२०॥ ततः स विधिना नत्वा, प्रासुकेक्षुरसेन च। गृहागतेन तीर्थेशं, तं प्रत्यलाभयन्मुदा ॥२१॥ भगवताऽपि विज्ञाय, निर्दोषप्रासुकेन च। इक्षुरसेन वार्षीय-तपसः पारणं कृतम् ॥२२॥ राधशुक्लतृतीयायां, स्वामिना पारणं कृतम्। तेन दानेन संप्राप्तं, श्रेयांसेनाक्षयं सुखम् ॥२३॥ एतस्यां ह्यव-सर्पिण्या-माद्यदानप्रवर्त्तितः। धाम्यक्षियतृतीयाख्य-पर्वेदं प्रथितं जने ॥२४॥ तत्पारणक्षणे कृत्वा, पञ्चदिव्यानि निर्जरैः। श्रेयांसस्य गृहं रत्न-सुवर्णादिधनैर्भृतम् ॥२५॥ उक्तञ्च—" घुट्ठं च अहोदाणं, दिव्वाणि य आहयाणि तूराणि। देवावि सन्निवाइया, वसुहारा चेव वुट्ठी य ॥२६॥ भवणं धणेण भुवणं, जसेण भयवं रसेण पडिहत्थो। अप्पा निरुवमसुहं,

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सुपत्तदाणं महग्घवियं ॥२७॥ रिसहेससमं पत्तं, निरवज्जं इक्खुरससमं दाणं। सेयंससमो भावो, हविज्ज जइ मग्गिअं हुज्जा ॥२८॥" ततः श्रेयांसतो जातं, प्रभोः पारणकं शुभम्। लोकैर्ज्ञातश्च सर्वत्रा-हारदानादिको विधिः ॥२९॥ वर्षं यावत्प्रभोः पूर्व-बद्धकर्मोदयागतात्। आहारो मिलितो नैव, तत्कारणं निगद्यते ॥३०॥ कस्मिँश्चित्प्राग्भवे स्वामि-जीवो मनुष्यतां गतः। तत्रैकदा च कार्याय, ग्रामान्तरं ययौ स च ॥३१॥ अध्वनि गच्छता तेन, वृषभान् भ्रमतः खले। भक्षयतश्च धान्यानि, कुट्टयन्कर्षकोऽकथि ॥३२॥ भो! वृषभमुखे छिक्कीं, बध्नासि? त्वं कथं नहि। उक्तं तेनाऽथ जानामि, छिक्कीं कर्तुमहं नहि ॥३३॥ ततश्छिक्कीं विधायैकां, तदुपदेशोऽर्पितस्तदा। श्रुत्वाऽमोचि निःश्वास-चतुःशतं वृषैस्तदा ॥ ३४ ॥ कर्मणि ह्युदिते तस्मिन्, भवेऽत्रादिजिनेश्वरः। वर्षं यावन्निराहार-त्वेनादीनमनाः स्थितः ॥३५॥ तस्मिँश्च कर्मणि क्षीणे, चेक्षुरसेन पारणम्। स्वामिना शुद्धमानेन, चक्रे श्रेयांससद्मनि ॥३६॥ एकसहस्रवर्षाणि, छद्मस्थत्वे विहृत्य च। तपसा हतवान्स्वामी, घातिकर्मचतुष्टयम् ॥३७॥ जातं फाल्गुनकृष्णैका-दश्यां श्रीऋषभप्रभोः। वराऽनुत्तरसंपूर्णं, केवलज्ञानदर्शनम् ॥ ३८ ॥ श्रीचतुर्विधसङ्घस्य, स्थापना प्रभुणा कृता। विहृत्य भूतले भव्य-जीवा धर्मे नियोजिताः ॥३९॥ माघकृष्णत्रयोदश्यां, निर्वाणं गतवान्प्रभुः। तृतीयकारकमान्ते-ऽष्टापदाभिधपर्वते ॥४०॥ प्रार-भ्यते च वर्षीय-तप इदं शिवप्रदम्। चैत्रकृष्णाऽष्टमीस्वामि-दीक्षाकल्याणकदिनात् ॥ ४१ ॥ समाप्यते च वैशाख-शुक्लाऽक्षयतृतीयके। वासरे तत्तपश्चेक्षु-रसपारणपूर्वकम् ॥४२॥ एकान्तरोपवासानि, चास्मिंस्तपस्यखण्डितम्। निरन्तरं विधीयन्ते, मोक्षाभिलाषिजन्तुभिः ॥४३॥ इदं वर्षितपः पूर्णं, द्विवारकरणाद्भवेत्। वर्षितपोद्वये चोप-वासचतुःशतं भवेत् ॥४४॥ दीक्षादिनात्समारभ्य, यावत्पारणवासरे। अभवदुपवासानां, चतुःशतं जिनेशितुः ॥ ४५ ॥ अत्रैतदुपवासानां,



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पूर्त्तिर्विधानतो भवेत्। एकं वर्षितपो भव्यं, सर्वसंपत्तिकारकम् ॥ ४६ ॥ खरतरगणोत्तंस-श्रीमोहनमुनीश्वरः। तत्प्रशिष्या महाप्राज्ञाः, श्रीजिनरत्नसूरयः ॥ ४७ ॥ तच्छिष्यगणिप्रेम-मुनेः समाग्रहान्मया। कृताऽक्षयतृतीयायाः, कथा पाठकलब्धिना ॥ ४८ ॥ संबद्बाणखशून्याक्षि (२००५)-वत्सरे फाल्गुनार्जुने। प्रतिपदि समाप्तिं सा, नीता चाजयमेरुके ॥ ४९ ॥

## ॥ इति अक्षयतृतीया--कथा समाप्ता ॥

## (९) अथ रोहिणी-पर्व-कथा।

वासुपूज्यं जिनाधीशं, नमस्कृत्य प्रकीर्त्यते। रोहिणीव्रतमाहात्म्यं, सरोहिणीकथानकम् ॥१॥ इहैव भरतक्षेत्रे, चम्पा नाम महापुरी। अस्ति द्वादशस्यार्हतो, जन्मादिभिः पवित्रिता ॥२॥ तस्यां श्रीवासुपूज्यार्ह-त्तनुजो मघवाभिधः। भूपतिर्मघवेवाऽभू-द्राजतेजोविराजितः ॥३॥ तस्य लक्ष्मवती राज्ञी, शीलादिगुणशालिनी। सदाचारवती शिष्टा, सती पतिव्रताऽभवत् ॥४॥ तस्याः कुक्षिसमुद्भूता, अष्टौ सुताश्च भूपतेः। बभूवुस्तदुपर्येका, रोहिण्याख्या सुता पुनः ॥५॥ चतुःषष्ठिकलापूर्णा, रूपलावण्यसंयुता। सौभाग्यादिगुणैर्युक्ता, सा क्रमाद्यौवनं गता ॥६॥ नृपोऽथ वरयोग्यां तां, विज्ञाय रोहिणीसुताम्। प्रवरं कारयामास, तत्स्वयंवरमण्डपम् ॥ ७ ॥ देशे देशे नरान् प्रेष्य, प्रधानान् बहुमानतः। नृपेणाकारिता भूपा, राजपुत्राश्च भूरिशः ॥८॥ तेऽपि स्वस्वविभूत्याऽथ, समागता नृपादयः। तन्मण्डपस्थिते सिंहा-सने पृथक् पृथक्



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





स्थिताः ॥ ९ ॥ अथ सा रोहिणी कृत्वा, स्नानविलेपनादिकम् । श्वेतवस्त्राणि रत्नानि-भूषणादि विधृत्य च ॥ १० ॥ स्थित्वा सुखासने स्वीय-परिवारान्विता ययौ । राजराजसुताकीर्णे, स्वयंवरस्य मण्डपे ॥११॥ रोहिणीपुरतश्चैका, चलन्ती प्रतिहारिणी । वर्णयामास राजादि-वंशावलिं विशेषतः ॥ १२ ॥ नागपुरप्रभोर्वीत-शोकनृपसुतस्य सा । अशोकाख्य-कुमारस्य, कण्ठे चिक्षेप मालिकाम् ॥ १३ ॥ तदा सर्वे जना हृष्टा-स्तस्मै नृपेण रोहिणीम् । स्वपुत्रीं परिणाय्योच्चैः, सर्वे नृपा विसर्जिताः ॥ १४ ॥ अशोकाख्यकुमारोऽपि, राजदत्तधनादिकम् । लात्वा स्वप्रियया सार्द्धं, रोहिण्या स्वपुरं ययौ ॥१५॥ पुरे प्रवेशितः पित्रा, सवधूको महोत्सवात् । पुत्रोऽथ स तया सार्द्धं, तत्र सुखेन तिष्ठति ॥१६॥ अथान्यदा नृपो दत्त्वा, स्वराज्यं निजसूनवे । अशोकाय स्वयं दीक्षां, सद्गुरुसन्निधौ ललौ ॥१७॥ अथाशोकनृपस्यासन्, राज्यं पालयतः सुताः । अष्टौ च रौहिणीकुक्षि-जाताश्चतुः सुताः पुनः ॥१८॥ अथैकदा नृपः सार्द्धं, रोहिण्या सप्तमी-भुवि । गवाक्षे लोकपालाष्ट-मसुतयुक् च दीव्यति ॥१९॥ तस्मिन् क्षणे पुरे कस्या-श्चित्स्त्रियास्तनुजो मृतः । सा रुदन्ती ययौ मार्गे, ताडयन्ती स्ववक्षसम् ॥ २० ॥ तां दृष्ट्वा रोहिणी प्राहा-ऽयं स्वामिन् ! कोऽस्ति ? नाटकः । मया पूर्वं कदाऽप्येवं-विधो दृष्टो न नाटकः ॥२१॥ राजा प्राहाऽजनि ? त्वं किं, ग्रथिला गर्वतोऽथ सा । प्राह प्राणेश ! मानं न, करोम्यहं कदाचन ॥२२॥ इदं दृष्ट्वा ममाश्चर्यं, जायते निजचेतसि । राजोचेऽस्या मृतः पुत्र-स्तेनेयं रुदति प्रिये ! ॥२३॥ रोहिणी प्राह भो स्वामिन् !, कुत्रानया च शिक्षितम् ? । रोदनं भूपतिः प्राह, तत्तव शिक्षयाम्यहम् ॥२४॥ इत्युक्त्वा रोहिणीपार्श्वा-ल्लोकपालसुतं नृपः । गृहीत्वापातयद् भूमौ, तदा हा हा ! ! रवोऽभवत् ॥२५॥ नृपादयोऽखिला लोका-श्चक्रुर्दुःखं च रोदनम् । परन्तु रोहिणी नैव, चकार दुःखरोदनम् ॥ २६ ॥ प्रत्युत प्राह सा जातो-ऽपरोऽयं



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





नाटकस्ततः। शासनदेवता धृत्वा-ऽस्थापयत्तं सुखासने ॥ २७ ॥ तदा राजादयश्चक्रु-र्महाश्लाघां चमत्कृताः। रोहिण्याः पुण्यशालिन्या, लोकपालसुतस्य च ॥२८॥ एकदाऽथ पुरोद्याने, वासुपूज्यजिनेशितुः। शिष्यौ समागतौ रूप-कुम्भक-स्वर्णकुम्भकौ ॥२९॥ मुनियुग्मं समायात-मत्र निशम्य भूपतिः। नंतुं तत्र ययौ नत्वा, यथास्थानमुपाविशत् ॥३०॥ मुनिना देशना दत्ता, देशनान्ते नृपोऽवदत्। गुरो! पूर्वभवेऽकारि ?, रोहिण्या किं तपःक्रिया ॥३१॥ येनषा दुःख-वार्त्तां न, जानात्यस्याः सुताष्टकम्। पुत्रीचतुष्टयं मेऽस्या-मतिस्नेहश्च वर्त्तते ॥३२॥ ततो गुरो! कृपां कृत्वै-तत्प्राग्भवो निरूप्यताम्। गुरुः प्राहाऽथ हे राजन्!, पुण्यपापफलं शृणु ॥ ३३ ॥ अस्मिन्नेव पुरे श्रेष्ठी, धर्ममित्राऽभिधोऽवसत्। धनमित्रा प्रिया तस्या-ऽभवत् सती पतिव्रता ॥३४॥ दुर्गन्धाख्या सुतैकाऽभू-त्कुरूपा दुर्भगा तयोः। तां च विलोक्य कोऽप्यस्याः, पाणिग्रहं करोति न ॥३५॥ तस्याः पित्रा तदा कश्चि-च्चौरो वधाय भूपतेः। पुरुषैर्नीयमानश्च, गृहीतो भूपपार्श्वतः ॥३६॥ तस्मै विवाहिता पित्रा, स्वसुता सोऽपि तां निशि। त्यक्त्वा पलायितः श्रेष्ठी, रुदन्तीं तां तदा-ऽवदत् ॥३७॥ हे पुत्रि! प्राणिनः सर्वे, पूर्वविहितकर्मणाम्। उदयेनाऽत्र भुञ्जन्ते, सुखदुःखपरम्पराम् ॥ ३८ ॥ ततस्त्वं देहि दानानि, सुकृतं कुरु भावतः। धर्मकृत्यानि दुःखानि, येन ते यान्ति नष्टताम् ॥ ३९ ॥ दुर्गन्धाऽथ पितुर्वाचं, निशम्य धर्मकर्मसु। सावधानाऽभवद्भावि-शुभोदयाद्विशेषतः ॥ ४० ॥ अन्यदात्र गुरुर्ज्ञानी, समागतोऽथ वंदितुम्। धर्ममित्रो ययौ श्रेष्ठी, ननाम सुगुरुं मुदा ॥४१॥ देशनाऽन्तेऽवदत् श्रेष्ठी, धर्ममित्रो गुरो! मम। पुत्र्या दुर्गन्धया पूर्व-भवे किं दुष्कृतं कृतम् ? ॥४२॥ येन नेच्छति कोऽप्यत्र, तां ततः प्राह सद्गुरुः। गिरनारपुरे राजा, पृथ्वी-पालाभिधोऽभवत् ॥४३॥ सिद्धिमती प्रिया तस्य, स च भूपतिरेकदा। सिद्धिमतीप्रियायुक्तः, क्रीडार्थं कानने गतः



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





॥४४॥ एको मुनिः क्षणे तस्मिन्, गुणसागरसंज्ञकः। भिक्षार्थमाययौ तत्र, मासक्षपणपारणे ॥४५॥ भूपतिः स्वप्रियां प्राह-ऽस्मै दानं देहि साधवे। अयं जङ्गमसत्तीर्थ-पुण्यपात्रं च विद्यते ॥ ४६ ॥ उक्तं च—"साधूनां दर्शनं पुण्यं, तीर्थभूता हि साधवः। तीर्थं फलति कालेन, सद्यः साधुसमागमः ॥ ४७ ॥" सा नृपवचसा राज्ञी, क्रीडान्तराय-मानिनी। जानाना द्वेषतस्तस्मै, ददौ कटुकतुम्बकम् ॥४८॥ कटुतुम्बकशाकेन, तेन च पारणं कृतम्। तद्भक्षणान्मु-निर्मृत्वा, स्वर्गं ययौ समाधिना ॥ ४९ ॥ तन्निशम्य नृपेणैषा, राज्ञी निष्कासिता स्वकात्। देशात्सा सप्तमे घस्रे, कुष्ठरोगार्दिताऽभवत् ॥५०॥ निन्द्यमाना जनैर्मृत्वा, सा षष्ठं नरकं ययौ। तत उद्धृत्य तिर्यक्षु, भ्रान्त्वाऽधः सप्तमीं ययौ ॥५१॥ ततः सा सर्पिणी चोष्ट्री, शृगाली सूकरी पुनः। कुर्कुटी मूषिका ज्ञेया, जलौका गृहकोकिला ॥५२॥ कन्वी शुनी च मार्जारी, रासभी गौः क्रमादभूत्। वह्निशस्त्रादिघातेन, भवेष्वेषु मृता पुनः ॥५३॥ गोभवे मरणा-सन्ने, काले तस्यै नमस्कृतिः। श्राविता मुनिना साऽपि, श्रुत्वा तामनुमोदयत् ॥५४॥ ततो मृत्वाऽभवत् श्रेष्ठिन्!, दुर्गंधा दुर्भगा तव। सुतेयं स्वभवा ज्ञाता, जातिस्मृत्या तयाऽपि हि ॥५५॥ ततः सा सुगुरूनत्वा, पप्रच्छ हे गुरो! मम। इदं दुःखं कथं याति?, विलयं तत्प्रकाश्यताम् ॥ ५६ ॥ तदा प्राह मुनिर्भद्रे!, त्वं रोहिणीतपः कुरु। सा प्राह विधिना केन, तत्तपो विदधाम्यहम् ॥५७॥ मुनिर्जगाद रोहिण्यां, नक्षत्रे तत्तपः कुरु। सप्तवत्सरपर्यन्तो-पवासस्य कृतेन च ॥५८॥ तस्मिन् दिने पुनः पूजा, वासुपूज्यजिनेशितुः। विधेया शुभभावेन, यथाशक्ति सुविस्तरात् ॥५९॥ तपःपूर्णे पुनः कार्य-मुद्यापनं ततस्तव। यास्यंति सर्वदुःखानि, सुगन्धभूपतेरिव ॥६०॥ तन्निशम्याह दुर्गन्धा, स्वामिन् सुगन्धभूपतिः। कः? कथ्यतां कथा तस्य, तस्यै प्राह मुनिस्तदा ॥६१॥ सिंहपुराभिधे दुर्गे, सिंहसेननृपोऽभवत्। कनकादिप्रभा



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





राज्ञी, दुर्गन्धाख्यः सुतस्तयोः ॥६२॥ स क्रमाद्यौवनं प्राप्तः, सोऽनिष्टो दुर्भगः पुनः । तत्रैकदा समायातः, पद्मप्रभजिने-
श्वरः ॥६३॥ कुमारोऽपि समागत्य, नत्वा स्तुत्वा जिनेश्वरम् । दुर्गन्धकारणं पृष्टं, तदा प्राह जिनेश्वरः ॥६४॥ नागपुरपुरा-
दस्ति. द्वादशक्रोशदूरतः । नीलाभिधो नगस्तत्र, शिलाऽस्त्येका मनोहरा ॥६५॥ तपस्यति मुनिस्तत्र, मासक्षपणकारकः ।
तत्प्रभावान्मृगादींश्च, घातयति न हिंसकः ॥६६॥ तत्रैको लुब्धकः साधा-वीर्षां करोत्यथैकदा । गौचर्यार्थं मुनौ याते,
मासक्षपणपारणे ॥६७॥ पश्चात्तेन शिलाऽधोऽग्नि-र्ज्वालितस्तत उष्णिका । साऽभूद्ग्रामे मुनिः कृत्वा, पारणं तत्र चागतः
॥६८॥ तस्यामेव शिलायां च, संस्थेयमित्यभिग्रही । अग्नितापेन संतप्तां, शिलां ज्ञात्वाऽपि संस्थितः ॥६९॥ स लुब्धको
मुनेर्घातात् , कुष्ठरोगादिपीडितः । अनुभूय महादुःखं, सप्तमं नरकं ययौ ॥ ७० ॥ उक्तं च—"ऋषिहत्याकरा जीवा,
दुःखं भुञ्जन्ति भूतले । संसारसागरे घोरे, पीड्यन्ते च पुनः पुनः ॥७१॥" तत उद्धृत्य संभूय, मत्स्यो गोपालकोऽ-
भवत् । दारिद्र्यपीडितस्तेन, नमस्कारश्च शिक्षितः ॥७२॥ ततो दावाग्निना दग्धो, नमस्कारप्रभावतः । मृत्वा त्वमभव-
द्राज-पुत्रो दुर्गन्धनामकः ॥७३॥ ततो जातिस्मृतिज्ञानाद्, दृष्ट्वा पूर्वभवं निजम् । स प्रभुं प्राह मुक्तोऽहं, भविष्याम्यघतः
कथम् ? ॥७४॥ प्रभुः प्राह कुरुष्व त्वं, रोहिण्याख्यस्तपस्ततः । मुक्तः पापात्सुगंधीश्च, सुखयुक्तो भविष्यसि ॥ ७५ ॥
प्रभोर्मुखान्निशम्यैत-त्तेनाथ तत्तपः कृतम् । तत्प्रभावात्सुगंधोऽभू-त्स कुमारो गतामयः ॥ ७६ ॥ तद्वृत्तान्तं निशम्यैषा,
दुर्गन्धा रोहिणीतपः । गुरूक्तविधिना कृत्वा, सुगंधा सुभगाऽभवत् ॥ ७७ ॥ ततो मृत्वा सुगंधा सा, देवी सुरालयेऽ-
भवत् । ततश्च्युत्वाऽथ राजंस्ते, रोहिणीयं प्रियाऽभवत् ॥ ७८ ॥ पूर्वतपःप्रभावेणा-जन्मादुदुःखादि वेत्ति न । इयमस्यां
तत्राऽतीव, स्नेहस्य कारणं शृणु ॥७९॥ सिंहसेनाख्यभूमीशः, स्वराज्यं निजसूनवे । सुगंधाय वितीर्यालात् । प्रव्रज्यां



For Private and Personal Use Only

गुरुसन्निधौ ॥८०॥ अथ सुगन्धभूपोऽपि, धर्ममाराध्य निर्मलम् । मृत्वा समाधिना जातः, सुरोत्तमः सुरालये ॥ ८१ ॥ ततश्च्युत्वा जम्बूद्वीपे, पूर्वमहाविदेहके । विजये पुष्कलावत्यां, नगरी पुण्डरिकिणी ॥८२॥ विमलकीर्तिभूमीश-सुभद्रा-तनुजोऽभवत् । तत्रार्ककीर्तिचक्रीशो, नृपश्रेणिविराजितः ॥८३॥ युग्मम् ॥ राज्यं कृत्वा ललौ पार्श्वे, जितशत्रुमुनेः स च । दीक्षां सद्व्रतमाराध्य, प्रान्ते मृत्वा समाधिना ॥८४॥ अच्युतेन्द्रोऽभवत् स्वर्गे, द्वादशे निर्जरोत्तमः । ततश्च्युत्वाऽभवद्राजं-स्त्वमशोकाख्यभूपतिः ॥८५॥ युग्मम् ॥ पतिरस्याश्च रोहिण्या, जातस्त्वमतिवल्लभः । मिथः स्नेहोऽस्ति दम्पत्योः, समानतपसोः पुनः ॥८६॥ राजन् ! पुत्राधिकारोऽथ, यथा राजपुरेऽभवत् । अग्निशर्मा दरिद्रार्त्त-स्तस्य च सप्त सूनवः ॥८७॥ एकदा पाटलीपुत्रे, भिक्षार्थं ते सहोदराः । यान्तो ददृशुरुद्याने, क्रीडन्तं भूपतेः सुतम् ॥८८॥ पुण्यपापफलं ज्ञात्वा, जाता धर्मपरायणाः । अन्ते दीक्षां गृहीत्वा ते, स्वर्गे सप्तमके ययुः ॥८९॥ ततश्च्युत्वा सुताः सप्त, गुणपाला-दयोऽभवन् । तवाथाष्टमपुत्रस्य, वृत्तान्तं शृणु भूपते ! ॥९०॥ वैताढ्यपर्वते विद्या-धरोऽभूत् क्षुल्लकाभिधः । नित्यं नंदी-श्वरे द्वीपे, यात्रां पूजां चकार सः ॥९१॥ धर्मपरायणो भूत्वा, स स्वर्गे प्रथमे ययौ । ततश्च्युत्वाऽभवल्लोक-पालोऽष्टमः सुतस्तव ॥९२॥ पुत्रीचतुष्टयस्यैवं, वृत्तान्तं शृणु भूपते ! । यथा विद्याधरश्चैको-ऽभवद्वैताढ्यपर्वते ॥ ९३ ॥ पुत्रीचतुष्टयं तस्या-ऽभवंस्ताश्च वने ययौ । क्रीडार्थमेकदा तत्र, ता दृष्ट्वा मुनिनाऽकथि ॥९४॥ यूयं धर्मं प्रकुर्वन्तु, युष्मदायुश्च विद्यते । एकदिनस्य ताः प्रोचु-रेकाऽह्नि स कथं भवेत् ॥९५॥ गुरुस्ताः प्राह चाद्यास्ति, शुक्लं हि पञ्चमीदिनम् । ततो भावेन युष्माभि-रुपवासो विधीयताम् ॥९६॥ ताभिरपि गुरुप्रोक्त-विधिरकारि ता निशि । विद्युत्पातेन मृत्वाऽगुः, प्रथमे च सुरालये ॥९७॥ ततश्च्युत्वा चतस्रस्ता, इमा तव सुताऽभवन् । श्रुत्वैवं भूपतेर्जाति-स्मृतिज्ञानमभूत्ततः ॥९८॥ पुनः प्राह



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





नृपो वाच्यो, रोहिणीतपसो विधिः। गुरुः प्राह यदायाति, सोमवारे च रोहिणी ॥९९॥ तस्मिन् दिने तपो ग्राह्यं, विधेयमुपवासकम्। सप्तमासाधिकं सप्त-वर्षं यावदखण्डितम् ॥१००॥ ॐ ह्रीँ श्रीँ वासुपूज्याय, नमश्च द्विसहस्त्रिकः। जापः कार्यो जिनाधीशा-ऽर्चादेववन्दनादिकम् ॥ १०१ ॥ सप्तविंशति लोगस्स, कायोत्सर्गः प्रदक्षिणा। स्वस्तिकः क्रियते तस्मिन्, दिने प्रतिक्रमादिकम् ॥ १०२ ॥ उद्यापनं तपःपूर्णे, निजशक्त्या विधीयते। नृपोऽथ रोहिणीपुत्राः, पुत्र्यश्च तत्तपो ललुः ॥१०३॥ तत्तपो विधिना चक्रु-स्ते सर्वे च नृपादयः। ततो दीक्षां ललुः पार्श्वे, वासुपूज्यजिनेशितुः ॥ १०४ ॥ ते सर्वे शुद्धचारित्रं, पालयित्वा विनाश्य च। सर्वकर्माणि संबोध्य, भव्यजीवान् शिवं ययुः ॥१०५॥ आसन्खरतरे गच्छे, जिनमहेन्द्रसूरयः। तत्करदीक्षिता जाताः, श्रीमोहनमुनीश्वराः ॥ १०६ ॥ राजमुनीश्वरस्तस्य, शिष्यो गुणाकरोऽभवत्। तस्य शिष्या महाप्राज्ञाः, श्रीजिनरत्नसूरयः ॥१०७॥ पाठकलब्धिना प्रेम-मुनिगणेः समाग्रहात्। रोहिणीतपसीयं च, विहिता रोहिणीकथा ॥१०८॥ संवद्बाणखशून्याक्षि (२००५), वर्षे फाल्गुनमेचक्रे। अजयमेरुदुर्गे च, नीता कथा समाप्तिताम् ॥ १०९ ॥

## ॥ इति श्रीरोहिणी-तपःकथा समाप्ता ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





## (१०) अथ चतुर्मासी-पर्व-व्याख्यानम्।

प्रणम्य श्रीमहावीरं, सर्वज्ञं परमेश्वरम्। पर्वोत्तमचतुर्मासी-व्याख्यानं लिख्यते मया ॥१॥ कार्त्तिक-फाल्गुनाषाढ-चतुर्मासीत्रयं खलु। जिनेन्द्रशासने प्रोक्तं, सदृशं च परस्परम् ॥२॥ आगतायां चतुर्मास्यां, कार्यो धर्मः शिवार्थिभिः। द्रव्यभावविशुद्धात्म-गुरुसेवनतत्परैः ॥ ३ ॥ प्रथमं श्राद्धकृत्यानि, कथ्यतेऽत्र च पर्वणि। बहुसावद्यव्यापारो, वर्ज्यः श्राद्धैरहर्निशम् ॥ ४ ॥ न बहुत्रससंसक्त-तिलादिधान्यसञ्चयः। श्राद्धैः फाल्गुनमासादौ, रक्षणीयो विशेषतः ॥ ५ ॥ आम्रफलादिसन्धानं, त्रसादिजीवमिश्रितम्। यदि भवेत्तदा त्याज्यं, श्रावकैर्भवभीरुभिः ॥ ६ ॥ पुनर्मधूकबिल्वादि-फलं च जन्तुमिश्रितम्। अरणिशिग्रुशिम्बादि, परित्याज्यमुपासकैः ॥ ७ ॥ वर्षाकाले पुनस्तन्दु-लीयादिपत्रशाककम्। बहुसूक्ष्मत्रसप्राणि-मिश्रं त्याज्यं विशेषतः ॥ ८ ॥ फाल्गुनात्पुनरारभ्य, यावच्च कार्तिकं खलु। गुर्जरादिकदेशस्थ-जैनेषु तन्न भक्ष्यते ॥९॥ अतिपक्वमतिश्लथं, चलितरसकं पुनः। जीवाश्रितं परित्याज्यं, चिर्भटिकादिकं फलम् ॥१०॥ अपरिपक्वसच्छिद्र-मन्तर्जीवाश्रितं फलम्। सन्त्याज्यं फलमज्ञात-मभक्ष्यं सर्ववस्तु च ॥ ११ ॥ उक्तञ्च—"अज्ञातकं फलमशोधितपत्रशाकं, पूगीफलानि सकलानि [अस्फोटितानि] च हट्टचूर्णम्। मालिन्यसर्पिरपरीक्षकमानुषाणा-मेते भवन्ति नितरां किल मांसदोषाः ॥१२॥" पुनश्च ग्रीष्मकाले यद्, द्रव्यं शीघ्रविनाशि तत्। सोपयोगेन संसेव्यं, निर्व-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ष्यमेव वस्तु च ॥१३॥ पर्वण्यस्मिन्विधातव्यं, सामायिकं च पौषधम्। देशावकाशिकं तीर्थे-श्वरदर्शनपूजनम् ॥ १४ ॥ उक्तञ्च—"सामायिकावश्यक-पौषधानि, देवार्चन-स्नात्र-विलेपनानि। ब्रह्मक्रिया-दान-तपोमुखानि, भव्याश्चतुर्मासिक-मण्डनानि ॥१५॥" चतुर्मासीत्रयं राका, चतुर्दश्यष्टमीद्वयम्। चारित्रतिथयः प्रोक्ता, अमावास्यातिथिस्तथा ॥ १६ ॥ एकादशी द्वितीया च, पर्युषणा च पञ्चमी। कल्याणकतिथिः प्रोक्ता, श्रीज्ञानतिथयः पुनः ॥ १७ ॥ दर्शनतिथयश्चान्याः, प्रतिपदादयः पुनः। धर्मकृत्यैः समाराध्या, एतास्तत्तदपेक्षया ॥१८॥ मिथ्यात्वपरिहारेण, श्राद्धैः सम्यक्त्वधारिभिः। देवार्चया गुरोः सेवा-तीर्थयात्राजपादिना ॥ १९ ॥ जिनजन्मादिकल्याण-स्थानकस्पर्शनादिना। सम्यक्त्वं निर्मलं कार्यं, सततं भववारकम् ॥२०॥ युग्मम्॥ उक्तञ्च—"जम्मं दिक्खा नाणं, तित्थयराणं महाणुभावाणं। जत्थ य कयनिव्वाणं, आगाढं दंसणं होइ ॥ २१ ॥" यत्र ज्ञानादिलाभः स्या-द्दुर्जना सेवना पुनः। सावद्येतरयोगानां, तत्सामायिकमुच्यते ॥२२॥ उक्तञ्चावश्यकसूत्रे—"सामाइयं नाम सावज्जजोगपरिवज्जणं, निरवज्जजोगपडिसेवणं चे" ति +तथा "निंदपसंसासु समो, समो य माणावमाणकारीसु। समसयणपरियणमणो, सामाइयसंगओ जीवो ॥ २३ ॥

---

+ एतत्सावद्येतरयोगानां वर्जनासेवनं यथासङ्ख्यमेव, न त्वयथासङ्ख्यं, विधेयतयाऽभिहितं पञ्चाशकवृत्तौ श्रीमदभयदेवसूरिपूज्यैः, यथासङ्ख्यत्वं तु सामायिकदण्डकोच्चारानन्तरमेवेर्याप्रतिक्रमणे भवति। यच्च महानिशीथादिशास्त्रपाठान्पुरस्कृत्य सामायिकोच्चारात्प्रागीर्याप्रतिक्रमणप्रसाधनं तन्न कथमपि घटामियर्त्ति, यतः प्रायस्तेषु सर्वेष्वपि पुरस्क्रियमाणेषु शास्त्रपाठेषु सामायिकविधिनाममात्रस्याप्यभावात्, क्वचिच्चैत्यवन्दन-स्वाध्यायादेः, क्वचिद्बहिर्भूम्यादिसमागतस्य साधोरीर्याप्रतिक्रमणस्य, क्वचिच्च पौषधादिविध्यन्तरसद्भावाच्च। तथा च कः सकर्णो विद्यमानेऽपि नामग्राहविधिनिर्देशेऽनिर्दिष्टविधिं गृहीतुमिच्छेत्? इत्यलम्प्रसङ्गेन।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





जो समो सव्वभूएसु तसेसु थावरेसु य। तस्स सामाइय होइ, इमं केवलिभासियं ॥२४॥" सामायिकस्थितः श्राद्धो, गृहस्थोऽपि भवेत्पुनः। साधुतुल्यश्च सावद्या-श्रवाणां परिवर्जनात् ॥२५॥ उक्तञ्च—" सामाइयंमि उ कए, समणो इव सावओ हवइ जम्हा। एएण कारणेणं, बहुसो सामाइयं कुज्जा ॥२६॥" सामायिकात्मके भाव-स्तवे स्थितस्य नास्ति हि। द्रव्यस्तवाधिकारोऽत्र, दुर्लभताऽस्य कित्तिता ॥२७॥ उक्तञ्च—" सामाइयसामग्गिं, देवावि चिंतंति हिययमज्झंमि। जइ हुज्ज मुहुत्तमेगं, ता अम्ह देवत्तणं सहलं ॥२८॥ दिवसे दिवसे लक्खं, देइ सुवण्णस्स खंडियं एगो। एगो पुण सामाइयं, करेइ न पहुप्पए तस्स ॥ २९ ॥" पुनः सामायिकं प्रोक्त-मष्टविधं जिनेश्वरैः। स दृष्टान्तं महानिष्ट-कर्मणां निर्जराकरम् ॥३०॥ उक्तञ्च—" सामाइयं १, समइयं २, सम्मवाओ ३, समास ४, संखेवो ५। अणवज्जं च परिन्ना ७, पच्चक्खाणे ८ य ते अट्ठ ॥३१॥" यच्च येषां रिपौ मित्रे, समभावेन तिष्ठनम्। दवदन्तर्षिवत्तेषां, तत्सामायिक-मुच्यते ॥३२॥ हस्तिशीर्षपुरे शूरो, दवदन्तनृपोऽजनि। कौरवपाण्डवैः सार्द्धं, सीमायै तस्य विग्रहः ॥३३॥ ततोऽन्यदा जरासिन्धु-सेवार्थं गतवान् स च। कौरवपाण्डवैः पश्चा-द्भग्नस्तद्विषयोऽखिलः ॥३४॥ श्रुत्वेति दवदन्तेन, हस्तिनागपुरोपरि। लात्वा बहुबलं युद्धं, कृत्वा ते हि पराजिताः ॥३५॥ एकदाऽथ स सन्ध्यायां, पञ्चवर्णीयवार्दलम्। दृष्टनष्टं क्षणादेव, दृष्ट्वा वैराग्यतां गतः ॥३६॥ तादृशमेव संसार-मसारं हि विभावयन्। भूत्वा प्रत्येकबुद्धः स, प्रव्रजितो नरेश्वरः ॥३७॥ ततश्च विहरन् हस्ति-नागपुरं गतोऽन्यदा। प्रतोल्याश्च बहिर्देशे, कायोत्सर्गेण संस्थितः ॥३८॥ तदोद्यानं च गच्छद्भिः, पाण्डवैः पथि तं मुनिम्। दृष्ट्वा लोकमुखाज्ज्ञातो, दवदन्तो महामुनिः ॥३९॥ ततोऽश्वेभ्यः समुत्तीर्याऽभिवन्द्य विधिना मुदा। द्विविधं हि बलं तस्य, प्रशंस्याग्रे ययुश्च ते ॥४०॥ समेताः कौरवाः पश्चा-त्तेषु वृद्धेन लोकतः। दुर्यो-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





धनेन विज्ञातो, दवदन्तमुनीश्वरः ॥४१॥ स तिरस्कृत्य दुर्वाक्यै-र्बहुभिः सम्मुखं मुनेः। बीजपूरफलं क्षिप्त्वा, चचाकाग्रे स्वयं ततः ॥४२॥ यथा राजा तथा लोका, इति न्यायाद्बलैरपि। इष्टकाग्रावकाष्ठाद्याः, प्रक्षिप्तास्तस्य चोपरि ॥४३॥ जातमुच्चैस्तरं तेन, चत्वरमथ पाण्डवाः। पश्चान्निवर्त्तमानाश्च, मुनिस्थाने व्यलोकयन् ॥४४॥ कौरवचेष्टितं ज्ञात्वा तदपनीय चत्वरम्। क्षमयित्वा मुनिं नत्वा, स्वस्थानं पाण्डवा ययुः ॥४५॥ पाण्डवैः सत्कृतः साधुः, कौरवैरपमानितः। उभयत्र बभारासौ, समभावं महामुनिः ॥४६॥ (१) यच्च येषां दयापूर्वं, वर्त्तनं सर्वजन्तुषु। मेतार्यमुनिवत्तेषां, तत्सामायिकमुच्यते ॥ ४७ ॥ प्राग्भवाचरितपाप-वशाद्राजगृहे पुरे। चाण्डालकुल उत्पन्नो, मेतार्याख्यो महामुनिः ॥ ४८ ॥ चाण्डाल्या मृतवत्सायै, जन्मसमय एव सः। पत्न्यै तु धनदत्तस्य, प्रच्छन्नत्वेन चार्पितः ॥ ४९ ॥ सोऽथाष्टौ श्रेष्ठिकन्याश्च, श्रेणिकभूपतेः सुताम्। प्राग्भवमित्रदेवस्य, साहाय्यात्परिणीतवान् ॥ ५० ॥ ततो द्वादशवर्षान्ते, जग्राह देववाचया। दीक्षां वीरप्रभोः पार्श्वे, स मेतार्यो महामुनिः ॥ ५१ ॥ सोऽथ प्रभूतदेशेषु, विहरन्मुनिरेकदा। राजगृहे च भिक्षार्थं, स्वर्णकारगृहे गतः ॥ ५२ ॥ स्वर्णकारः समायातं, विलोक्य तं मुनिं मुदा। प्रणम्य लातुमन्नादिं, गृहान्तः प्रविवेश च ॥ ५३ ॥ पश्चाच्च देवपूजायै, श्रेणिकभूपतेः कृतम्। अष्टोत्तरशतं जग्धं, यवानां क्रौञ्चपक्षिणा ॥५४॥ ततश्चोड्डीय भित्तौ स, स्थितोऽथ स्वर्णकारकः। शुद्धाहारं समानीय, गृहाद्बहिः समागतः ॥ ५५ ॥ स्वर्णयवाननालोक्य, तच्चौरं साधुमेव तम्। स चिन्तयन् जगौ साधो !, मयाऽत्र रक्षिता यवाः ॥ ५६ ॥ अपहृताश्च ? ते केन, चिन्तितं साधुना तदा। यदि ते भक्षिताः क्रौञ्च-पक्षिणेति वदाम्यहम् ॥ ५७ ॥ तदा मद्वचसाऽयं हि, क्रौञ्चमेनं हनिष्यति। एवं विचिन्त्य मेतार्य-मुनिना मौनमाश्रितम् ॥ ५८ ॥ युग्मम् ॥ ततो रुष्टेन तेनार्द्र-वार्ध्रेण मुनिमस्तकम्। बद्धं तदा



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





मुनेर्नेत्रे, निस्सृत्य पतिते बहिः ॥ ५९ ॥ उत्पन्नां वेदनां तीव्रां, सहमानो महामुनिः । सोऽन्तकृत्केवलीभूय, कर्महीनः शिवं ययौ ॥ ६० ॥ स्वप्राणान्तोपसर्गेऽपि, तेन चित्ते दया धृता । नान्यत्किमपि तद्वद्या-चरणीयं परैरपि ॥ ६१ ॥ (२) । कालिकाचार्यवन्निर्भीः, सत्यवादं करोति यः । सम्यग्वादाभिधं तस्य, तत्सामायिकमुच्यते ॥ ६२ ॥ यथा तुरुमिणीपुर्यां, कालिकाचार्यसद्गुरोः । भगिनीतनुजो दत्त-नामा पुरोहितोऽभवत् ॥ ६३ ॥ स च छलाञ्जितस्वामि-नृपं चिक्षेप पञ्जरे । स्वयं करोति तद्राज्यं, तत्राचार्याः समागताः ॥६४॥ मातुः प्रेरणयाऽऽचार्य-पार्श्वं गत्वाऽभिमानिना । तेन धर्मैषया पृष्टा-स्ते यज्ञफलमस्ति ? किम् ॥६५॥ तदा सूरीश्वरो धैर्य-मवलम्ब्य तदग्रतः । हिंसारूपोऽस्ति यज्ञस्त-त्फलं नरक इत्यवक् ॥ ६६ ॥ कः प्रत्ययोऽत्र ? पूज्योऽवक्, त्वमितः सप्तमे दिने । भक्षितः कुक्कुरैः कुम्भ्यां, प्रपचैँश्च मरिष्यसि ॥ ६७ ॥ अत्रापि प्रत्ययः कोऽस्ती-ति पृष्टे तेन सूरिणा । प्रोक्तं तस्मिन् दिनेऽकस्मान्मुखे विष्ठा पतिष्यति ॥ ६८ ॥ ततः क्रुद्धेन दत्तेनो-क्तं त्वं कथं मरिष्यसि ? । गुरुणोक्तं तदा तस्मै, मर्त्ताऽस्म्यहं समाधिना ॥ ६९ ॥ स्वर्गं मृतोऽपि गन्ताऽस्मि, तदा दत्तोऽभिमानतः । उत्थाय स्वभटैः सूरिं, निरुद्ध्य स्वगृहं ययौ ॥ ७० ॥ प्रच्छन्नं हि स्थितस्तत्र, दत्तोऽथ मतिमोहतः । सप्तममपि मन्वानो-ऽष्टमं दिनं महर्षितः ॥ ७१ ॥ कुर्वेऽद्य शान्तिकं सूरि-प्राणैरिति विचार्य च । प्रातःकालेऽश्वमारुह्य, स्वगेहान्निर्गतो द्रुतम् ॥ ७२ ॥ तदैको मालिकः पुर्यां, प्रविशन्निर्जने पथि । कार्याकुलो मलोत्सर्गं, कृत्वाऽऽच्छाद्य सुमैर्गतः ॥ ७३ ॥ दत्तस्य गच्छतो मार्गे, तत्रैवाश्वखुरस्य च । घातेनोच्छलिता विष्ठा, पतिताश्च तदानने ॥ ७४ ॥ विष्ठास्वादात्तदा ज्ञात्वा, सप्तमाह्नं चमत्कृतः । पश्चान्निवृत्य गेहान्त-रुदासीनतया स्थितः ॥ ७५ ॥ अथैतस्य दुराचारात्, खिन्नैश्च मूलमन्त्रिभिः । निष्कास्य पञ्जराद्राज्ये, स्था-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पितो भूपतिर्मुदा ॥ ७६ ॥ जितशत्रुनृपोऽथैनं, दत्तं बद्ध्वा छलेन च। कुम्भ्यां प्रक्षिप्य सञ्ज्वाल्या-धोऽग्निं मुमोच कुकुरान् ॥७७॥ एवं कदर्थनां दत्तः, सहित्वा नरकं गतः। सूरीश्वरास्तु भूपेन, बहुधा सत्कृता भृशम् ॥७८॥ (३)। चिलातीपुत्रवद्येषां, वस्तुतत्त्वावबोधनम्। स्तोकाक्षरैर्भवेत्तेषां, तत्समासाख्यमुच्यते ॥ ७९ ॥ यथा राजगृहीपुर्यां, धनदत्तवणिग्वरः। तनुजास्तस्य चत्वारो, बभूवुः सुसुमा सुता ॥ ८० ॥ चिलातीपुत्रनामैको, दासोऽन्यदाऽवगम्य च। तं दुराचारिणं श्रेष्ठी, स निष्कासितवान् गृहात् ॥ ८१ ॥ ततो निस्सृत्य गत्वा च, चौरपल्यां स संस्थितः। अथान्यदा समं चौरैः, राजगृहपुरीं गतः ॥ ८२ ॥ तत्र स्वयं गृहे तस्य, प्रविश्य श्रेष्ठिनः सुताम्। सुसुमाख्यां समादाय, सद्यो गृहाद्विनिर्गतः ॥८३॥ श्रेष्ठ्यपि स्वसुतां लातुं, तत्पृष्ठे धावितः समम्। स्वपुत्रैरतिचक्राम, मार्गे दीर्घतरं लघु ॥८४॥ अत्यासन्नं तमालोक्य, स छित्त्वा सुसुमाशिरः। तद् गृहीत्वा करेऽन्येऽसिं, रक्तलिप्तं पलायितः ॥८५॥ श्रेष्ठी तु तत्समालोक्य, वलितः स्वगृहं प्रति। सोऽथ पर्वतमारुह्य, चचालाग्रे भयंकरः ॥८६॥ कायोत्सर्गस्थितं साधुं, मार्गे दृष्ट्वा जगाद सः। भो मुण्ड ! वद धर्मं त्वं, नो चेच्छेत्स्यामि ते शिरः ॥ ८७ ॥ तत्स्वरूपं मुनिर्दृष्ट्वा, समुच्चार्य नमस्कृतिम्। झटित्याकाशं उड्डीय, प्रोक्त्वा पदत्रयं ययौ ॥८८॥ उपशमो विवेकश्च, संवर इति लक्षणम्। धर्मं श्रुत्वा ददर्शैक-मपि गुणं स नात्मनि ॥ ८९ ॥ तत्प्राप्त्यर्थं दधानः स, समभावं निजात्मनि। करस्थितशिरःखड्गौ, मुमोच तत्र हेलया ॥ ९० ॥ तन्मुनिस्थान एवासौ, कायोत्सर्गेण संस्थितः। तदानीं रक्तगन्धेनो-पागतः कीटिकागणः ॥ ९१ ॥ शरीरं तस्य सच्छिद्रं, ताभिः कृतं परन्तु न। मनागपि चचालासौ, सहमानः परीषहम् ॥ ९२ ॥ तृतीयदिवसे कालं, कृत्वा तत्रैव सोऽगमत्। स्वर्गमिति समासाख्य-सामायिके निदर्शनम् ॥ ९३ ॥ (४)। स्तोकाक्षरैर्महार्थस्य, कथने



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





लौकिकः पुनः । चतुःपण्डितदृष्टान्तः, प्रसङ्गात्कथ्यतेऽत्र च ॥ ९४ ॥ जितशत्रुनृपश्चासी-द्वसन्तपुरपत्तने । अन्यदा भूपतेः शास्त्रं, श्रोतुमिच्छाऽभवत्तराम् ॥ ९५ ॥ चतुर्भिः पण्डितैश्चापि, श्लोकानां लक्षलक्षकम् । शास्त्रचतुष्कं सन्दर्भ्य, नृपस्य पुरतोऽकथि ॥ ९६ ॥ नृपेणोक्तमिमे ग्रन्था, महाप्रमाणका मया । बहुकालेन विश्रोतुं, न शक्यन्ते क्षणं विना ॥ ९७ ॥ तस्मात्स्वल्पाक्षरैरेवै-तेषां सारो निगद्यताम् । तदा तत्सारभूतं ते, श्लोकं विरच्य चावदन् ॥९८॥ तथाहि-"जीर्णे भोजनमात्रेयः, कपिलः प्राणिनां दया । बृहस्पतिरविश्वासः, पाञ्चालः स्त्रीषु मार्दवम् ॥ ९९ ॥" एवं स्तोकाक्षरैरेव, बह्वर्थानां निरूपणम् । द्वादशाङ्गीति संक्षेपा-ख्यसामायिकमुच्यते ॥१००॥ (५) । विज्ञेया निरवद्याख्ये, सामायिके दयान्विते । श्रीधर्मघोषसूरीश-शिष्यधर्मरुचेः कथा ॥१०१॥ विशुद्धाऽऽहारपानीयं, लातुं पुरे भ्रमन् क्रमात् । रोहिणीब्राह्मणीगेहे, प्रविवेश मुनिः स च ॥ १०२ ॥ मिष्टभ्रान्त्या कुटुम्बार्थं, निष्पादितं तया तदा । कटुकतुम्बिकाशाकं, ज्ञातं पश्चान्महाकटु ॥१०३॥ दुष्टबुद्ध्या तया सर्वं, शाकं तत्साधवेऽर्पितम् । ऋजुस्वभावतः सोऽपि, तल्लात्वोपाश्रयं गतः ॥१०४॥ गुरुभ्यो दर्शितं शाकं, तद् दृष्ट्वा गुरवोऽवदन् । भो ! मुनेऽस्ति विषप्राय-मिदं शाकं च मृत्युदम् ॥१०५॥ निर्दोषस्थण्डिले तस्मात्, परिष्ठापय तत्तदा । परिष्ठापयितुं शाकं, मुनिः पुराद्बहिर्गतः ॥ १०६ ॥ संलग्नस्तत्र तच्छाकं, परिष्ठापयितुं मुनिः । तावत्तन्मध्यतो बिन्दु-रेकस्तु पतितो भुवि ॥ १०७ ॥ तद्गन्धात्कीटिका बह्व्य, आगत्य मिलिता मृताः । तद्गन्धग्रहणात्सद्यो, दृष्टास्तेनाघभीरुणा ॥१०८॥ स च जीवदयां चित्ते, सन्धार्य स्वयमेव च । तच्छाकं भुक्तवान् मृत्वा, स्वर्गं ययौ समाधिना ॥१०९॥ (६) । वस्तुतत्त्वपरिज्ञाने, सर्वकर्मविनाशके । सामायिके परिज्ञाख्ये, इलापुत्रकथोच्यते ॥११०॥ इलाख्यनगरे श्रेष्ठी, धनदत्ताभिधो धनी । इलापुत्रः सुतस्तस्ये-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





लादेवीसेवनादभूत् ॥१११॥ तत्रैकदाऽऽगतानां स, नटानां परदेशिनाम् । नृत्यं पश्यन् ददर्शाति-सुन्दरां नर्तकात्मजाम् ॥११२॥ प्रागूभवस्नेहतस्तस्या-मनुरक्तः स चाजनि । ततः सद्यः समागत्य, जगाद पितरं प्रति ॥११३॥ नर्त्तकतनुजां रम्यां, मह्यं त्वं परिणायय । नो चेन्मरणमेवाहं, प्रपद्ये शरणं पितः ! ॥११४॥ परमपरकन्यां न, परिणेष्यामि सर्वथा । तदा तस्याग्रहं ज्ञात्वा, पिताऽगान्नर्त्तकं प्रति ॥११५॥ पुत्राय श्रेष्ठिना पुत्री, मार्गिता तस्य सोऽवदत् । यद्ययं शिक्षयित्वाऽस्मत्-कलां धनमुपार्जयेत् ॥११६॥ पुनः सम्पोषयेत्सर्वा-मस्मज्जातिं प्रतिष्ठते । सहास्माभिस्तदा कन्या, प्रदीयतेऽन्यथा नहि ॥११७॥ श्रेष्ठिना तद्वचः श्रुत्वे-लापुत्राय निवेदितः । वृत्तान्तोऽथ तदप्यङ्गी-कृत्य स निर्गतो गृहात् ॥११८॥ युग्मम् ॥ नटेषु मिलितः सोऽथ, सर्वनटकलासु च । निपुणोऽभूत्क्रमाद्बेना-तटाख्यनगरं गतः ॥११९॥ तत्र स्वयं धनार्थी स, वंशमारुह्य खेलते । नृपाग्रे नटपुत्री तु, मिष्टस्वरेण गायति ॥१२०॥ तदा नटसुतारूप-गीताभ्यां मोहितो नृपः । स ध्यायत इलापुत्रो, निपत्य म्रियते यदि ॥१२१॥ तदा गृह्णाम्यहं कन्या-मिमां तत इलासुतः । प्रदर्श्य स्वकलां सर्वां, वंशात्समुत्ततार सः ॥१२२॥ युग्मम् ॥ दानाऽऽदानेच्छया भूप-पुरः स च स्थितस्तदा । नृपोऽवदन्मया नृत्यं, दृष्टं व्यग्रतया नहि ॥१२३॥ ततः कुरु पुनस्तेन, तदा धनेप्सया कृतम् । पुनर्नृत्यं परं राज्ञा, तन्मृत्युमिच्छताऽकथि ॥१२४॥ मया दृष्टं समीचीनं, नातो नृत्यं पुनः कुरु । सोऽथ तृतीयवारं हि, वंशमारुह्य खेलते ॥१२५॥ तस्मिन् क्षणे मुनिश्चैको, भिक्षार्थं श्रेष्ठिनो गृहे । गतस्तदाऽतिरूपाढ्या, सर्वभूषणभूषिता ॥१२६॥ श्रेष्ठिपत्नी समुत्थाय, सद्यो विधाय वन्दनाम् । सानन्दं मोदकैः स्थालं, भृत्वा गृहात्समेत्य च ॥१२७॥ प्रतिलाभयते साधुं, सोऽप्यधोनयनो मुनिः । इत्थमित्थं वदँश्छुद्धा-हारं गृह्णाति शुद्धधीः ॥ १२८ ॥ त्रिभिर्विशेषकम् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तयोः स्वरूपमालोक्य, गतविकारलोभयोः। गुणस्थानक्रमारूढः, केवलज्ञानमाप्तवान् ॥१२९॥ वंश एवाभवत्सिद्धा-सन-
स्तत्र स्थितः स च। ददौ धर्मोपदेशं च, प्रतिबुद्धा नृपादयः ॥१३०॥ (७)। हेयवस्तुपरित्यागे, तेतलिपुत्रसत्कथा।
तेतलिनगरेऽथासीत्, कनककेतुभूपतिः ॥१३१॥ राज्यलोभात्सुताञ्जात-मात्रान्मारयते स च। तेतलिपुत्रमन्त्र्यासी-त्तस्य
भार्या च पोट्टिला ॥१३२॥ प्राङ्मन्त्रिवल्लभा साऽभूत्, पश्चादवल्लभाऽजनि। तस्या गृहेऽन्यदा साध्वी-रायाता वन्दिता
तया ॥१३३॥ सा वशीकरणोपायं, भर्त्तुः पप्रच्छ चार्यया। प्रोक्तं भद्रे! सदा सेव्यो, धर्मः कामितदायकः ॥१३४॥
संसारवासखिन्नाऽथ, दीक्षां लातुमना च सा। पतिं पप्रच्छ सोऽवादी-द्दीक्षां लाहि सुखेन च ॥१३५॥ परं त्वं
यदि देवः स्या-त्तदा मां प्रतिबोधयेः। स्वीकृत्य तद्वचः साऽपि, दीक्षां भागवतीं ललौ ॥१३६॥ सा प्रान्तेऽनशनं
कृत्वा, स्वर्गं गताऽथ मन्त्रिणा। प्रच्छन्नं वर्द्धितश्चैको, राज्ञः पुत्रः स्वसद्मनि ॥१३७॥ नृपे मृते कुमारः स, राज्ये
चास्थापि मन्त्रिणा। भूपोऽथ धीसखाधीनं, सर्वं राज्यं चकार हि ॥१३८॥ ततो मन्त्री सदा राज-कार्ये मग्नः
कदाऽपि न। चकार धर्मकृत्यं हि, परभवसुखावहम् ॥१३९॥ तस्मिन् क्षणे च देवत्वं, प्राप्ता सा पोट्टिलाऽखिलम्।
मन्त्रिणस्तत्स्वरूपं हि, ददर्श दुर्गतिप्रदम् ॥ १४० ॥ तया तत्प्रतिबोधाय, सर्वे नृपादयो जनाः। पराङ्मुखाः कृता
राज-सभायां मन्त्रिणं प्रति ॥१४१॥ तेन स्वानादरं दृष्ट्वा, सद्म आगत्य सद्मनि। कृताः स्वमरणोपाया, देवेन
निष्फलीकृताः ॥१४२॥ देवोऽथ मन्त्रिणं प्राह, विलक्षीभूय संस्थितम्। भो! मन्त्रिन्नस्ति संसार-स्वरूपमीदृशं सदा
॥१४३॥ तत्त्वतः कोऽपि कस्यापि, नैवास्ति स्वजनोऽपरः। इत्येवं मन्त्रिणं देवः, प्रतिबोध्य तिरोदधे ॥ १४४ ॥
मन्त्र्यथ विभवं सर्वं, त्यक्त्वा दीक्षां ललाविति। प्रपाल्य शुद्धचारित्रं, प्रान्ते च सद्गतिं ययौ ॥१४५॥ (८)।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सदोभयक्षणं कार्यं-मावश्यकमुपासकैः । आत्मव्रतातिचाराणां, शुद्धयर्थं तत्फलं यथा ॥१४६॥ " आवस्सएण एएण, सावओ जइ वि बहुरओ होइ । दुक्खाणमंतकिरियं, काही अचिरेण कालेण ॥१४७॥ आवस्सयं उभयकालं, ओसहमिव जे करंति उज्जुत्ता । जिणविज्जकहियविहिणा, अकम्मरोगा य ते हुँति ॥१४८॥ " साजणसिंहवद्धन्यै-र्विधातव्यः प्रतिक्रमः । स न भुङ्क्ते द्विसन्ध्यं हि, प्रतिक्रमक्रियां विना ॥१४९॥ पीरोजपातशाहेन, क्षिप्तः कारागृहेऽन्यदा । केनचिदपराधेन, स च श्रेष्ठी विशुद्धधीः ॥१५०॥ तेन तत्र स्थितेनाथा-रक्षकेभ्यो वितीर्यं च । हेमनिष्काँश्च पञ्चाशत्पञ्चाशत्प्रमितान्सदा ॥१५१॥ शृङ्खलया विमुक्तेन, प्रतिक्रमो विधीयते । रत्नद्वयं समायात-मन्यदा राजसंसदि ॥१५२॥ श्रेष्ठिनं पातशाहेना-कार्यं रत्ने प्रदर्शिते । ते परीक्ष्यावदच्छ्रेष्ठी, महार्घेऽस्त इमेऽत्र हि ॥ १५३ ॥ युग्मम् ॥ तृतीयं रत्नमत्रास्ति, भवानिति प्रकीर्त्तनात् । साहिना प्रेषितः श्रेष्ठी, गृहे सम्मानपूर्वकम् ॥ १५४ ॥ आरक्षकैस्तदा भीतैः, पश्चान्निष्काः समर्पिताः । ततस्ते श्रेष्ठिना निष्का-स्तेभ्य एव समर्पिताः ॥१५५॥ तेन चोक्तं कियन्मात्र-मेतद्धनं यतो मया । आवश्यकं कृतं युष्मत्-साहाय्यादतिदुर्लभम् ॥१५६॥ पुष्टिं करोति धर्मस्य, तत्पौषधं चतुर्विधम् । आहार-तनुसत्कार-व्यापाराब्रह्मवर्जनम् ॥१५७॥ धर्माभिलाषुभिः श्राद्धैः, कार्यं पर्वणि पौषधम् । अवश्यं कामदेवादि-श्राद्धवत्तत्फलं यथा ॥ १५८ ॥ " पौसहियसुहे भावे, असुहाइं खवेइ नत्थि संदेहो । छिंदइ निरयतिरियगइं, पोसहविहि-अप्पमत्तेणं ॥१५९॥" अन्यदा कामदेवाख्यः, श्रावकः पौषधे स्थितः । रात्रौ मिथ्यात्विदेवेन, धर्माच्चालयितुं च तम् ॥१६०॥ गजनागपिशाचादि-रूपैः स उपसर्गितः । तथाऽपि क्षुभितो नैव, त्रिभिर्योगैर्मनागपि ॥ १६१ ॥ युग्मम् ॥ श्राद्धैर्जिनेन्द्रबिम्बस्या-ष्टद्रव्यैर्वरपूजनम् । अस्मिन्पर्वणि कर्त्तव्यं, स्वशक्त्या तत्फलं यथा ॥१६२ " सयं पमज्जणे पुन्नं,



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सहस्सं च विलेवणे। सयसाहस्सिया माला, अणंतं गीयवाइए ॥१६३॥" सुदर्शन इव ब्रह्म-चर्यं पाल्यं हि पर्वणि। श्राद्धैः सुखयशःकीर्त्ति-कारकं तत्फलं यथा ॥१६४॥ "जो देइ कणयकोडिं, अहवा कारेइ कणयजिणभवणं। तस्स न तत्तियपुन्नं, जत्तियं बंभव्वए धरिए ॥१६५॥" श्राद्धैरभयसत्पात्रा-नुकम्पोचितकीर्त्तयः। एतत्पञ्चविधं दानं, दातव्यं निजशक्तितः ॥१६६॥ तत्र द्वाभ्यां शिवप्राप्ति-र्भोगाप्तिस्त्रिभिरन्तिमैः। अभयदानदृष्टान्तो, निरूप्यतेऽत्र तद्यथा ॥१६७॥ राजगृहे सभास्थेना-ऽन्यदा प्रोक्तं नृपेण च। श्रेणिकेन पुरे स्वादु-सुलभमस्ति ? वस्तु किम् ॥१६८॥ क्षत्रिया जग-दुर्मांसं, स्वादु समर्घमस्ति च। तदाऽभयकुमारेण, चिन्तितं निर्दया इमे ॥१६९॥ यथैते पुनरप्येवं, न जल्पेयुरहं तथा। कुर्यां ततोऽभयो रात्रौ, सर्वक्षत्रियसद्मसु ॥१७०॥ पृथक्पृथक्समेत्यैव-मवादीत् क्षत्रियाश्च भोः !। उत्पन्नोऽस्ति महाव्याधी, राजपुत्रतनौ भृशम् ॥१७१॥ यदि मनुष्यकालेय-मांसं द्विटङ्कमर्प्यते। जीवति स तदा नान्य-थेति वैद्योक्तमस्ति च ॥१७२॥ ततोऽत्र भूपतिग्रास-सञ्जीविभिर्विधीयताम्। इदं कार्यं च युष्माभि-रेकः प्राहाभयं प्रति ॥१७३॥ एकसहस्र-दीनारं, लाहि परं विमुञ्च माम्। गच्छान्यत्र गृहीतं त-त्तस्मादभयमन्त्रिणा ॥१७४॥ एवं रात्रौ परिभ्रम्य, प्रतिगृहं च मन्त्रिणा। तैर्दत्तानि गृहीतानि, निष्कलक्षाणि भूरिशः ॥१७५॥ प्रातस्तं च समादाय, मन्त्रिणा नृपसंसदि। दर्शितं क्षत्रियेभ्यस्ते, हक्किताः कथितं पुनः ॥१७६॥ अहो !! यूयमवादिष्ट, चैवं गताह्वि यत्पलम्। सुलभमिति नावाप्तं, मांसं धनेन चेयता ॥१७७॥ ततस्ते लज्जिता मांस-भक्षणनियमं सदा। प्रापिता अभयेनैव-मन्यैः कार्योऽसुमद्दया ॥१७८॥ उक्तं च—"स्वमांसं दुर्लभं लोके, लक्षेणापि न लभ्यते। अल्पमूल्येन लभ्येत, पलं परशरीरजम् ॥१७९॥" अमारी-घोषणा भव्यैः, श्रीजिनचन्द्रसूरिवत्। विधातव्योपदेशेन, पुण्यानुबन्धकांक्षिभिः ॥१८०॥ सूरिणा स्वोपदेशेना-ऽकबर-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir







पातिशाहतः। आषाढाऽष्टाह्निकाऽमारी-घोषणा कारिता शुभा ॥१८१॥ स्वराज्ये प्रतिवर्षं तत्, पालनफुरमाणकम्। लिखित्वा प्रेषितं तेन, पुनः श्रीगुरवेऽर्पितम् ॥१८२॥ तस्मिन्नेव क्षणे भूपैः, साहिशिष्यनुवर्त्तिभिः। श्रीगुरवे लिखित्वा च, दत्तं तत्फुरमाणकम् ॥ १८३ ॥ समुद्रजलजन्तूनां, गुरुणा स्तम्भने पुरे। अभयं दापितं वर्षं, यावच्च सुलतानतः ॥१८४॥ काश्मीरविजयेऽष्टाह्नि-सुमहोत्सवपूर्वकम्। अमारीघोषणाऽकारि, गुरुणा पातिशाहतः ॥ १८५ ॥ कार्यं तपश्च दुष्टाष्ट-कर्मणां हि विनाशकम्। सर्वलब्धिनिधानं स-द्भव्यैर्दृढप्रहारिवत् ॥१८६॥ अनित्यत्वादिका भाव्या, द्वादश भावना सदा। संसारभीरुभिर्भव्यै-र्भवसन्ततिनाशिनी ॥१८७॥ पुनः कार्या स्वनिन्दैव, स्वात्मनिर्मलकारिणी। स्वात्ममालिन्य-कर्त्री हि, परनिन्दा कदाऽपि न ॥१८८॥ अन्यच्चैतच्चतुर्मासी-पर्वाराधनतत्परैः। दिनेऽस्मिन् भव्यजीवैश्चा-वश्यं गुर्वादि-साक्षिकम् ॥१८९॥ स्वस्वव्रतातिचारौघा, आलोच्याः सोपयोगतः। प्रदेयं लग्नदोषाणां, मिच्छामि दुक्कडं पुनः ॥१९०॥ युग्मम् ॥ साधूनां तत्र चारित्र-सप्ततेः करणस्य च। सप्ततेरतिचाराणां, चत्वारिंशद्युतं शतम् ॥१९१॥ उक्तं च-" वय ५ समणधम्म १० संजम १७, वेयावच्चं १० च बंभगुत्तीओ ९। नाणाइतिअ ३ तव १२ कोह ४ निग्गहा इइ चरण-मेयं ॥१९२॥ पिंडविसोही ४ समिई ५, भावण १२ पडिमा य १२ इंदियनिरोहो ५। पडिलेहण २५ गुत्तीओ ३, अभिग्गहा ४ चेव करणं तु ॥१९३॥" श्राद्धव्रतातिचाराणां, चतुर्विंशाधिकं शतम्। लग्नान् दोषान् समालोच्य, देयं मिच्छामि दुक्कडम् ॥१९४॥ पञ्चपञ्चातिचाराश्च सम्यक्त्वे द्वादशव्रते। पञ्च संलेखनायां च, कर्मादाने त्रिपञ्चकम् ॥१९५॥ त्रयो वीर्यस्य विज्ञेया, द्वादश तपसः पुनः। अष्टावष्टौ तथा ज्ञान-दर्शन-चरणेषु च ॥१९६॥ शङ्का-कांक्षा-विचिकित्सा-ऽन्यदृष्टेर्गुणवर्णनम्। परिचयः पुनस्तस्य, सम्यक्त्वे पञ्चदूषणम् ॥ १९७ ॥ प्रथमाणुव्रते बन्धो, छविच्छेदस्तथा वधः।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अतिभारसमारोपो-ऽन्नजलयोर्निरोधनम् ॥१९८॥ रहोऽभ्याख्यानमिथ्योप-देशौ च कूटलेखनम् । न्यासापहारसाकार-मन्त्रभेदौ द्वितीयके ॥१९९॥ स्तेनप्रयोगतद्वस्तु-ग्रहणे प्रतिरूपिणाम् । वस्तूनां व्यवहारोऽरि-राज्यातिक्रमणं तथा ॥२००॥ कूटतोलकमानं च, तृतीये तुर्यके पुनः । कामतीव्रानुरागान-ङ्गक्रीडाऽन्यविवाहनम् ॥२०१॥ इत्वरसङ्गृहीताऽप-रिगृहीताऽपसर्पणम् । पञ्चमाणुव्रते क्षेत्र-वास्तुनोर्धनधान्ययोः ॥ २०२ ॥ द्विचतुष्पदयोश्चैव, कूप्यस्य रूप्यहेमयोः । प्रमाणातिक्रमो लोभा-दन्यस्य करणादिना ॥ २०३ ॥ ऊर्ध्वाधस्तिर्यगाशानां, प्रमाणातिक्रमत्रयम् । क्षेत्रन्यूनाधिकं स्मृत्य-न्तर्धानं षष्ठदिग्व्रते ॥ २०४ ॥ सचित्तस्य सचित्तेन, प्रतिबद्धस्य भक्षणम् । सचित्तमिश्रदुष्पक्वा-हारयोः सप्तमे व्रते ॥२०५॥ अष्टमे कामकौत्कुच्य-मौखर्यकरणं व्रते । संयुक्ताधिकरणोप-भोगाधिकत्वरक्षणम् ॥२०६॥ मनोवचनकायानां, दुष्प्रणिधानतात्रयम् । अनादरविधानं त-द्विस्मृतिर्नवमे व्रते ॥२०७॥ स्ववस्त्वानयनप्रेष्य-प्रयोगौ दशमे व्रते । शब्दरूपानुपातौ च, पुद्गलक्षेपणं पुनः ॥ २०८ ॥ अविलोकिताप्रमार्जित-दुष्प्रतिलेखितदुष्प्रमार्जितयोश्च । शय्यासंस्तारकयोः, सेवनमप्रतिलेखितादौ ॥२०९॥ आर्येयम् ॥ लघुबृहन्नीतिपरि-ष्ठापनमप्रतिलेखितादेः । भाण्डादेरादानं, निक्षेपो विध्यादिनाऽनादरः ॥ २१० ॥ युग्मम् ॥ उपगीतिकेयम् ॥ विस्मृतिः पौषधे चान्त्ये, व्रते चादानबुद्धितः । साधुभ्यो देयवस्तूनां, सचित्ते स्थापनं पुनः ॥२ ११ ॥ पिधानं तेन कालाति-क्रमे निमन्त्रणं तथा । परस्य कथनं दानं, मात्सर्याद् द्वादश व्रतम् ॥२१२॥ संलेखनाऽतिचाराः स्यु-रिहपरत्रलोकयोः । आशंसा कामभोगस्य, जीविते मरणे पुनः ॥२१३॥ अङ्गारं च वनं गन्त्री, भाटकं स्फोटकं रसम् । दन्तं लाक्षा विषं केशं, निर्लाञ्छनं दवार्पणम् ॥२१४॥ असतीपोषणं यन्त्र-पीडनं जलशोषणम् । कर्मादानस्य ज्ञानस्य, निह्नवनं गुरोः पुनः ॥ २१५ ॥ अशुद्धं पठनं सूत्रा-र्थयोस्तदुभयस्य च ।

॥ ६६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





विनयबहुमानोप-धानकालैश्च वर्जितम् ॥ २१६ ॥ शङ्का कांक्षा विचिकित्सा, मूढदृग्नोपबृंहणा। अस्थिरीकरणं धर्म-वात्सल्यमप्रभावना ॥ २१७ ॥ दर्शने चरणे चाष्ट-प्रवचनप्रसोः पुनः। अपालने प्रमादेन, पुनरनुपयोगतः ॥ २१८ ॥ स्वशक्त्या तपसोर्बाह्या-भ्यन्तरयोरनादरम्। अस्फोरणं च वीर्यस्य, त्रियोगैर्धर्मकर्मसु ॥ २१९ ॥ भो भो भव्याश्चतु-र्मासी-माराधयन्तु भावतः। येनेह परलोके स्या-दक्षयं निर्मलं सुखम् ॥ २२० ॥

## प्रशस्ति :—

जिनमहेन्द्रसूरीशा वीरपरम्परागताः। तत्करदीक्षिताः शुद्धाः, श्रीमोहनमुनीश्वराः ॥ २२१ ॥ खरतरगणोद्द्योत-कारकाः सरलाशयाः। आसन् जिनयशस्सूरी-श्वरास्तत्पादसेवकाः ॥२२२॥ राजमुनिमहाराजा-स्तेषामाज्ञानुवर्तिनः। तेषां शिष्या महाप्राज्ञाः, श्रीजिनरत्नसूरयः ॥२२३॥ पाठकलब्धिना प्रेम-मुनिगणेः समाग्रहात्। पूतस्याकारि माहात्म्यं, चतुर्मासिकपर्वणः ॥ २२४ ॥ संवद्बाणखशून्याक्षि (२००५)-वर्षे ज्येष्ठे च मेचके। अजयमेरुदुर्गे च, कृतिरियं मया कृता ॥ २२५ ॥ युग्मम् ॥

## ॥ इति श्रीचतुर्मासी-पर्व-व्याख्यानम् समाप्तम् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





# (११) अथ पर्युषणाष्टाह्निका-व्याख्यानम् ।

महावीरं प्रभुं नत्वा, विश्वविश्वप्रकाशकम् । मया पर्युषणाष्टाह्नि-काया व्याख्यानमुच्यते ॥ १ ॥ इह सकलदुष्कर्म-वारिणीह भवान्तरे । भूरिसुखाकरे शुद्ध-धर्मकर्मविधायिनि ॥ २ ॥ इन्द्राः सर्वे समायाते, पर्युषणादिपर्वणि । एकीभूयाष्टमे नन्दी-श्वरद्वीपे मनोहरे ॥ ३ ॥ धर्मस्य महिमानं हि, कर्त्तुं गच्छन्ति तस्य च । मध्यभागे चतुर्दिक्षु, चत्वारोऽञ्जनपर्वताः ॥ ४ ॥ त्रिभिर्विशेषकम् ॥ दशसहस्रविष्कम्भा-यामा मूले तथोपरि । सहस्रमेकमुच्चैश्च, पञ्चाशीतिसहस्रकाः (८५०००) ॥ ५ ॥ प्रत्येकं तच्चतुर्दिक्षु, चतस्रो वापिका वराः । लक्षायामाश्च विष्कम्भा-ऽर्द्धलक्षयोजनाः खलु ॥६॥ षोडश वापिका मध्यै-कैकत्वेन मनोहराः । दधिमुखाभिधाः श्वेताः, षोडश पर्वताः पुनः ॥७॥ रतिकराभिधा रक्ता, द्वात्रिंशत्पर्वतास्तथा । द्वौ द्वौ वाप्यन्तरत्वेन, वनादिभिर्विभूषिताः ॥ ८ ॥ द्विपञ्चाशन्नगाः सर्वे, सन्त्येकैकनगोपरि । एकैकं शाश्वतं चैत्यं, चतुर्द्वारं सुसुन्दरम् ॥ ९ ॥ सञ्जातानि द्विपञ्चाश-चैत्यानि तत्र मन्दिरे । प्रत्येकं जिनबिम्बानां, चतुर्विंशाधिकं शतम् ॥ १० ॥ सर्वेषां जिनबिम्बानां, षट्सहस्रं चतुःशतम् । अष्टचत्त्वारिंशत्सर्व-सङ्कलनाद्भवन्ति च ॥ ११ ॥ कुर्वन्ति देवदेवीभिः, सार्द्धं तत्र च वासवाः । प्रवर्द्धमानभावेन, श्रेष्ठमष्टाह्निकोत्सवम् ॥ १२ ॥ जलचन्दन-सत्पुष्प-धूपदीपाक्षतैः फलैः । नैवेद्यैर्जिनबिम्बानि, शुभैः सम्पूजयन्ति ते ॥ १३ ॥ जिनगुणाँश्च गायन्ति, ते विदधति



For Private and Personal Use Only

नाटकम् । इत्थं महोत्सवं कृत्वा, निजस्थानं प्रयान्ति ते ॥ १४ ॥ एवं श्राद्धैरपि श्रीम-त्तीर्थङ्करप्रकाशिते । पर्वण्य-स्मिन्समायाते, कार्यो यत्नो हि धर्मणि ॥ १५ ॥ पञ्चाश्रवकषायाणां, रोधं कुर्यादुपासकः । अत्र सामायिकं पूजां, तपस्यां भावनादिकम् ॥ १६ ॥ द्वीन्द्रियादिकजीवानां, परित्याज्या विराधना । यतो हि सर्वदानेषु, प्रधानमभयं जने ॥ १७ ॥ यथा चोक्तं सूत्रकृताङ्गे—"दाणाण सेट्ठं अभयप्पयाणं" मिति । अन्यत्रापि प्रोक्तं—"दीयते म्रियमाणस्य, कोटिं जीवितमेव च । धनकोटिं न गृह्णीया-त्सर्वो जीवितुमिच्छति ॥ १८ ॥" अपि च—"यो दद्यात्काञ्चनं मेरुं, कृत्स्नां चैव वसुन्धराम् । एकस्य जीवितं देया-न्नहि तुल्यमहिंसया ॥ १९ ॥" अभयदानमाहात्म्य-ख्यापनार्थं कथो-च्यते । यथाऽरिदमनो राजा, वसन्तपुरपत्तने ॥ २० ॥ पञ्च राज्योऽभवंस्तस्य, चतस्रोऽत्यन्तवल्लभाः । एकाऽस्त्यमा-निता राजा, स्वप्रासादे स्थितोऽन्यदा ॥ २१ ॥ तस्मिन्नवसरेऽस्त्येको, राजमार्गेण तस्करः । नीयमानः सहमानो, विविधां च विडम्बनाम् ॥ २२ ॥ तं तस्करं चतुष्पत्नी-युतो भूपो व्यलोकयत् । किमकार्यमनेनाका-रीत्यपृच्छ-न्नृपप्रियाः ॥ २३ ॥ एकेनोक्तं तदाऽनेना-ऽन्यद्रव्यहरणं कृतम् । तेनायं नीयते वध्य-स्थाने वधाय तस्करः ॥२४॥ जातकृपाऽथ राज्ञ्येका, पूर्वदत्तं वरं नृपात् । मार्गयित्वा गृहे चैकं, दिनमुपचचार तम् ॥ २५ ॥ आद्येऽह्नि स्नान-वस्त्राल-ङ्कारभोज्यादिभिस्तया । सम्मानितः स दीनार-सहस्रव्ययतो भृशम् ॥ २६ ॥ द्वितीयैवं तृतीया च, चतुर्थी भूपतिप्रिया । दशसहस्रलक्षैक-कोटिनिष्कव्ययात् क्रमात् ॥ २७ ॥ दिनचतुष्टयं यावत्, सच्चकाराथ पञ्चमी । दुर्भगा पञ्चमे घस्रे, नृपपार्श्वे समेत्य च ॥ २८ ॥ नृपाद्विनयमात्रेण, याचयित्वा च तस्करम् । गृहमानीय सामान्य-भोजनेन प्रभोज्य तम् ॥ २९ ॥ प्रदत्तं जीवितं तुभ्यं, मा कार्षीस्त्वमतः परम् । चौर्यमिति निगद्यैनं, स्वगृहे विससर्ज सा



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





॥ ३० ॥ चतुर्भिः कलापकम् ॥ स्वस्थानं हर्षितः सोऽपि, ययौ वादोऽभवत्ततः । न्यूनाधिकोपकारेषु, राज्ञीमध्ये परस्परम् ॥ ३१ ॥ भूपेनाकारितश्चौरः, सोऽपि जगाद भूपते ! । यावच्चतुर्दिनं ज्ञातं, किमपि न सुखं मया ॥ ३२ ॥ अद्य तु पञ्चमीराज्ञी-मुखाच्छ्रुत्वाऽभयं सुखम् । अनुभवाम्यतोऽस्त्यस्या, उपकारो महान्मयि ॥ ३३ ॥ सर्वैरपि निशम्येदं, तद्वचः सा प्रशंसिता । पट्टराज्ञी कृता राज्ञा-ऽतोऽभयदानमुत्तमम् ॥३४॥ खण्डनपेषणस्नान-वस्त्रक्षालनलिम्पनम् । आरम्भं वर्जयेच्छ्राद्ध-स्तथा पूतेऽत्र पर्वणि ॥ ३५ ॥ तैलिकलोहकृद्भ्राष्ट्र-प्रमुखकर्मकारिणाम् । निवारणीय आरम्भो, शक्त्या वाचा धनव्ययात् ॥ ३६ ॥ स्वशक्त्या बन्दिमोक्षश्च, कार्यो ग्रामे पुरे पुनः । अमारीघोषणा श्राद्धै-र्विधातव्याऽत्र पर्वणि ॥ ३७ ॥ पर्वण्यत्र मृषावादो, गालिदानं वचोऽप्रियम् । न वाच्यं किन्तु निष्पापं, हितं मितं प्रियं वचः ॥ ३८ ॥ वर्जनीयं परद्रव्य-ग्रहणं धनमस्ति हि । बाह्यप्राणतया जन्तु-मरणकष्टकारणम् ॥ ३९ ॥ स्वस्त्रीसङ्गोऽत्र सन्त्याज्यः, पाल्यं शीलं च सर्वथा । परस्त्रीसेवनं त्याज्यं, निन्द्यं लोकद्वयेऽपि हि ॥ ४० ॥ परिमाणं पुनः कार्यं, नवविधपरिग्रहे । नैवापरिमिता तृष्णा, धार्या सन्तोषधारिभिः ॥ ४१ ॥ रागद्वेषकषाया न, सनिमित्तानिमित्तयोः । कर्त्तव्याः स्वान्ययोस्तुल्य-परिणतिविधायिभिः ॥४२॥ यतश्चोक्तं—"कोहो पिइं पणासेइ, माणो विणयनासणो । माया मित्ताणि नासेइ, लोहो सव्वविणासणो ॥ ४३ ॥" अभ्याख्यानं च पैशून्यं, कलहादिकमत्र हि । ते सर्वे दूरतस्त्याज्याः, ये कर्मबन्धहेतवः ॥ ४४ ॥ पुनः सामायिकं कार्य-मवश्यमत्र तद्भवेत् । रागद्वेषपरित्यागात्, प्राणिसमत्वधारणात् ॥ ४५ ॥ उक्तं च—"समता सर्वभूतेषु, संयमः शुभभावना । आर्त्तरौद्रपरित्याग-स्तद्धि सामायिकं व्रतम् ॥ ४६ ॥" "दिवसे दिवसे लक्खं, देइ सुवण्णस्स खंडियं एगो । एगो पुण सामाइयं, करेइ न पहुप्पए तस्स



For Private and Personal Use Only

॥ ४७ ॥" देशावकाशिकं कार्यं, श्राद्धैस्तद्धि विधाय च। गृहीतव्रतसंक्षेपं, सामायिकं विधीयते ॥ ४८ ॥ सामायिकद्वयं ज्ञेयं, तच्च जघन्यतः पुनः। श्राद्धैरुत्कृष्टतः पञ्च-दश (१५) सामायिकं भवेत् ॥ ४९ ॥ तथा चोत्कृष्टदेशावकाशिके सकलक्रिया। ज्ञेया पौषधवत्तद्धि, श्रुक्तैरपि विधीयते ॥ ५० ॥ धर्मपुष्टिकरं श्राद्धै-र्विधेयं पौषधव्रतम्। आहार-तनुसत्कारा-व्यापारा-ब्रह्मवर्जनम् ॥ ५१ ॥ तत्फलं यथा—"पोसहिय सुहे भावे, असुहाइं खवेइ नत्थि संदेहो। छिंदइ निरयतिरियगई, पोसहविहिअप्पमत्तेणं ॥५२॥" श्रावकैः पौषधाशक्तैः, स्नात्रादिद्रव्यपूजनम्। पर्वण्यत्र विधातव्यं, यतनाविधिपूर्वकम् ॥ ५३ ॥ तत्फलं यथा—"सयं पमज्जणे पुन्नं, सहस्सं च विलेवणे। सयसाहस्सिया माला, अणंतं गीयवाइए ॥ ५४ ॥" द्रव्यपूजाक्षणे श्राद्धै-र्मनोवाक्कायशुद्धितः। जिनावस्थात्रयं चित्ते, चिन्तनीयं सदाशयैः ॥ ५५ ॥ तथाहि—"ह्वणऽच्चणेहिं छउमत्थ, वत्थपडिहारगेहिं केवलियं। पलियंकुस्सग्गेहि य, जिणस्स भाविज्ज सिद्धत्तं ॥ ५६ ॥" द्रव्यपूजनसामर्थ्य-भावे भावार्चनं जनैः। जिनेन्द्रदर्शनं कार्यं, चैत्यवन्दनपूर्वकम् ॥ ५७ ॥ तत्फलमिदं—"दर्शनाद् दुरितध्वंसी, वन्दनाद्वाञ्छितप्रदः। पूजनात्पूरकः श्रीणां, जिनः साक्षात्सुरद्रुमः ॥५८॥" श्रीजिनदर्शनादेव, बहूनां प्राणिनां पुनः। आर्द्रकुमारवद्बोधि-बीजावाप्तिर्भवेद्यथा ॥५९॥ अस्मिँश्च भरतक्षेत्रे, समुद्रतीरसंस्थितः। आर्द्रकम्लेच्छदेशोऽस्ति, तत्रार्द्रकपुरं वरम् ॥ ६० ॥ तत्रार्द्रकनृपस्तस्या-ऽऽर्द्रिकाराज्ञी तयोः सुतः। अभूदार्द्रकुमारश्च, दाता भोगी सुखी स च ॥ ६१ ॥ श्रेणिकेन समं तस्य, राज्ञः परम्परागता। बभूव परमा प्रीति-रविच्छिन्ना परस्परम् ॥ ६२ ॥ एकदा प्रगुणीकृत्य, प्राभृतं श्रेणिको नृपः। आर्द्रकभूपतेः पार्श्वे, सम्प्रैषीन्निजमन्त्रिणम् ॥६३॥ तेन गत्वा नृपं नत्वा-ऽऽनीतं प्राभृतमर्पितम्। क्षेमकुशलवार्ताऽभू-द्भूपतिमन्त्रिणोर्मिथः ॥ ६४ ॥ तस्मिन्नवसरेऽपृच्छदार्द्र-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





कुमारको नृपम्। कः? श्रेणिकः समं येन, प्रीतिरस्ति तवेदृशी ॥६५॥ सोऽवग् मगधदेशस्य, स्वामी श्रेणिकभूपतिः। तत्कुले मत्कुले प्रीति-रस्ति परम्परागता ॥ ६६ ॥ एतत्पितृवचः श्रुत्वा-ऽऽर्द्रकुमारो नृपाज्ञया। जगाद मन्त्रिणं राज्ञ-स्ते कोऽप्यस्ति? गुणी सुतः ॥ ६७ ॥ मैत्र्यं तेन समं कुर्वे, मन्त्र्युवाच मम प्रभोः। सुतोऽभयकुमारोऽस्ति, स च सर्वकलानिधिः ॥६८॥ सर्वबुद्धिसमुद्रोऽस्ति, मन्त्रिपञ्चशतीप्रभुः। दयावान् गुणवान्दाता-ऽतिदक्षो निर्भयः पुनः ॥६९॥ कृतज्ञो जैनधर्मज्ञ, इत्थं निशम्य तद्वचः। आर्द्रोऽमात्यमवादीद्भो!, त्वं गच्छेः स्वपुरं यदा ॥७०॥ मिलनीयं तदाऽवश्यं, तेनापि स्वीकृतं वचः। स घस्रान् कियतस्तत्र, स्थितो राज्ञः समाग्रहात् ॥७१॥ त्रिभिर्विशेषकम् ॥ ततो विसर्जितो राज्ञा, कुमारोऽप्यथ हर्षितः। मन्त्रिणः प्राभृतं दत्वा-ऽवदत्सम्मानपूर्वकम् ॥७२॥ अभयाय त्वया दत्वा, प्राभृतं मद्वचो वदेः। इच्छत्यार्द्रकुमारो हि, भवता सह मित्रताम् ॥७३॥ राजदत्तनरं सार्थे, लात्वा प्रचलितः क्रमात्। सोऽपि राजगृहं गत्वा, नृपाय प्राभृतं ददौ ॥७४॥ आर्द्रकुमारदत्तं तत्, प्राभृतमभयाय सः। दत्वा तद्दत्तसन्देशं, मैत्रिसत्कमुवाच च ॥७५॥ जिनशासनदक्षः सो-ऽभयस्तदा व्यचिन्तयत्। जातो ह्ययमनार्येषु, श्रामण्यस्य विराधनात् ॥७६॥ परं स राजपुत्रोऽस्त्या-सन्नभव्यो यतो मया। सार्द्धमभव्यदुर्भव्य-मैत्रीच्छा स्यात्कदाऽपि न ॥७७॥ ततः केनाप्युपायेना-र्हद्धर्मे प्रतिबोध्य तम्। प्रवर्त्तयाम्यहं तत्रो-पायोऽयं खलु विद्यते ॥७८॥ प्राभृतच्छलतस्तस्मै, तत्रार्हत्प्रतिमां यदि। प्रेषयामि यदा स्यात्त-द्दर्शनात्प्रतिबोधितः ॥७९॥ मम तदेष्टसिद्धिः स्या-दिति विचार्य रात्निकाम्। प्रतिमामादिनाथस्य, प्रातिहार्यादिराजिताम् ॥८०॥ पेट्यां संस्थाप्य तत्पूजा-द्युपकरणसंयुताम्। अभयस्तालकं दत्वा, मुद्रिता सा स्वमुद्रया ॥ ८१ ॥ त्रिभिर्विशेषकम् ॥ आर्द्रराजनरस्यैव, स्वदेशं गच्छतः करे। समर्प्य पेटिकां तां तं, सत्कृत्य चाभयोऽवदत् ॥ ८२ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पेटैषाऽऽर्द्रकुमारस्य, पुरस्त्वयोपढौक्यताम्। तथेदं तस्य मद्बन्धो-र्वक्तव्यं स्नेहपूर्वकम् ॥ ८३ ॥ त्वयैकान्तप्रदेशे हि, संस्थाप्यैकाकिना स्वयम्। पेटामुद्घाट्य द्रष्टव्यं, तदन्तर्गतवस्तुकम् ॥८४॥ अन्यस्य कस्यचिन्नैव, दर्शनीयं ततः पुमान्। सोऽभयोक्तं वचश्चाङ्गी-कृत्य स्वनगरं ययौ ॥ ८५ ॥ अभयदत्तमादाय, तेन प्राभृतमर्पितम्। प्रोक्तस्तदुक्तसन्देशो-ऽथा-गृहीत्तां स पेटिकाम् ॥८६॥ गत्वैकान्ते स उद्घाट्य, तां तद्गतां विलोक्य च। प्रतिमामादिदेवस्य, तमस्युद्द्योत-कारिणीम् ॥८७॥ स्वचित्ते चिन्तयामास, किमिदं ? किञ्चिदुत्तमम्। देहाभरणमस्त्येत-न्मूर्ध्नि कण्ठेऽथवा हृदि ॥८८॥ समारोप्यं ? किमन्यत्र-कुत्रचिद्वा प्रधार्यते ?। दृष्टपूर्वमिव क्वापी-दं मां च प्रतिभासते ॥ ८९ ॥ त्रिभिर्विशेषकम् ॥ परं स्मृतिपथं नैती-त्थं विचिन्तयतो भृशम्। तस्य जातिस्मृतिज्ञान-मुत्पन्नं भवदर्शकम् ॥ ९० ॥ ततः स चिन्तयामास, पूर्वभवकथां निजाम्। इतो भवात्तृतीये च, मगधाविषये वरे ॥९१॥ वसन्तनगरेऽभूवं, सामाजिकः कुटुम्बिकः। अहं बन्धुमती भार्या, सत्युत्तमा ममाभवत् ॥९२॥ एकदा सुस्थिताचार्य-पार्श्वे धर्मं निशम्य च। बन्धुमत्या समं दीक्षां, वैराग्यादहमाददे ॥९३॥ क्रमेण गुरुभिः सार्द्धं, विहरन्नहमेकदा। एकस्मिन् पत्तनेऽगां सा, बन्धुमत्यपि चाययौ ॥९४॥ एकस्मिन्नह्नि तां पश्यन्, पूर्वभोगान्स्मरन्नहम्। तस्यामनुरतोऽभूव-माख्यां तच्चान्यसाधवे ॥९५॥ सोऽप्याचख्यौ प्रव-र्त्तिन्यै, साऽपि तस्यै तदाऽवदत्। बन्धुमती विषण्णा च, सती निजप्रवर्त्तिनीम् ॥ ९६ ॥ गीतार्थोऽप्येष मर्यादां, यदि लङ्घेत का गतिः ?। तदाऽसौ मां गतां देशा-न्तरे श्रोष्यति यावता ॥ ९७ ॥ तावन्मोहप्रभावात्त-द्रागो मयि न यास्यति। करिष्येऽनशनं पूज्ये-ऽत्र परत्र सुखावहम् ॥९८॥ येन मे नैव नाप्यस्य, जायते शीलखण्डनम्। इत्युक्त्वाऽ-नशनं कृत्वा, मृत्वा च सा दिवं ययौ ॥९९॥ ततो मया मृतां श्रुत्वा, तां चिन्तितं च निश्चितम्। व्रतभङ्गभियेयं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





हि, महानुभाविका मृता ॥१००॥ अहन्तु व्रतभग्नोऽतो, जीवितेन ममाप्यलम् । तदाऽहमपि मृत्वा च, देवोऽभूवं समाधिना ॥१०१॥ ततश्च्युत्वाऽहमुत्पन्नो-ऽत्रानार्ये धर्महीनकः । यत्र सद्धर्मशब्दोऽपि, निशम्यते कदापि न ॥१०२॥ भाग्योदयेन केनापि, येनाहं प्रतिबोधितः । सैवाभयकुमारोऽस्ति, पूज्यो बन्धुर्गुरुश्च मे ॥१०३॥ अद्यापि मन्दभाग्योऽस्मि, यतस्तं द्रष्टुमक्षमः । तस्मात्तातमनुज्ञाप्य, यास्यामि यत्र मे गुरुः ॥१०४॥ इत्थं मनोरथं कुर्वन् , पूजयन्प्रतिमां प्रभोः । स दिनान् गमयामास-कदा व्यजिज्ञपन्नृपम् ॥१०५॥ हे तात ! द्रष्टुमिच्छामि, स्वमित्रमभयं तदा । नृपोऽवदत्त्वया कार्या, गमनेच्छा हि तत्र न ॥१०६॥ अस्माकमपि हि स्थान-स्थितानां श्रेणिकेन च । सहास्ति मित्रताऽत्रैव, कार्या तेन समं त्वया ॥१०७॥ तदा पित्राज्ञया बद्ध, उत्कण्ठितोऽभयं प्रति । न जगाम न च तस्था-वासने शयने पुनः ॥१०८॥ पाने वा भोजनेऽन्यासु, सर्वक्रियासु नेत्रयोः । पुरस्ताच्च दिशा चक्रे, नित्यं मन्त्र्यभयाश्रिताम् ॥ १०९ ॥ युग्मम् ॥ कीदृशा ? मगधा राज-गृही च कीदृशी पुनः । तत्रास्ति ? गमने कस्को !, मार्गः पप्रच्छ सो जनान् ॥११०॥ विज्ञाय तदभिप्रायं, दध्यौ भूपः कदाऽप्ययम् । कुमारो मामनापृच्छ्य, गमिष्यत्यभयं प्रति ॥१११॥ अतो यत्नो मया कार्य-स्तत इत्यादिशन्नृपः । पञ्चशतभटान् गच्छे-दयं देशान्तरं यदि ॥११२॥ युष्माभिः स तदा वार्य-स्तत्पार्श्वं न त्यजन्ति ते । देहधृतमिवामंस्त, निजात्मानं कुमारकः ॥११३॥ युग्मम् ॥ ततोऽभयसमीपे हि, गमनमवधार्य सः । आर्द्रः प्रत्यहमारेभे, विधातुमश्ववाहनम् ॥११४॥ ते सामन्ताः स्थिताः पार्श्वे-ऽश्वारूढा अङ्गरक्षकाः । कुमारो वाहयन्नश्वं, किञ्चिदग्रे च गच्छति ॥११५॥ ततो निवर्त्तते चैवं, नित्यमश्वं स वाहयन् । तेभ्यः समधिकं गत्वा, व्याघुट्य पुनरेति च ॥११६॥ इत्थं तेषां हि विश्वासं, समुत्पाद्यान्यदा स च । समुद्रे प्रगुणं पोतं, कारयित्वा निजैर्नरैः ॥११७॥ तच्च प्रपूर्य रत्नौघै-



For Private and Personal Use Only

रारोप्य प्रतिमां प्रभोः। स वाहयंस्तथैवाश्व-दूरयानात्तिरोदधे ॥११८॥ युग्मम्॥ ततः स पोतमारुह्य, गत्वाऽऽर्यविषयं पुनः। पोतादुत्तीर्य सम्प्रेष्य, प्रतिमामभयं प्रति ॥११९॥ सप्तक्षेत्र्यां धनान्युप्त्वा, मुनिवेषं प्रगृह्य च। उच्चारयितुमारेभे, यावत्सामायिकं मुदा ॥१२०॥ आकाशस्थितया देव्या, तावदुच्चैःस्वरेण च। प्रोक्तं यद्यप्यसि त्वं हि, महासत्त्वशिरोमणिः ॥१२१॥ तथाऽपि साम्प्रतं दीक्षां, मा ग्रहीरधुनाऽपि ते। भोग्यकर्मास्ति तद् भुक्त्वा, गृह्णीयाः समये व्रतम् ॥१२२॥ भोग्यकर्म यतस्तीर्थ-ङ्कराणामपि निश्चितम्। भोक्तव्यं का कथाऽन्येषां, त्वलं तेन व्रतेन हि ॥१२३॥ यस्त्यज्यते समादत्त-मपि भुक्तेन तेन किम्?। वम्यते यद्व्रतं चेत्थं, निषिद्धो बहुधा स च ॥१२४॥ तथाऽप्यादृत्य पौरुष्यमनादृत्य सुरीवचः। स च प्रत्येकबुद्धत्वा-त्स्वयं समाददे व्रतम् ॥१२५॥ सोऽथ मुनिव्रतं तीक्ष्णं, पालयन् विहरन् भुवि। अन्यदा गतवान् रम्यं, वसन्तपुरपत्तनम् ॥ १२६ ॥ देवकुले स कस्मिंश्चित्, कायोत्सर्गेण संस्थितः। इतस्तस्मिन् पुरे श्रेष्ठी, देवदत्ताभिधोऽजनि ॥१२७॥ तस्य धनवती भार्या, च्युत्वा चाथ सुरालयात्। सोऽभूद्बन्धुमतीजीवः, श्रीमत्याख्या सुता तयोः ॥१२८॥ क्रमेण सा रजःक्रीडो-चितं प्राप वयोऽन्यदा। तत्र देवकुले सार्द्धं, कन्याभिः श्रीमती ययौ ॥१२९॥ तत्र च रन्तुमारेभे, पतिवरणक्रीडया। सर्वाः कन्यास्तदोचुर्हि, भर्त्तारं वृणुतेति च ॥१३०॥ ततः कयाऽपि, कोऽपीत्ये-वं स्वरुच्या वराः वृताः। सर्वाभिः श्रीमती प्राह, पूज्योऽयं च वृतो मया ॥१३१॥ तदा साधु वृतं साधु वृतमित्यवदत्सुरी। तत्र हि सैव गर्जन्ती, रत्नादिकान्यवर्षयत् ॥१३२॥ श्रीमती गर्जिताद्भीता, सा मुनेश्चरणेऽलगत्। क्षणमात्रं मुनिस्तत्र, स्थित्वा चित्ते व्यचिन्तयत् ॥१३३॥ इह मे तस्थुषो जात, उपसर्गोऽनुकूलः। अतो न स्थेयमत्रेति, विचिन्त्यान्यत्र सोऽगमत् ॥१३४॥ तदा चास्वामिकं द्रव्यं, राज्ञ एवेत्यवेत्य च। आदातुं तद्धनं राज्ञा, प्रेषिताः पुरुषा



For Private and Personal Use Only

निजाः ॥१३५॥ ते गत्वा तद्वनस्थानं, ददृशुर्नागसङ्कुलम्। तन्निशम्य नृपस्तत्र, समाययौ कुतूहलात् ॥१३६॥ देव्या प्रोक्तमिदं चास्यै, श्रीमत्यै वरकेऽर्पितम्। इति श्रुत्वा विलक्षः सन्, स्वस्थानं भूपतिर्ययौ ॥१३७॥ श्रीमतीजनकोऽप्येतद्धनं सर्वं लब्धौ ततः। श्रीमतीं यौवनं प्राप्तां, परिणेतुमगुर्वराः ॥१३८॥ पित्रा पुत्र्यै स्वरूपं तत्, प्रोक्तं सा प्राह हे पितः!। मया वृतो महर्षिर्यो, ज्ञेयः स एव मे वरः ॥१३९॥ वरणे सुरीदत्तं स्वं, गृह्णता भवताऽपि सन्। अनुमतं ततोऽन्यस्मै, न मां त्वं दातुमर्हसि ॥१४०॥ यत उक्तं—“सकृज्जल्पन्ति राजानः, सकृज्जल्पन्ति साधवः। सकृत्कन्याः प्रदीयन्ते, त्रीण्येतानि सकृत्सकृत् ॥ १४१ ॥” इति श्रुत्वाऽवदच्छ्रेष्ठी, चैकत्र नावतिष्ठते। भ्रमर इव सम्भ्राम्यन्, स साधुः प्राप्यते? कथम् ॥ १४२ ॥ आयास्यति न वा सोत्रा-यातोऽपि ज्ञायते कथम्?' किमपि तदभिज्ञानमस्ति? साप्यवददिपितः! ॥१४३॥ गर्जितभीतया तस्मिन्, दिने पादविलग्नया। मुनेश्चिन्हं मया दृष्ट-मतः परं तथा कुरु ॥१४४॥ यथा प्रतिदिनं याता-नायातांश्चाखिलान्मुनीन्। पश्याम्यथावदच्छ्रेष्ठी, ये केऽप्यायान्ति साधवः ॥१४५॥ त्वं स्वयं प्रत्यहं तेभ्यो, भिक्षां देहि दिदृक्षया। सर्वेषां दर्शनं स्यात्ते, ततस्तथैव साऽकरोत् ॥१४६॥ युग्मम् ॥ पश्यन्ती लक्षणं तस्य, मुनिपादानवन्दत। स मुनिर्द्वादशे वर्षे, दिङ्मूढस्तत्र चागतः ॥ १४७ ॥ तच्चिह्नदर्शनेनासौ, तयोपलक्षितोऽथ सा। तं प्राह नाथ! यस्तत्र, मया वृतस्त्वमेव सः ॥ १४८ ॥ भाग्यैरधुनाऽऽयातोऽसि, मां मुक्त्वा हि क्व यास्यसि?। यदा त्वं दृष्टनष्टोऽभू-रारभ्य तद्दिनात्खलु ॥१४९॥ दुःखेन मम कालोऽगा-त्तस्मात्कृपां विधाय माम्। अङ्गीकुर्वन्यथा वह्नौ, प्रवेक्ष्यामि सुनिश्चितम् ॥१५०॥ तदाऽन्यैरपि तत्पित्रा-दिभिर्महाजनैर्मुनिः। अभ्यर्थितोऽस्मरद्देवी-वचो व्रतनिषेधकम् ॥१५१॥ भोग्यकर्मोदयात्सोऽपि, श्रीमतीं परिणीतवान्। तस्य तया समं भोगान्, भुञ्जानस्य

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुतोऽजनि ॥१५२॥ क्रमेण वर्द्धमानोऽसौ, राजशुक इवाभवत् । वक्तुं समुल्लसज्जिह्व-स्तावान्स तनुजोऽजनि ॥१५३॥ तदा चार्द्रकुमारेण, कथितं श्रीमतीं प्रति । अतः परं सुतस्तेऽस्तु, साहाय्यः प्रव्रजाम्यहम् ॥१५४॥ तदा बुद्धिमती सा तु, ज्ञापयितुं सुतं प्रति । कर्पाससहितं तर्कु-मादाय समुपाविशत् ॥१५५॥ प्रसूं स बालको दृष्ट्वा, कुर्वाणां तूलकर्त्तनम् । पप्रच्छाऽम्ब ! त्वयाऽऽरब्धं ?, किं कर्म पामरोचितम् ॥१५६॥ सोचे सुत ! पिता ते त्वां, मां च त्यक्त्वा मुनेः पथि । गन्तुमनोऽस्ति यातेऽस्मिँ-स्तर्कुशरणमेव मे ॥१५७॥ तदा बालोऽवदद्बाल्या-न्मन्मनाक्षरतः कथम् । यास्यति ? मे पिता बद्ध्वा, धारयिष्याम्यहं बलात् ॥१५८॥ इत्युक्त्वा तन्तुभिः पादौ, बबन्ध सोऽर्भकः पितुः । आर्द्रोऽपि मधुरं बाल-वाक्यं श्रुत्वा प्रहर्षितः ॥१५९॥ पुत्रस्नेहादुवाचैवं, स यावद्भिश्च तन्तुभिः । पादौ बद्धौ च तावन्त्य-ब्दानि स्थास्यामि सद्मनि ॥१६०॥ छोटय गणयित्वा त्वं, बन्धनान्यधुना ततः । द्वादश बन्धनान्यासन्, गणितान्यार्द्रकोऽवदत् ॥ १६१ ॥ स्थास्ये द्वादशवर्षाणि, यावदहं पुनर्गृहे । इत्युक्त्वा द्वादशाब्दानि, यावत्स चात्यवाहयत् ॥ १६२ ॥ पूर्णीभूतप्रतिज्ञोऽथ, वैराग्यपूर्णमानसः । पश्चिमे प्रहरे रात्रे-रार्द्रक इत्यचिन्तयत् ॥१६३॥ मनसैव मया पूर्वं, भवे भग्नं व्रतं ततः । प्राप्तोऽस्म्यहमनार्यत्वं, मग्नमत्र तु सर्वथा ॥१६४॥ भाविन्यतो गतिः का ? मे, गृहीत्वा साम्प्रतं व्रतम् । शोधयामि निजात्मानं, तपसा चरणेन च ॥१६५॥ विचार्येत्यार्द्रकः प्रातः, श्रीमतीं स्वप्रियां सुतम् । निजं सम्भाष्य चादाय, तयोरनुमतिं पुनः ॥ १६६ ॥ साधुवेषं समादाय, निर्ममो निर्ययौ गृहात् । अथ राजगृहं गच्छ-न्नस्त्यार्द्रकमहामुनिः ॥१६७॥ पञ्चशतस्वसामन्ताँ-श्चौर्यवृत्तिं प्रकुर्वतः । सोऽपश्यदन्तराले तै-रप्युपलक्ष्य वन्दितः ॥ १६८ ॥ युग्मम् ॥ स ताञ्जगाद युष्माभिः, किमेषा जीविकाऽऽदृता ? । अनर्थहेतुका चेह-परत्र दुर्गतिप्रदा ॥१६९॥ तैरुक्तं हे ! प्रभोऽस्माँस्त्वं,



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





वञ्चयित्वा पलायितः । तत्प्रभृति वयं राज्ञो, दर्शयामो मुखं नहि ॥१७०॥ स्वामिंस्तेऽन्वेषणे लग्ना, भ्रमन्तश्च रसातले । चौर्यवृत्त्यैव जीवामो-ऽपश्यँस्त्वामद्य भाग्यतः ॥१७१॥ मुनिर्जगाद युष्माभि-रयुक्ता वृत्तिरादृता । केनापि पुण्ययोगेन, प्राप्य मानुष्यकं वरम् ॥१७२॥ स्वर्गमोक्षप्रदो धर्मः, सेव्यः परिहृताश्रवः । यूयं स्वस्वामिभक्ताः स्थ, मार्गोऽङ्गीक्रियतां मम ॥१७३॥ ततस्ते प्रोचुरस्माकं, प्राक्स्वाम्यधुना गुरुः । दीक्षयाऽनुगृहाणास्माँ-स्ततस्ते तेन दीक्षिताः ॥१७४॥ मार्गेऽथ गच्छतस्तस्य, गोशालोऽभिमुखोऽमीलत् । चर्चां कर्तुं विलग्नोऽसौ, खेचराद्यास्तदाययुः ॥ १७५ ॥ गोशालोऽथावदद्युष्म-त्तपःकष्टं वृथा यतः । शुभाशुभफलानां हि, नियतिरस्ति कारणम् ॥१७६॥ ततो मुनिरवादीद्भो !, पौरुषमपि कारणम् । मन्यस्व यदि सर्वत्र, नियतिर्हेतु मन्यसे ॥१७७॥ तर्हि तेऽभीष्टसिद्ध्यर्थं, सर्वाः क्रिया वृथा भवेत् । नियतिमन् ! निजस्थाने, सर्वदा किं न तिष्ठसि ? ॥१७८॥ भोजनादिक्षणे यत्न-माहारार्थं करोषि ? किम् । स्वस्वार्थसिद्धये तद्व-न्मन्यस्वापरपौरुषम् ॥१७९॥ अर्थसिद्धौ च पौरुष्य-स्याधिक्यं नियतेरपि । अस्ति जलमाकाशात् । मपतति स्वभावतः ॥१८०॥ परं भूखननादावि-र्भवेज्जलं बलीयसी । नियतिः पौरुषं ज्ञेयं बलिष्ठं नियतेरपि ॥१८१॥ एवं मुनिः स गोशालं, निरुत्तरीचकार हि । खेचराद्यैस्तदा तस्य, प्रशंसा विहिता मुनेः ॥१८२॥ तत आर्द्रमुनिर्हस्ति-तापसाश्रमपार्श्वके । आययौ तत्र बद्धोऽस्ति, वधाय तापसैर्गजः ॥१८३॥ ते मन्यन्ते गजं हत्वा, भुञ्जानास्तत्पलं पुनः । व्यतीयन्ते बहून् घस्राँ-स्तस्माद्गजवधो वरः ॥१८४॥ तेनैकजीवघातेन, भूयान्कालोऽतिगम्यते । मृगतिचिरमत्स्याद्यै-र्धान्यैर्न बहुभिस्तथा ॥१८५॥ तस्मात्तद्भक्षणं युक्तं, न बहुपापसम्भवात् । यत्र हि शृङ्खलाबद्धो, गजराजः स तिष्ठति ॥१८६॥ तत्र चाजग्मुरभ्यर्णे, स मुनिः करुणानिधिः । मुनिः पञ्चशतीयुक्तो, वन्द्यमानो घनैर्जनैः ॥१८७॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





युग्मम् ॥ स गजो लघुकर्मत्वा-न्मुनिं दृष्ट्वा व्यचिन्तयत् । महर्षिमहमप्येनं, वन्देयं पापनाशकम् ॥ १८८ ॥ यदि बद्धो भवेयं न, बद्धस्तु करवाणि ? किम् । एवं चिन्तयतस्तस्या-यःशृङ्खला व्यसीर्यत ॥१८९॥ निरर्गलो गजः सोऽथा-ऽभ्यागाच्छन्तुं मुनीश्वरम् । दृष्ट्वाऽभिमुखमायान्तं, लग्ना लोकाः पलायितुम् ॥१९०॥ महर्षिस्तु तथैवास्था-न्मन्त्रोक्तस्थिरः-स्थलः । ववन्दे मुनिमास्पृश्य, शुण्डादण्डेन तत्पदौ ॥ १९१ ॥ परमानन्दितो हस्ती, समुत्थाय व्यलोकयन् । मुनिम-व्याकुलो हृष्टो-ऽरण्यान्तों प्रविवेश च ॥१९२॥ तदाऽद्भुतप्रभावं तं, दृष्ट्वा ते तापसा गताः । प्रकोपं प्रत्यबोध्यन्त, तेनार्द्रेण महर्षिणा ॥१९३॥ ततस्तत्प्रेषिता एते, गत्वा वीरजिनेशितुः । पार्श्वे दीक्षां ललुर्व्रार्चा, शुश्राव श्रेणिकोऽपि ताम् ॥१९४॥ साभयोऽगान्नृपस्तत्र, राज्ञा मुनिः स वन्दितः । पृष्टश्च भगवन्मेऽभू-दाश्चर्यं गजमोक्षणात् ॥१९५॥ मुनिरुवाच राजन्, दुष्करं हस्तिमोक्षणम् । किन्त्वामतन्तुमोक्षं मां, दुष्करं प्रतिभासते ॥१९६॥ राज्ञोक्तं तत्कथं? स्वामिन् !, तदा स सकलां मुनिः । स्वकथां कथयामासा-ऽथाऽभयं प्रत्यभाषत ॥१९७॥ निष्कारणोपकारी त्वं, ममाभूद्धर्मबान्धवः । मित्र ! त्वत्प्रेषिताऽर्हत्यां, प्रतिमां दृष्टवानहम् ॥१९८॥ तेन जातिस्मृतिज्ञानं, प्राप्य धर्मरतोऽभवम् । स्याद्विनोपायमीदृक्षं, धर्म-प्राप्तिः ? कुतो मम ॥१९९॥ अनार्यत्वमहापङ्के, निमग्नोऽहं त्वयोद्धृतः । त्वत्प्रसादेन चारित्र-प्राप्तिरत्र ममाजनि ॥२००॥ भूपाभयकुमाराद्या, लोकाः सर्वेऽपि तं मुनिम् । नत्वाऽऽनन्दितचेतस्काः, स्वस्वस्थानं ययुस्ततः ॥ २०१ ॥ राजगृहपुरा-भ्यर्णा-ऽऽयातं वीरजिनेश्वरम् । नत्वा संसेव्य तत्पादौ, सफलीकृत्य जन्म च ॥२०२॥ क्रमेणायुःक्षये प्राप्त, आर्द्रो महामुनिः शिवम् । जिनदर्शनमाहात्म्ये, प्रोक्तमार्द्रनिदर्शनम् ॥२०३॥ एवं भव्यैः सदा कार्यं, जिनपूजनदर्शनम् । यतो बोधिमहालाभः, शुभो भवे भवे भवेत् ॥ २०४ ॥ पुनश्चतुर्थषष्ठाष्ट-मादितपोऽत्र पर्वणि । कार्यं सुयशाभूप, इवावश्य-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





मुपासकैः ॥ २०५ ॥ तथाहि-अयोध्यायां महापुर्यां, सूर्ययशा नृपोऽजनि। स च त्रिखण्डभूस्वामी, नीतिज्ञोऽखण्ड-शासनः ॥२०६॥ इन्द्रदत्तशिरोरत्न (मुकुट)-प्रभावेण नृपोऽजनि। सुरसेव्यो जयश्रीस्तत्, पट्टराणी पतिव्रता ॥२०७॥ चतुष्पर्वीं विशेषेणा-ऽष्टमीं चतुर्दशीं नृपः। तपःपौषधाद्यैश्चा-राधयामास शक्तितः ॥२०८॥ जीवितादरवत्पर्वी-दरोऽस्त्यस्य च चेतसि। जीवितादपि तेनासौ, चतुष्पर्वाणि रक्षति ॥२०९॥ सौधर्मेन्द्रः सुधर्माख्य-सभासंस्थित एकदा। ज्ञानात्तन्निश्चयं ज्ञात्वा, प्राप महाचमत्कृतिं ॥२१०॥ तदा दृष्ट्वोर्वशीदेव्य-ऽकस्माच्छिरःप्रकम्पनम्। प्रोवाच साम्प्रतं स्वामिन्!, शिरःकम्पः कथं कृतः ॥ २११ ॥ तत्कारणं तु नैवात्र दृश्यतेऽथ जगाद सः। ज्ञानान्मयाऽधुना पौत्रो, भरते ऋषभप्रभोः ॥२१२॥ भरतचक्रिणः पुत्रः, शूरः सूर्ययशा नृपः। अयोध्याधिपतिर्दृष्टः, सात्त्विकानां शिरोमणिः ॥२१३॥ युग्मम् ॥ स चाष्टमी-चतुर्दश्योः, पर्वणस्तपसो नहि। चलति चाल्यमानोऽपि, कृतयत्नैः सुरैरपि ॥२१४॥ निशम्याथोर्वशी शक्र-वचो विचार्य चेतसि। प्राह स्वामिन्नसि त्वं तु, युक्तायुक्तविचारकः ॥२१५॥ निश्चयं किं मनुष्येषु, श्लाघसे योऽन्नजीवकः। सप्तधातुकनिष्पन्न-देहो दुर्गन्धवासितः ॥२१६॥ स देवैरप्यचाल्योऽस्ति, कः श्रद्धातीति मत्कृतम्। गानं निशम्य केषां हि, यान्ति? न विलयं गुणाः ॥२१७॥ गत्वा तत्र व्रतात्सद्यो, भ्रंशयिष्ये तमप्यहम्। विधायेति प्रतिज्ञां सा, रम्भया सममुर्वशी ॥२१८॥ धारयन्ती स्वहस्तेन, वीणां दिवोऽवतीर्य च। अयोध्यानिकटोद्याने, चैत्ये श्रीऋषभप्रभोः ॥ २१९ ॥ मोहोत्पादकं रम्यं च, रूपं विधाय गायति। तद्गानमोहिता जाता, सर्पमृगादयोऽपि च ॥ २२० ॥ त्रिभिर्विशेषकम् ॥ निश्चलनयनास्तस्थुः, पाषाणघटिता इव। ते सर्वे प्राणिनस्तत्रै-वालेख्यलिखिता इव ॥ २२१ ॥ इतः सूर्ययशा वाह-यित्वाऽश्वं वलितस्ततः। तयोर्मधुरगानस्य, ध्वनीन् शुश्राव तत्पथि ॥ २२२ ॥



For Private and Personal Use Only

तदाऽश्वेभभटा गन्तुं, पुरो बभूवुरक्षमाः। तदाश्चर्यं समालोक्या-ऽमात्यं प्रति नृपोऽवदत् ॥ २२३ ॥ मन्त्रिन्नादसमः सौख्य-दायकोऽन्यो न दृश्यते। यद्वशात्पशवोऽप्येते, जाता ईदृग्विमोहिताः ॥२२४॥ वशीभवन्ति नादेन, भूपतिदेव-दानवाः। कामिन्याद्याश्च सर्वेऽपि, मनुजाः पशवोऽपि च ॥२२५॥ वयमपि ततश्चैत्ये, वन्दितुमृषभप्रभोः। यामस्तत्र गता एतद्-गीतकं शृणुमो वरम् ॥२२६॥ इत्थमामन्त्र्य तद्गान-मोहितो भूपतिः समम्। मन्त्रिणा जिनचैत्यान्त-र्गत्वा चकार दर्शनम् ॥ २२७ ॥ स तत्र हस्तयोर्वीणां, बिभ्रत्यौ मधुरस्वरम्। गायन्त्यौ कामभार्येव, विलोक्य द्वे कुमारिके ॥२२८॥ स्नेहचक्षुर्विमुक्तैश्च, विद्धः कामशरैर्नृपः। चिन्तयामास कस्येदं, भार्याद्वयं भविष्यति ॥२२९॥ युग्मम् ॥ ततो मुहुर्मुहुर्भूप-श्चक्षुषी प्रक्षिपँस्तयोः। प्रभुं प्रणम्य निःसृत्य, चैत्याद्बहिः समागताः ॥२३०॥ तयोः कुलादिकं ज्ञातुं, राज्ञाऽऽदिष्टश्च धीसखा। गत्वा पप्रच्छ हे कन्ये !, युवां के ? कः ? पतिर्द्वयोः ॥२३१॥ इहागमः ? किमर्थं हि, चेति ताभ्यां तदाऽकथि। विद्याभृन्मणिचूडस्या-वां पुत्र्यौ स्वः कलारते ॥२३२॥ युग्मम् ॥ स्वतुल्यं पतिमावां चा-लभमाने पुरे पुरे। चैत्यानि वन्दमाने स्वं, सफलं जन्म कुर्महे ॥ २३३ ॥ पुनर्नरभवः क्वेय-मयोध्याऽपि महापुरी। विद्यते तीर्थभूताऽऽदि-जिनकल्याणकत्वतः ॥ २३४ ॥ अतोऽत्रादिजिनं नन्तुं, चैत्ये भरतकारिते। अस्मदागमनं जातं, श्रुत्वेति धीसखाऽवदत् ॥२३५॥ ऋषभस्वामिनः पौत्रो, भरतचक्रिणः सुतः। सौम्यः सर्वकलापूर्णो, बलवानस्ति सद्-गुणो ॥२३६॥ सार्द्धं सूर्ययशोराज्ञा, युवयोः सङ्गमोऽमुना। अस्तु श्रुत्वेत्यमात्यं ते, द्वे प्रोचतुश्च मायया ॥ २३७ ॥ स्वाधीनं पतिमावां हि, पतिमन्यं न कुर्वहे। ततोऽमात्यो नृपादेशा-त्ते कन्ये इत्यवोचत ॥२३८॥ कुर्वाणो युवयोर्वाच-मन्यथा भूपतिर्मया। वार्यः श्रुत्वेति तत्रैव, भूपस्ते परिणिन्यतुः ॥ २३९ ॥ तयोः प्रीतिरसाकृष्ट-स्ताभ्यां समं च

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





भूपतिः । भुञ्जानो विविधान् भोगान्, कालं निनाय सौख्यतः ॥ २४० ॥ अथैकदा समं ताभ्यां, सन्ध्याक्षणे गवाक्षके । राजा तस्थौ तदा श्वोऽस्ति, पर्वभूताऽष्टमी तिथिः ॥२४१॥ तत्समाराधने भाव्यं, सादरैः श्रावकैरिति । पटहोद्घोषणां श्रुत्वा, रम्भा जगाद मायया ॥ २४२ ॥ प्रवाद्यते ? कथं भम्भा, स्वामिंस्तदा नृपोऽवदत् । रम्भेऽस्माकं हि तातोक्तं, पर्वाष्टमी चतुर्दशी ॥ २४३ ॥ अष्टाह्निकाद्वयं चातु-र्मासीत्रयं च वार्षिकम् । पर्युषणाभिधं सन्ति, पर्वाणीहापराणि च ॥ २४४ ॥ एतेषु पर्वघस्रेषु, स्वर्गमोक्षसुखप्रदम् । पुण्यं कृतं भवेत्तस्मात्, कार्यं कर्म शुभं जनैः ॥२४५॥ चतुष्पर्व्यां न कर्त्तव्यं, रागद्वेषकषायकम् । मात्सर्यस्त्रीसङ्गस्नाना-ऽन्यहास्यकलहादिकम् ॥२४६॥ कर्त्तव्या ममता नैव, प्रियेष्वपि धनादिषु । स्मरणादिशुभध्याने, स्थातव्यं परमेष्ठिनः ॥२४७॥ कर्त्तव्यं पौषधं सामायिकं षष्ठादिकं तपः । जिनपूजादिभिः पर्वा-राधनं च विधीयते ॥२४८॥ एतदाराधको जीवो-ऽर्जयति पुण्यपुद्गलम् । तद्भुक्त्वाऽशेषकर्माणि, सञ्चूर्य याति निर्वृत्तिम् ॥२४९॥ अतः कान्ते ! च सप्तम्यां, त्रयोदश्यां विधीयते । पटहोद्घोषणा लोक-प्रबोधाय ममाज्ञया ॥ २५० ॥ अथोर्वशी निशम्यैवं, तन्निश्चयचमत्कृता । जगौ मायाप्रपञ्चेन, मनुष्यत्वमिदं नृप ! ॥२५१॥ सर्वं राज्यमिदं रूपं, वपुर्विडम्ब्यते ? कथम् । तपसा भुंक्ष्व भोगाँस्त्वं, क्व ? पुनर्मानवो भवः ॥२५२॥ युग्मम् ॥ श्रुत्वेति भूपतिः प्राह, रे दुष्टे ! धर्मनिन्दिके ! । दृश्यते नैव वाणी ते, विद्याधरकुलोचिता ॥२५३॥ तेऽधमे ! सर्वचातुर्यं, धिग्धिग्रूपं कुलं वयः । येन त्वं जिनपूजादि-धर्मकृत्यानि निन्दसि ॥२५४॥ पुनर्नरत्वसद्रूपा-रोग्यराज्यरमादिकम् । तपसा प्राप्यते तत्को, नाराधयेद्विशारदः ॥२५५॥ धर्माराधनतो देह-विडम्बनं भवेन्नहि ! विषयैस्तु विना धर्मं, विडम्बनं हि केवलम् ॥२५६॥ तस्माद्धर्मो विधातव्यः, पुनः क्व ? मानवो भवः । व्रतधियो



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





मृगाद्या ना-हारं गृह्णन्ति पर्वसु ॥ २५७ ॥ तदाऽहं तत्कथं लामि ?, ये सर्वधर्मकारणम् । न पर्वाराधनं कुर्यु-स्तेषां ज्ञातृत्वमस्तु धिक् ॥ २५८ ॥ श्रीयुगादिजिनादिष्टं, पर्व चास्तीदमुत्तमम् । प्राणान्ते न कुर्वेऽहं, पर्व वृथा तपो विना ॥२५९॥ राज्यं प्रयातु मे प्राणाः, समग्रमपि वैभवम् । नाहं पर्वतपोभ्रष्टो, भवामि कर्हिचित्प्रिये ! ॥ २६० ॥ इत्थं क्रोधाकुलं भूपं, ज्ञात्वोर्वशी प्रकुर्वती । मोहमायामवक् स्वामिन् !, कायक्लेशो भवेन्न वः ॥ २६१ ॥ इति प्रेम-रसादेव, प्रोक्तमेतद्वचो मया । तस्मात्क्रोधक्षणो नैवा-त्रास्ति कुरु क्षमां मयि ॥ २६२ ॥ आवाभ्यां पितृवाक्येन, विमुखीभ्यां नरेश्वरः । वृतः स्वच्छन्दचारी च, पराधीनतया नहि ॥२६३॥ प्राक्कर्मपरिपाकात्त्वं, साम्प्रतं च वृतो वरः । तेनावयोर्गतं शीलं, सर्वं सांसारिकं सुखम् ॥२६४॥ यदि स्वाधीनपुंस्त्रीणां, योगो भवेत्तदा सुखम् । नो चेद्विडम्बनं रात्रि-दिवसयोगवत्खलु ॥२६५॥ पुरा नाभेयचैत्ये म-द्वाक्यमङ्गीकृतं त्वया । अधुना त्वत्परीक्षायै, त्वत्तो याचितवत्य-हम् ॥२६६॥ त्वन्तु स्वल्पेन कार्येण, महाक्रोधवशङ्गतः । शीलसुखोभयेनाहं, प्रभ्रष्टा त्वत्प्रसङ्गतः ॥ २६७ ॥ प्रवेशनं चितायां हि, शरणमस्तु मेऽधुना । श्रुत्वेति तद्वचो भूपो-ऽवदत्तद्वचनं स्मरन् ॥ २६८ ॥ यत्प्रोक्तं ताततातेन, तातेना-चरितं च यत् । कथं तत्तनुजो भूत्वा, नाशं करोमि ? पर्वणः ॥२६९॥ त्वं लाहि मे समग्रर्द्धिं, पृथ्वीं कोशं गजा-दिकम् । परं येन सुखं नैव, धर्मो नैव भवेत्पुनः ॥ २७० ॥ कारय तदकृत्यं मा, त्वं मत्तोऽथ विहस्य सा । जगौ सत्यवचः स्वामिन् !, भवादृशा वदन्ति हि ॥२७१॥ युग्मम् ॥ यतः पापेन येनाङ्गी-कृतवचो न पालितः । सोऽशु-चिस्तस्य भारेण, भूमिरप्यतिसीदति ॥ २७२ ॥ स्वामिस्त्वत्तो यदा कार्य-मिदमपि न सिद्ध्यति । तदा सेत्स्यति ? राज्यादि-दायकत्वं कथं खलु ॥२७३॥ पितुर्विद्याधरैश्वर्यं, त्यक्तं त्वद्धेतवे मया । किं कुर्वेऽहं भवद्राज्य-सत्कमहाविभू-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तिभिः ॥२७४॥ यदि त्वं पर्वभङ्गं न, कर्त्ताऽसि तर्हि मत्पुरः। श्रीयुगादीशप्रासादं, पातय चक्रिकारितम् ॥ २७५ ॥ तद्वाक्यश्रवणेनैव, वज्राहत इवावनौ। पपात मूर्च्छितो भूत्वा, भूपतिर्गतचेतनः ॥२७६॥ सद्यः शीतलनीरादि-सेकाद्-भूपः सचेतनः। परिजनैः कृतोऽथोचे, रम्भां स्वसम्मुखस्थिताम् ॥२७७॥ रेऽधमेयं तवाचारो, वाण्याऽऽविष्कुरुतेऽनया। स्वकुलाधमतां त्वं हि, विद्याधरसुताऽसि न ॥२७८॥ किन्तु चाण्डालपुत्री यो, देवस्त्रैलोक्यवन्दितः। लोकेशः कोऽपि तच्चैत्य-भङ्गकारः कथं भवेत् ? ॥ २७९ ॥ तस्माद्धे स्त्रि! स्वयं बद्धं, स्ववचसाऽनृणं हि माम्। कर्त्तुमन्यच्च याचस्व, धर्मलोपं विनाऽखिलम् ॥ २८० ॥ चैत्यस्य पर्वणो नाशं, सर्वथाऽहं करोमि न। श्रुत्वेति साऽप्युत्राचान्य-दन्यदिति प्रभाषतः ॥ २८१ ॥ ते वचो दूरतो याति, नेदं स्वीकुरुषे यदि। तर्हि त्वं देहि मह्यं च, छित्त्वा सुतशिरः स्वयम् ॥ २८२ ॥ युग्मम् ॥ विमृश्याथ नृपोऽवादीत्, सुलोचने! सुतो मम। मत्तोऽभवत्ततो हस्त-तले तेऽस्तु शिरो मम ॥२८३॥ इत्युक्त्वा भूपतिर्हस्ते, खड्गं लात्वा निजं शिरः। छेत्तुं यावद्विलग्नस्त-द्धारां तावद्बबन्ध सा ॥२८४॥ न पुन-स्तस्य सत्त्वस्य, ततो धाराप्रबन्धनात्। विलक्षो भूपतिः खड्गं, नवं नवं ललौ पुनः ॥२८५॥ यदाऽसौ सत्त्वतो नैवा-चालीत्ततश्च ते स्त्रियौ। स्वरूपं प्रकटीकृत्य, सादरमिदमूचतुः ॥२८६॥ जय त्वं वृषभस्वामि-कुलसागरचन्द्रमाः। जय सत्त्ववतां धुर्य!, जय चक्रीशनन्दन! ॥ २८७ ॥ अहो!! धैर्यमहो!! सत्त्वं, तेऽहो!! मानसनिश्चयः। स्वविनाशेऽपि यत्त्यक्तं, येन न स्वव्रतं मनाक् ॥२८८॥ देवेन्द्रः स्वसभायां हि, देवपुरस्तवातुलम्। राजन्! विशेषतः सत्त्वं, प्रशशंस यथातथम् ॥ २८९ ॥ आवाभ्यामश्रद्दधतीभ्या-मागत्यात्र स्वनिश्चयात्। त्वं क्षोभयितुमारब्धः, परन्तु कोऽपि न क्षमः ॥२९०॥ त्वयैव वसुधा चेयं, रत्नसूरिति सत्यकम्। नाम धारयतीत्थं तत्, स्तुतिं यावत्करोति सा ॥२९१॥ तावत्त-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्रागमच्छक्रो, जयजयं समुच्चरन्। पुष्पवृष्टिं चकारोच्चैः सूर्ययशोनृपोपरि ॥२९२॥ प्रतिज्ञयोर्वशी भ्रष्टा, सोपहासं निरीक्षिता। इन्द्रेणाथ मुदा भूप-गुणान्यगादि तत्पुरः ॥ २९३ ॥ मुकुटं कुण्डलं हार-मङ्गदादिविभूषणम्। तस्मै शक्रोऽपि दत्त्वाऽथ, ताभ्यां समं तिरोदधे ॥२९४॥ अथ सूर्ययशाः सत्य-प्रतिज्ञश्च प्रहर्षितः। पृथिवीं पालयामास, सन्नीत्या धर्ममर्मवित् ॥२९५॥ स भरतेशवत्पृथ्वीं, जिनमन्दिरमण्डिताम्। कुर्वन् पवित्रयञ्जन्म, श्रीतीर्थसङ्घयात्रया ॥ २९६ ॥ सम्पूजयन् युगादीशं, नित्यं पर्वचतुष्टयम्। आराधयँश्च सुश्राद्धान्, भोजयामास सद्मनि ॥२९७। युग्मम् ॥ काङ्किणीरत्नरेखाभिः, श्रावका अङ्किताः पुरा। ततो हेमोपवीतेन, तेऽङ्किताास्तेन चक्रिरे ॥२९८॥ उदारचरितास्तस्य, कुमारा बहवोऽभवन्। ऋषभस्वामिनश्चेक्ष्वा-कुवंशो वर्तते यथा ॥२९९॥ सूर्यवंशस्तथा सूर्य-यशोभूपस्य चाजनि। अथैकदा नृपः पश्यन्, पितृवद्दर्पणे मुखम् ॥३००॥ संसारासारतां ध्यायन्, केवलज्ञानदर्शनम्। प्राप संस्थाप्य सन्मार्गे, भव्यजन्तून् शिवं ययौ ॥३०१॥ इत्थं भव्यात्मभिश्चास्मिन्, धर्मकर्माणि पर्वणि। विधाय तत्समाराध्यं, पर्वोत्तमं त्रिशुद्धितः ॥३०२॥ येन सर्वेष्टसिद्धिः स्या-दिह परत्र संसृतौ। गच्छन्ति शाश्वतस्थानं, निष्कर्मीभूय जन्तवः ॥ ३०३ ॥

## ग्रन्थकृत्प्रशस्तिः—

खरतरगणे चासन्, वीरपरम्परागताः। जिनमहेन्द्रसूरीशाः, सर्वसिद्धान्तपारगाः ॥३०४॥ तद्धस्तदीक्षिताः श्रेष्ठाः, श्रीमोहनमुनीश्वराः। तेषां जिनयशःसूरी-श्वराः शिष्या निराश्रवाः ॥३०५॥ श्री राजमुनयः शिष्या, अन्या ज्ञानक्रियाऽन्विताः। तेषां शिष्या महाप्राज्ञाः, श्रीजिनरत्नसूरयः ॥ ३०६ ॥ समाग्रहाद् गणिप्रेम-मुनेः पाठकलब्धिना।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





मया न्यगादि माहात्म्यं, श्रीपर्युषण-पर्वणः ॥३०७॥ संवद्बाणखशून्याक्षि (२००५)-वत्सरे ज्येष्ठमेचके। एकादश्यां समाप्तं तच्चाजयमेरुदुर्गके ॥ ३०८ ॥

## ॥ इति पर्युषणाष्टाह्निका-व्याख्यानं समाप्तम् ॥

## (१२) अथ दीपमालिका-पर्व-माहात्म्यम्।

महावीरं जिनं नत्वा, तीर्थेश्वरं जगद्गुरुम्। श्री दीपमालिकापर्व-माहात्म्यं कथ्यते मया ॥१॥ अस्मिँश्च भरतक्षेत्रे, मध्यखण्डे हि माळवे। आसीदुज्जयिनीपुर्यां, सम्प्रति-नाम-भूपतिः ॥२॥ तत्रान्यदा श्रुताधाराः, पूज्याः सुहस्तिसूरयः। जीवितस्वामिनं वीर-जिनं वन्दितुमागताः ॥ ३ ॥ तस्मिन्नवसरे राज-मार्गे यान्तं सुहस्तिनम्। सूरीश्वरं गवाक्षस्थो, दृष्ट्वा सम्प्रतिभूपतिः ॥ ४ ॥ जातिस्मरणभाग् जात-स्तत उत्तीर्य भक्तितः। गत्वा प्रणम्य चावादीत्, कृत्वाऽञ्जलिं गुरुं प्रति ॥ ५ ॥ युग्मम् ॥ स्वामिन्! जानीथ? मामेवं, पृष्टेऽवदद्गुरुर्नृप!। भवन्तं को न जानाति ?, जनख्यातं जनोत्तमम् ॥६॥ ततो राजाऽवदत्पूज्य !, विशेषेणोपलक्षितः ?। अहं न वेति पृच्छामि, भवन्तमुपकारिणम् ॥ ७ ॥ ततः श्रुतोपयोगेन, ज्ञात्वोचुः सूरयो नृप!। त्वमभवश्च मच्छिष्यो, भवे पूर्वे दिनावधि ॥८॥ दीक्षाप्रभावतो राजा, भवाञ्जात इहेदृशी। सम्पत्प्राप्ता त्वया सोऽथ, प्रहर्षितोऽवदद्गुरुम् ॥९॥ बुभुक्षितेन रङ्केन, मया



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





भवत्प्रसादतः । प्राप्तं राज्यमिदं प्राज्य-मन्यथैतत्कुतो ? मम ॥ १० ॥ तस्माद्राज्यमिदं ग्राह्यं, भवद्भिः स्यामहं पुनः । अनृणीति समाकर्ण्य, गुरुर्जगाद सादरम् ॥११॥ राजन् ! राज्यस्य नास्तीच्छा-ऽस्माकं वयं तु निःस्पृहाः । देहेऽपि किं पुना राज्ये, वक्तव्यं ? निष्परिग्रहाः ॥१२॥ तस्मात्किमपि राज्येन, सहास्माकं प्रयोजनम् । नास्ति राजन् ! भवत्पुण्यात्, प्राप्तं राज्यमिदं तव ॥१३॥ ततो राजन् ! सदा पुण्ये, कर्त्तव्य उद्यमस्त्वया । पालनीयं ससम्यक्त्वं, निर्मलं द्वादशव्रतम् ॥१४॥ राजन् ! जिनार्चनां सेवां साधूनां यमिनां कुरु । अष्टमातृभृतां शुद्ध-निर्दोषाहारकारिणः ॥१५॥ दानशीलतपोभाव-धर्ममाराधयानिशम् । एष धर्मः कृतः पर्व-दिनेष्वपूर्वलाभदः ॥ १६ ॥ निशम्येति गुरोर्वाक्यं, नृपः प्रोवाच सद्गुरो ! । पर्युषणादिपर्वाणि, ख्यातानि सन्ति शासने ॥ १७ ॥ श्रीदीपमालिकापर्व, कुतः प्रवृत्तमत्र च । जनाः कुर्वन्ति वर्षस्य, समाप्तिं लक्ष्मीपूजनम् ॥१८॥ तथा शक्त्यनुसारेण, शुद्धवस्त्रविभूषणम् । धारयन्ति च कुर्वन्ति, सुन्दरभोजनादिकम् ॥१९॥ पुनः कुर्वन्ति धौरेय-शृङ्गादिरञ्जनक्रियाम् । स्वगृहाङ्गणभित्त्यादि-लिम्पन-धोलनादिकम् ॥२०॥ तस्य किं कारणं ? राज्ञे-ति पृष्टे प्राह सद्गुरुः । राजन्नेतस्य सम्बन्धं, सावधानतया शृणु ॥२१॥ दशमस्वर्गतश्च्युत्वा, श्रीमद्वीरजिनेश्वरः । आषाढ-शुक्लषष्ठ्यां च, देवानन्दोदरेऽजनि ॥२२॥ शक्राऽऽज्ञयाऽथ देवेन, हर्यादिनैगमेषिणा । स्वश्रेयोऽर्थं त्रयोदश्या-माश्विनमेचके निशि ॥२३॥ देवानन्दोदराल्लात्वा, संहृतस्त्रिशलोदरे* । चैत्रशुक्लत्रयोदश्यां, जन्माभूत् त्रिजग-

* यथा पञ्चमहाव्रतोक्तौ षष्ठस्य रात्रिभोजनविरमणव्रतस्य जायमानेऽप्याद्ये व्रतेऽन्तर्भावेऽपेक्षया पृथगुपादानमदुष्टं, कल्याणकपञ्चकेऽपि च्यवन-गर्भ-गर्भाधाना-वतरणादि-विभिन्ननामवाच्ये प्रथमे कल्याणकेऽन्तर्भावत्वात्पञ्चाशके सत्यपि पञ्च-कल्याणकोक्तौ आगमे सर्वत्र "पंचहत्थुत्तरे होत्था, × × साइणा परिनिव्वुए भयवं" इत्यादि शास्त्रपाठोपलम्भाद्द्वयोरपि मातृ-



For Private and Personal Use Only

द्विभोः ॥२४॥ युग्मम् ॥ मार्गशीर्षासिते पक्षे, दशम्यामनगारिताम् । प्रतिपन्नश्च निस्सङ्गो, भूत्वैकाक्येव तीर्थकृत् ॥२५॥ राधशुक्लदशम्यां च, केवलज्ञानदर्शनम् । वीरप्रभोः समुत्पन्नं, लोकालोकप्रकाशकम् ॥२६॥ कार्त्तिकामावसीरात्रौ, पापापुर्यां शिवं ययौ । महावीरप्रभुः सर्व-दुःखौघान्तकरोऽजनि ॥ २७ ॥ अथान्तिमचतुर्मास्यां, स्वायुषोऽन्तमवेत्य च । षोडशप्रहरान् यावत्-देशनां दत्तवान् प्रभुः ॥२८॥ तस्मिन्नवसरे पुण्य-पालराजा समागतः । वन्दित्वा भगवन्तं तं, कृत्वाऽञ्जलिं स पृष्टवान् ॥२९॥ अद्य स्वामिन् ! मया दृष्टा, अष्टौ स्वप्ना इमे निशि । तथाहि जीर्णशालायां, स्थितो दृष्टो गजो मया ॥३०॥ कपिश्चपलतां कुर्वन्, दृष्टो हि क्षीरपादपः । व्याप्तश्च कण्टकैर्दृष्टः, काकश्चतुर्थके मया ॥३१॥ मृतः सिंहो भयं कुर्वन्, दृष्टोऽशुचौ कजं भुवि । उत्पन्नं दृष्टवान् बीज-मुप्तं च क्षेत्र ऊषरे ॥३२॥ सुवर्णकलशो म्लानो, दृष्टो किं ? तत्फलं प्रभो ! । स्वामी प्राह फलं तेषां, राजन् शृणु यथाक्रमम् ॥३३॥ अतः परं भविष्यन्ति, दुःखदे पञ्चमारके । एते निरूप्यमानाश्च, भावाः कालप्रभावतः ॥३४॥ दुःखार्त्तिशोकदारिद्र-रोगभयादिसङ्कुले । जीर्णशाला-

---

कुक्षावागमनक्षणे कल्याणश्रेयस्सूचकानां, न त्वश्रेयोऽकल्याणसूचकानां स्वप्नानां मातृद्वयेनापि दर्शनात्, द्वयोरपि मातृकुक्ष्यागमनयोर्गर्भाधानत्वेनैवाभ्युपगमार्हत्वाच्च गर्भापहारस्यापि कल्याणकत्वाभ्युपगमनमदुष्टमेव । आश्चर्यत्वात्कथं कल्याणकत्वमेतस्येति चेद्यथाऽष्टाधिकशतसिद्धिगमनस्य, स्त्रीतीर्थङ्करस्य, देवानन्दोदरावतरणस्य वा विद्यमानेऽप्याश्चर्यत्वे कल्याणकत्वाभ्युपगमनमविरुद्धं तथैवात्र गर्भापहारेऽप्याश्चर्यत्वेनाबाधकत्वं कल्याणकत्वस्य । “ पंच उत्तरासाढे, अभीइ छट्ठे होत्था ” इति जम्बूद्वीपप्रज्ञप्तिसूत्रोक्तस्यर्षभराज्याभिषेकस्याप्यस्तु कल्याणकत्वमिति चेन्न, राज्याभिषेके “ कल्लाणफला य जीवाण ” मित्येतत्पञ्चाशकोक्तकल्याणकलक्षणस्याघटमानत्वादित्यलम्प्रसङ्गेन ।



For Private and Personal Use Only

समे गृहा-श्रमे स्थितो गृही गजः ॥३५॥ दुःखितोऽपि सुखं मत्वा, रक्तः स्थास्यति सद्मनि। परं स सुखदं श्रेष्ठं, नाङ्गीकरिष्यति व्रतम् ॥३६॥ कपिवच्चपला जीवा, ज्ञानक्रियास्वनादराः। निर्बलाः शिथिलाचारा, भविष्यन्त्यपि साधवः ॥३७॥ दृढव्रतधरा ये च, दास्यन्ति धर्मकर्मणि। शिक्षां येभ्यः करिष्यन्ति, ते तेषां हास्यखिंसना ॥ ३८ ॥ यथा ग्राम्यजनाः पौर-जनानां हास्यहेलनाम्। कुर्वन्ति ते करिष्यन्ति, तथा ज्ञानक्रियाव्रताम् ॥३९॥ चारित्ररागिणो जैन-शासनोद्द्योतकारिणः। सद्गुणशालिनः सप्त-क्षेत्रेषु व्ययकारिणः ॥४०॥ अणुव्रतादिधर्त्तारो, भद्रिकाः समभाविनः। भक्तिमन्तश्च ये क्षीर-वृक्षसमा उपासकाः ॥४१॥ ताँश्च वेषधराः साधु-द्वेषिणश्चाभिमानिनः। कण्टकसदृशा धर्मे, रोधयिष्यन्ति लिङ्गिनः ॥४२॥ त्रिभिर्विशेषकम् ॥ पेयनिर्मलनीरेण, भृतायां वायसो यथा। वाप्यां करोति रागं न, किन्तु दुर्गन्धिके जले ॥४३॥ एवं ज्ञानक्रियायुक्ता-नपि साधून्निजे गणे। दृष्ट्वाऽपि न करिष्यन्ति, रागं शिथिलसाधवः ॥४४॥ मन्दाचारा गणे यस्मिँ-स्तत्र यास्यन्ति सुन्दरम्। विहाय स्वगणं शुद्ध-क्रियं पण्डितमानिनः ॥ ४५ ॥ हीनं ज्ञानेन लोकेऽस्मि-न्नवध्याद्यतिशायिनः। मृतसिंहसमं जैन-दर्शनं परतीर्थिकात् ॥ ४६ ॥ प्राप्स्यति न तिरस्कारं, परं तेषां करिष्यति। भयं स्वलिङ्गिनां कीट-समानां नेति पञ्चमम् ॥ ४७ ॥ युग्मम् ॥ पद्महृदे भवेत्पद्मो-त्पत्तिर्नाशुचि भूतले। एवं धर्मसमुत्पत्तिः, श्रेष्ठकुले न चापरे ॥ ४८ ॥ परं कालप्रभावेण, धर्मोत्पत्तिर्भविष्यति। न क्षत्रियकुले किन्तु, केवलं हि वणिक्कुले ॥ ४९ ॥ मन्दबुद्धिर्यथा कश्चित्, कृषिकारक ऊषरे। क्षेत्रे वपति धान्यानां, बीजानि च निजेच्छया ॥ ५० ॥ तथा मूर्खाश्च धीमन्तः, पुमांसः पात्रबुद्धितः। दानं दास्यन्ति सत्पात्रा-पात्राद्यनवलोक्य च ॥५१॥ स्वर्ण-कुम्भसमा ज्ञान-क्रियादिगुणसंयुताः। मूलोत्तरगुणाधारा, वैराग्याश्रितमानसाः ॥ ५२ ॥ स्तोका एव भविष्यन्ति,



For Private and Personal Use Only

साधवः समभाविनः । कोऽपि प्रभावनापूजां, तेषां च न करिष्यति ॥ ५३ ॥ युग्मम् ॥ बाह्याडम्बरवन्तो ये, ज्ञानक्रियाद्यनादराः । साध्वाभासा गुणैर्हीनाः, पूजयिष्यन्ति ताञ्जनाः ॥ ५४ ॥ गीतार्थाः साधवो हीना-चारिभिर्मिलिताः समम् । चलिष्यति यथा दृष्ट्वा, प्रभूतान् ग्रथिलाञ्जनान् ॥ ५५ ॥ सज्जना अपि जानन्त-स्तन्मध्ये मिलिताः स्वयम् । आत्मजीवितरक्षार्थं, सञ्जाता ग्रथिलास्तथा ॥ ५६ ॥ तत्कथा तु नृप पूर्ण-भद्राख्यः पृथिवीपुरे । सुबुद्धिर्धीसखा तस्य, धीधनश्चतुरोऽभवत् ॥ ५७ ॥ एकदा लोकदेवाख्यो, नैमित्ती राजसंसदि । समागतस्तदा मन्त्री, नैमित्तिकं जगाद च ॥ ५८ ॥ काचिदागामिकालस्य, शुभाशुभकथोच्यताम् । स्वनिमित्तबलात्तेन, प्रोक्तं मन्त्रिन्! वचः शृणु ॥५९॥ इतो दिनाद्गते मासे, मेघवृष्टिर्भविष्यति । ग्रथिलास्तज्जलपानेन, भविष्यन्त्यखिला जना ॥ ६० ॥ कियत्यथ गते काले, शुभा वृष्टिर्भविष्यति । सावधाना भविष्यन्ति, तज्जलपानतो जना ॥६१॥ तस्येदृशं वचः श्रुत्वा, नृपेणाऽकारि घोषणा । पुरमध्येऽखिलैर्लोकैः, कर्त्तव्यो जलसङ्ग्रहः ॥ ६२ ॥ तन्निशम्याखिलैर्लोकैः, पानीयसङ्ग्रहः कृतः । जाता वर्षा तदा पीतं, न जनैरपि तज्जलम् ॥ ६३ ॥ कियत्यथ गते काले, सङ्गृहीतं जलं यदा । निष्ठितं तज्जलं पीतं, तदा जनैरनुक्रमात् ॥ ६४ ॥ नृपामात्यौ विना सर्वे, ग्रथिला अभवञ्जनाः । नग्नीभूय प्रनृत्यन्ति, प्रगायन्ति हसन्ति च ॥६५॥ परस्परं कुचेष्टन्ते-ऽथालोक्य भूपमन्त्रिणौ । तच्चेष्टारहितौ लोका, विचारयन्ति तेऽखिलाः ॥ ६६ ॥ ग्रथिलौ च नृपामात्यौ, सञ्जातावत एव न । कुर्वन्ति कार्यमस्माकं, समुत्थाप्याविमावतः ॥६७॥ स्थापनीयौ नृपामात्यौ, नूतनावित्यवेत्य च । निजात्मराज्यरक्षार्थं, तौ जातौ ग्रथिलौ ततः ॥ ६८ ॥ कियत्यथ गते काले, सुवृष्टिरभवत्ततः । सावधाना जनाः सर्वे, जातास्तज्जलपानतः ॥ ६९ ॥ एवं दुष्षमकाले च, सम्यग्ज्ञान-क्रियाधराः । गीतार्था अपि वैराग्य-निर्वे-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





दगुणसंयुताः ॥ ७० ॥ विचरिष्यन्ति सम्मिल्या-चारहीनैः स्वलिङ्गिभिः । सममेतादृशं स्वप्न-फलं श्रुत्वा प्रभोर्मुखात् ॥७१॥ उद्विग्नो गृहवासेन, पुण्यपालो नृपस्ततः । दीक्षां लात्वा प्रभोः पार्श्वे, नष्टकर्मा शिवं ययौ ॥ ७२ ॥ एवं हि दृष्टवाँश्चन्द्र-गुप्तराजा च षोडश । स्वप्नाँस्तत्फलं प्राह, भद्रबाहुश्च तद्यथा ॥ ७३ ॥ अन्यदा चन्द्रगुप्ताख्य-भूपो ददर्श षोडश । स्वप्नांश्चतुर्दशीरात्रौ गृहीतपौषधव्रतः ॥ ७४ ॥ तदानीं पाटलीपुत्र-नगरमागतः क्रमात् । श्रीभद्रबाहुसूरीशः, पञ्चम-श्रुतकेवली ॥ ७५ ॥ गुर्वागमनमाकर्ण्य, चन्द्रगुप्तो नृपोऽपि च । तत्र गत्वा गुरुं नत्वा, शुश्राव धर्मदेशनाम् ॥ ७६ ॥ देशनान्ते नृपोऽपृच्छ-द्भगवन् ! पौषधस्थितः । ददर्श षोडशस्वप्ना-न्निशायामद्य तद्यथा ॥ ७७ ॥ भग्ना कल्पद्रुशाखाऽऽद्ये, द्वितीयेऽस्तमितो रविः । अकालेऽथ शतच्छिद्री-भूतो विधुस्तृतीयके ॥ ७८ ॥ नृत्यन्ति तुर्यके भूताः, पञ्चमे कृष्णसर्पकः । द्वादशफणभृत्षष्ठे, विमानं पतितं भुवि ॥ ७९ ॥ सप्तमेऽथाशुचिस्थाने, कमलं जातमष्टमे । खद्योतः पुनरुद्द्योतं, प्रकरोति मुहुर्मुहुः ॥८०॥ नवमे च मया दृष्टं, शुष्कं महासरोवरम् । लभते दक्षिणाशायां, तत्र स्तोकतरं जलम् ॥८१॥ दशमे कुर्कुरः स्वर्ण-स्थाले पिबति पायसम् । एकादशे गजारूढो, दृष्टो हि वानरो मया ॥८२॥ द्वादशे सागरो मेरां, मुञ्चत्यथ त्रयोदशे । स्वप्ने संयोजिता वत्सा, दृष्टा महारथे मया ॥ ८३ ॥ दृष्टं रत्नं महामूल्यं, तेजोहीनं चतुर्दशे । पञ्चदशे वृषारूढो, दृष्टो राजसुतः पुनः ॥८४॥ षोडशे च प्रयुद्ध्यन्तौ, द्वौ हस्तिकलभौ मया । दृष्टाविति च हे पूज्या !, एषां फलं निरूप्यताम् ॥८५॥ प्राहुः श्रीगुरवो राजन् !, शाखा भग्ना विलोकिता । कल्पद्रोः कोऽप्यतो भूपः, प्रव्रज्यां नैव लास्यति ॥८६॥ अकालेऽस्तङ्गतः सूर्यो, दृष्टस्त्वया च तत्फलम् । दुष्षमे केवलज्ञानं, कालेऽस्मिन्न भविष्यति ॥८७॥ तृतीयेऽथ शतच्छिद्र-श्चन्द्रो दृष्टस्त्वया नृप ! । तेन धर्मे भविष्यन्ति, मार्गा अनेकशः पुनः



For Private and Personal Use Only

॥८८॥ तुर्ये भूताश्च नृत्यन्तो, दृष्टास्ततश्च भूतवत्। कुमतयो हि नर्त्स्यन्ति, सिद्धान्तवाक्यलोपिनः ॥८९॥ द्वादशफण-भृत्कृष्ण-सर्पो दृष्टश्च पञ्चमे। तेन द्वादशवर्षाणि, दुर्भिक्षश्च भविष्यति ॥९०॥ सूत्राणि कानिचिन्नाशं, यास्यन्ति भिक्षवः पुनः। भविष्यन्ति सदा चैत्य-मठगृहनिवासिनः ॥ ९१ ॥ तत्र ये साधुधर्माभि-काँक्षिणस्तेऽखिला दिशि। दक्षिणस्यां प्रयास्यन्ति, वल्लभीनगरादिषु ॥९२॥ विमानं पतितं दृष्टं, षष्ठे तेन च साधवः। नैवाऽत्रागमिष्यन्ति, जङ्घाविद्यादि-चारणाः ॥९३॥ सप्तमेऽशुचिभूमौ च, दृष्टं कमलमुद्गतम्। तेन वणिग्जने स्वल्पे, जैनधर्मो भविष्यति ॥ ९४ ॥ दृष्टः खद्योत उद्द्योत-करस्तेन भविष्यति। नोदयमानसत्कारा-दरो धर्मे जिनोदिते ॥९५॥ शुष्कं सरोवरं दृष्टं, नवमे तेन धार्मिके। जिनकल्याणकस्थाने, धर्महानिर्भविष्यति ॥९६॥ दशमे भक्षयन् क्षीरं, स्वर्णपात्रे च कुर्कुरः। दृष्टस्तेनोत्तमा लक्ष्मी-र्यास्यति मध्यमालये ॥९७॥ एकादशे गजारूढः, कपिर्दृष्टस्ततः खलाः। भविष्यन्ति सुखारूढा, दुःखिता सुकुलाः पुनः ॥९८॥ द्वादशे सागरो मेरां, त्यजन् दृष्टस्ततो नृपाः। अन्यायिनो भविष्यन्ति, पथोत्तीर्णाश्च क्षत्रियाः ॥९९॥ वत्सा महारथे युक्ता, दृष्टास्त्रयोदशे ततः। वत्ससमा भविष्यन्ति, लघुवया हि साधवः ॥१००॥ गृहीष्यन्ति न चारित्रं, वृद्धत्वेऽपि जनाः पुनः। ये दीक्षिता भविष्यन्ति, प्रौढवैराग्यभाविताः ॥१०१॥ तन्मध्याच्छिथिलाचाराः, केऽपि महा-प्रमादिनः। केऽपि केऽपि भविष्यन्ति, गृहभाजो स्मरार्दिताः ॥१०२॥ दृष्टं महार्घ्यकं रत्नं, तेजोहीनं चतुर्दशे। तेना-ऽत्र श्रमणाः स्तोका, भविष्यन्त्यप्रमादिनः ॥१०३॥ बहवोऽत्र भविष्यन्ति, साधवः क्लेशकारिणः। असमाधिकराः क्षुद्रा, उपद्रवकरा मिथः ॥ १०४ ॥ पञ्चदशे वृषारूढो, दृष्टो राजसुतस्ततः। क्षत्रियाद्या भविष्यन्ति, लोका मिथ्यात्वत्रासिनः ॥१०५॥ दृष्टौ गजार्भकौ युद्धं, कुर्वन्तौ षोडशे ततः। गुर्वभक्ता भविष्यन्ति स्तोकस्नेहाश्च साधवः ॥१०६॥ चन्द्रगुप्त-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





नृपस्तेषां, फलं श्रुत्वा गुरोर्मुखात्। विहितानशनः प्रान्ते, स्वर्गं ययौ समाधिना ॥१०७॥ महाभारतशास्त्रादौ संवादरूप-कीर्त्तितम्। कलियुगस्वरूपं ही-त्थं प्रवदन्ति लौकिकाः ॥१०८॥ युधिष्ठिरोऽन्यदाऽरण्यं, गतो वृद्धां च तत्र गाम्। लघुगोस्तनपानं च, प्रकुर्वाणां स दृष्टवान् ॥१०९॥ स्वपार्श्वस्थो द्विजः प्राह, राजन्नेतत्फलं शृणु। कलियुगे भविष्यन्ति, हीनसत्त्वा जना भृशम् ॥११०॥ मरिष्यन्ति विना लक्ष्मीं, दुःखार्त्ताः सुखलालसाः। स्वसुतां धनिनो दत्वा, धनं लात्वा निजोदरम् ॥१११॥ श्रुत्वेति चलितो भूपो-ऽग्रेऽद्राक्षीत्सजलानि हि। समश्रेणिनिबद्धानि, त्रीणि सरोवराणि च ॥११२॥ तत्राद्यसरसो नीर-मुच्छलन्मध्यमं सरः। त्यक्त्वा पतति दूरेऽपि, तृतीये च सरोवरे ॥११३॥ न पतति द्वितीये तु, बिन्दुमात्रं जलं ततः। द्विजोऽवदत्फलं तेषां, शृणु तत्कारणं नृप! ॥ ११४ ॥ यथाऽऽद्यसरसो नीरं, त्यक्त्वा द्वितीयकं सरः। प्रपतत्येकधारेण, तृतीये च सरोवरे ॥११५॥ तथाऽऽगामिक्षणे त्यक्त्वा, स्वस्य सम्बन्धिनो जनान्। अन्यजनैः समं प्रीतिं, करिष्यन्ति जना नृप! ॥११६॥ अग्रे गच्छन्नृपोऽद्राक्षीत्, क्लिन्नां जलेन वालुकाम्। बहवो मनुजास्तस्या, रज्जूः कुर्वन्ति यत्नतः ॥११७॥ परं त्रुटति सा रज्जू-र्न तिष्ठति तदाऽवदत्। द्विजः कलियुगे राजन्!, महाक्लेशैश्च कर्षकाः ॥११८॥ धनमुपार्जयिष्यन्ति, राजचौरादिभीतितः। अन्यत्र गमनेऽप्येषां, नाशं यास्यति तद्धनम् ॥११९॥ युग्मम्॥ ततो गच्छन्नृपोऽद्राक्षीत्, कूपप्रणालिका-जलम्। कूपे पतति विप्रोऽथा-वददेतत्फलं शृणु ॥१२०॥ धनमुपार्जयिष्यन्ति, वाणिज्यकृषिकादिभिः। क्लेशाज्जना गृहीष्यन्ति, तत्सर्वं राजभृत्यकाः ॥१२१॥ राजानः सद्युगे स्वस्य, धनं वितीर्य पुत्रवत्। स्वप्रजां पालयामासु, रक्षयामासुरापदः ॥१२२॥ कलिकाले तु भूमीशाः, पीडयिष्यन्ति च प्रजाम्। बलात्काराद् ग्रहीष्यन्ति, दुःखार्जितं प्रजाधनम् ॥१२३॥ अग्रे गच्छन्नृपोऽद्राक्षी-देकः कण्ट-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





कपादपः। वनखण्डे महाश्रेष्ठ-चम्पकवृक्षमध्यगः ॥१२४॥ इह सुखार्थिनो लोका, बहवः कण्टकद्रुमम्। पूजयन्तः सुगन्धैश्च, द्रव्यैर्दृष्ट्वा न चम्पकम् ॥१२५॥ विप्रोऽवदज्जनास्त्यक्त्वा, गुणिनमुत्तमं जनम्। दुष्टं कलियुगे नीचं, पूजयिष्यन्ति दुर्जनम् ॥१२६॥ अग्रे गच्छन्नृपोऽद्राक्षी-द्बद्धां केशाग्रतः शिलाम्। आकाशे लम्बमानां च, तत्फलं ब्राह्मणोऽवदत् ॥१२७॥ राजन्! कलियुगे भूरि-पापरूपा बृहच्छिला। अत्यल्पधर्मरूपेण, वालाग्रेण तरिष्यति ॥ १२८ ॥ त्रुटिष्यति यदा धर्म-रूपो वालस्ततो जनाः। समकालं ब्रुडिष्यन्ति, मरिष्यन्त्यशरण्यकाः ॥ १२९ ॥ अग्रे गच्छन्नृपोऽद्राक्षीत्, फलार्थं वृक्षयातनाम्। कुर्वतः पुरुषान् विप्र-स्तदा जगाद तत्फलम् ॥ १३० ॥ कलियुगे पिता वृक्ष-तुल्यः फलसमः सुतः। पुत्रफलाय कष्टं हि, पितावृक्षः सहिष्यति ॥१३१॥ अग्रे गच्छन्नृपोऽद्राक्षीत्, स्वर्णस्थाल्यां पचत्पलम्। द्विजोऽवदत्कुटुम्बं हि, त्यक्त्वाऽऽत्महितकारिणम् ॥ १३२ ॥ अन्यलोकाय दास्यन्ति, जनाः स्वमस्तकं पुनः। बह्वीं प्रीतिं करिष्यन्ति, दुर्जनेषूत्तमेषु न ॥१३३॥ युग्मम् ॥ अग्रे गच्छन्नृपोऽद्राक्षीत्, पूजयन्ति जना अहिम्। न गरुडं द्विजोऽवादी-द्भूपते! तत्फलं शृणु ॥१३४॥ सर्पतुल्यो दयाहीनो-निर्गुण्यधर्मिको जनः। तस्य चादरसत्कारं, करिष्यन्ति जना भृशम् ॥१३५॥ गरुडसदृशो धर्मी, दयालुः सद्गुणी जनः। तं निन्दिष्यन्ति लोकाश्च, परदूषणदर्शिनः ॥१३६॥ अग्रे गच्छन्नृपोऽद्राक्षी-देकस्मिन् शकटे गजौ। सुलक्षणौ द्वितीयस्मिन्, गर्दभौ योजितौ पुनः ॥ १३७ ॥ परन्तु हस्तिनौ मार्गे, चामिलितौ परस्परम्। गर्दभौ मिलितौ यान्तौ, द्विजो जगाद तत्फलम् ॥ १३८ ॥ कलियुगे जना हस्ति-समाः श्रेष्ठकुलोद्भवाः। भेदं सङ्क्लेशमीर्षां च, करिष्यन्ति परस्परम् ॥१३९॥ गर्दभसदृशा नीच-कुलोत्पन्नाः परस्परम्। स्नेहवन्तो भविष्यन्ति, मर्यादानीतिधारिणः ॥१४०॥ प्रायेणान्त्यकुलोत्पन्ना, भविष्यन्ति नृपाः पुनः। श्रेष्ठ-



For Private and Personal Use Only

कुलसमुत्पन्नाः, करिष्यन्ति च दासताम् ॥१४१॥ एवं निरूपितं तत्र, दृष्टान्ताऽष्टोत्तरं शतम्। पुरा किलाभवन्पञ्च-पाण्डवा वनवासिनः ॥१४२॥ तत्रान्यदा स्थिताः भीमा-द्यः स्वरक्षणाय च। निशायां यामिकत्वेन, स्ववारकानुसारतः ॥१४३॥ तत्राद्यप्रहरे भीमो, जागर्त्यन्ये सहोदराः। सुप्तास्तस्मिन् क्षणे भीमं, कलिपिशाचकोऽवदत् ॥१४४॥ अरेऽहं मारयिष्यामि त्वां च तव सहोदरान्। इत्युक्त्वा सम्मुखं तस्या-ऽऽययौ कलिपिशाचकः ॥१४५॥ दृष्ट्वा तं कुपितो भूत्वा, स तद्व-धाय धावितः। कलिना सह तस्याभू-द्युद्धं भीमस्तु हारितः ॥१४६॥ द्वितीयप्रहरे युद्धं, विधाय कलिनाऽर्जुनः। जितस्तृतीययामे च, नकुलोऽपि जितः पुनः ॥१४७॥ तुर्ययामे जितस्तेन, सहदेवोऽपि हेलया। युधिष्ठिरोऽथ पाश्चात्य-रात्रौ जागृतवान्नृपः ॥१४८॥ तदा कलिपिशाचश्चा-गत्यावदद्युधिष्ठिरम्। पश्यतो भवतो मार-यिष्यामि वः सहोदरान् ॥१४९॥ श्रुत्वा कलिवचो राजा, युधिष्ठिरश्चकार न। किञ्चिन्मात्रमपि क्रोधं, प्रतिवचोऽपि नो ददौ ॥१५०॥ क्षमां कृत्वा स्थितो राजा, तत उपशमं गतः। कलिपिशाचको राज्ञो, मुष्टिमध्ये समागतः ॥१५१॥ उत्थिता भ्रातरः सर्वे, रात्रिसम्बन्धिनी तदा। वार्त्ता सर्वाऽपि राज्ञा स्व-भ्रातृभ्यः कथिता मुदा ॥१५२॥ राज्ञा क्षमाप्रभावेण, स्ववशवर्त्तकः कलिः। पिशाचो मुष्टिमुद्घाट्य, स्वभ्रातृभ्यः प्रदर्शितः ॥१५३॥ करिष्यति क्षमां यो हि स कलिं खलु जेष्यति। करिष्यति क्षमां यो न, कलिस्तं खलु जेष्यति ॥१५४॥ अत एव क्षमा जीवैः, कर्त्तव्या सुखदायिनी। कलिकाले करालेऽस्मिन्, क्षमया जीवनं वरम् ॥१५५॥ सुहस्तिसूरिभिः प्रोक्तं, राजन्! मया तवाग्रतः। प्रभुणा जल्पितं पुण्य-पालस्वप्नफलं पुनः ॥१५६॥ श्रीभद्रबाहुना चन्द्र-गुप्तस्वप्नफलं तथा। दृष्टान्ता लौकिकाः प्रोक्ता, अत्र प्रसङ्गतो मया ॥१५७॥ गौतमस्वामिना पृष्टं, भगवताऽर्पितोत्तरम्। दुष्षमकालसम्बन्धि-भावं वदाम्यतः परम् ॥१५८॥ प्रणम्य गौतमस्वामी,



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्वभावं विदन्नपि। पप्रच्छ भव्यबोधाय, भगवन्तं जिनेश्वरम् ॥१५९॥ पञ्चमषष्ठयोः स्वामि-न्नारकयोर्निरूप्यताम्। स्वरूपं भगवान् प्राह, हे गौतम! निशम्यताम् ॥१६०॥ निर्वाणान्मम सार्द्धाष्ट-मासोत्तरे त्रिवत्सरे। अतिक्रान्ते चतुर्थारो-ऽत्र च समुत्तरिष्यति ॥१६१॥ स्थास्यति दुष्षमाख्यश्च, पञ्चमारस्ततः परम्। द्वादशाब्दे गते मोक्षा-न्मे ते शिवं भविष्यति ॥१६२॥ विंशतिवत्सरे याते, निर्वाणान्मम यास्यति। पञ्चमगणभृन्मोक्षं, सुधर्माख्यो मुनीश्वरः ॥१६३॥ मम मोक्षाच्चतुःषष्टि-वर्षे गते गमिष्यति। जम्बूर्मोक्षं ततश्छेदं, यास्यति दश वस्तुकम् ॥१६४॥ यथा-१ क्षपकोपशमश्रेणी २, ३ ज्ञानं च केवलाभिधम्। ४ परमावधिकं ज्ञानं, ५ मनःपर्यवकं पुनः ॥१६५॥ परिहारविशुद्धिश्च, सूक्ष्मादिसम्परायकम्। यथाख्यातं च चारित्र-त्रयं ६ तदेकभेदकम् ॥ १६६ ॥ ७ आहारकशरीरं च, ८ पुलाकलब्धिकं पुनः। ९ जिनकल्पश्च सिद्धयाख्य-१९ गतिरिमे दशेति च ॥१६७॥ ततः श्रीप्रभवस्वामी, जम्बूस्वामिप्रबोधितः। मनकस्य पिता शय्य-म्भवस्वामी ततः क्रमात् ॥१६८॥ श्रीयशोभद्रसूरीश-स्ततस्ततो भविष्यति। सम्भूतिविजयः सूरिर्भव्यसम्भूतिकारकः ॥१६९॥ श्रीभद्रबाहुसूरीशः, प्रभूतशास्त्रकारकः। भविष्यति ततः स्थूल-भद्रस्वामी ततः पुनः ॥१७०॥ श्रुतकेवलिनश्चैते, षट् चतुर्दशपूर्विणः। ततोऽन्तिमचतुःपूर्व-विच्छेदमत्र यास्यति ॥ १७१ ॥ आद्यं संहननं वज्र-र्षभनाराचसंज्ञकम्। अत्र यास्यति विच्छेदं, दुष्षमकालभावतः ॥१७२॥ आर्यमहागिरिः सूरि-स्ततस्ततो भविष्यति। आर्यसुहस्तिसूरीशः, सम्प्रतिभूपबोधकः ॥१७३॥ जातजातिस्मृतिज्ञानः, स च सूर्युपदेशतः। सम्प्रतिभूपतिर्जैन-धर्मभङ्गीकरिष्यति ॥१७४॥ स च त्रिखण्डभोक्ता च, ज्ञानी दानी पराक्रमी। धर्मज्ञो विनयी न्यायी, राजेश्वरो भविष्यति ॥१७५॥ श्रीजिनचैत्यचैत्यैः स, भूतलं मण्डयिष्यति। पुनः सोऽनार्यदेशेषु, धर्मं प्रवर्त्तयिष्यति ॥१७६॥ म्लेच्छेषु श्रावकाणां स,



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





धर्मयोगं पुनर्नृपः । कारयिष्यति साधूनां, विहारं धर्महेतवे ॥१७७॥ एतादृशो महाधर्मी, धर्मनिष्ठो गमिष्यति । कृतकृत्यः क्रमात्स्वर्गं, राजँस्त्वं स चाभवः ॥१७८॥ ततः सुस्थितसूरीशो, भविष्यति च कोटिकः । गणोऽस्मात्सूरितोऽच्छिन्न-प्रवाहो निर्गमिष्यति ॥१७९॥ अत्रान्तरे च मन्मोक्षा-दुज्जयिन्यां भविष्यति । विक्रमश्च गते वर्षे, चतुःशतादिसप्ततौ ॥१८०॥ श्रीसिद्धसेनसूरीशो-पदेशाद्विक्रमो नृपः । भविष्यति गुरौ देवे, भक्तिमाञ्जिनशासने ॥१८१॥ पालयिष्यति सम्यक्त्वं, निर्मलं स पुनः सुराः । भविष्यन्त्यग्निवेताला-दयः सत्त्वेन तद्वशे ॥१८२॥ विद्या स्वर्णनरः सिद्धिं, यास्यति तस्य भूपतेः । तत्प्रभावाज्जनान् सर्वान्, स चानृणीकरिष्यति ॥ १८३ ॥ संवत्सरं स लोके स्वनाम्ना प्रवर्त्तयिष्यति । सोऽन्यतीर्थिगृहीतार्ह-चैत्यानि वालयिष्यति ॥१८४॥ चैत्यनिर्माणसत्तीर्थ-संघनिष्कासनादिभिः । सत्कृत्यैः शासनोद्द्योतं, कृत्वा स्वर्गं स यास्यति ॥१८५॥ मन्निर्वाणादुगते पञ्च-शतचतुरशीतिके । वर्षे श्रीवज्रसूरीशो, दशपूर्वधरोऽन्तिमः ॥१८६॥ दशपूर्वभृतां मध्ये, दशमो दशपूर्वभृत् । भविष्यति सतां पूज्यः, श्रीशासनप्रभावकः ॥१८७॥ निर्गमिष्यति वज्रीय-शाखाऽस्मात्सूरितः पुनः । श्रीवज्रसेनसूरीश-स्ततो भविष्यति व्रती ॥१८८॥ ततः श्रीचन्द्रसूरीश-श्चन्द्र इव भविष्यति । अस्माच्च सूरितश्चन्द्र-कुलं च निर्गमिष्यति ॥१८९॥ वल्लभीपुरि देवर्द्धिक्षमाश्रमणयुग्गणिः । मन्निर्वाणात्खहस्त्यङ्क (९८०)-वर्षेऽन्यसूरिभिः समम् ॥१९०॥ हीयमानानि चाचारा-ङ्गादिसूत्राणि तानि च । लेखयिष्यति पत्रादौ, सम्यग् योजनया पुनः ॥१९१॥ युग्मम् ॥ मन्मोक्षाद्गुणखेटाङ्क (९९३), वर्षे कालिकसूरयः । पञ्चमीतश्चतुर्थ्यां हि, समग्रसङ्घसाक्षितः ॥१९२॥ पर्युषणाख्यवार्षीय-पर्व* समानयिष्यति । कारणा-

* साधूनामेकत्र निवासो नाम पर्युषणा, सा च द्विविधा गृहिज्ञाताऽज्ञाता च, तत्र गृहिज्ञाता सांवत्सरिक-कृत्यविशिष्टा भवति,



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





न्मानयिष्यन्ति, तद्वाक्यं शास्त्रवेदिनः ॥१९३॥ अत्रान्तरे भविष्यन्ति, श्रीहरिभद्रसूरयः। अनेकग्रन्थकर्तारः, शासनो-

यदुक्तं तपागच्छाचार्यैः श्रीमद्भिः कुलमण्डनाचार्यैः स्वकृतायां कल्पावचूर्यां—"गृहिज्ञाता तु सा-यस्यां सांवत्सरिकातिचारालोचनं, लुञ्चनं, पर्युषणायां कल्पसूत्रकथनं, चैत्यपरिपाटी, अष्टमं तपः, सांवत्सरिकं प्रतिक्रमणं च क्रियते" इति। एषा पर्युषणा "अभिवड्ढियम्मि वीसा, इयरेसु सवीसइमासो" इति। पर्युषणाकल्पनिर्युक्तिः तथा "अभिवड्ढियवरिसे वीसति राते गते गिहिणा तं करेंति, तिसु चंदवरिसेसु सवीसति राते मासे गते गिहिणा तं करेंति" इति। निशीथचूर्णिः, इत्यादि शास्त्रप्रमाणैः प्राग्जैनटिप्पनककालेऽभिवर्द्धिते वर्षे विंशतिदिनैरनभिवर्द्धिते च वर्षे पञ्चाशद्दिनैः क्रियमाणाऽऽसीत्, यथा चोक्तं तैरेव श्रीकुलमण्डनाचार्यैः कल्पावचूर्यां—"पञ्चविंशत्या दिनैः पर्युषितव्यमित्युच्यते तत्सिद्धान्तटिप्पनानुसारेण, यतस्तत्र युगमध्ये पौषो युगान्ते चाषाढ एव वर्द्धते, तानि च टिप्पनानि अधुना सम्यग् न ज्ञायन्तेऽतो दिनपञ्चाशतैरेव पर्युषणा सङ्गतेति वृद्धाः।" एतेनैतन्निश्चियते—यत्साम्प्रतं लौकिकटिप्पने यः कोऽपि मासो वर्द्धतां, परं सांवत्सरिककृत्यान्वितायाः पर्युषणायाः करणे पञ्चाशद्दिनानामनुल्लङ्घनमेव शास्त्राज्ञानुपालनं, अन्यथा "सवीसइराइ मासे विइक्कंते वासावासं पज्जोसवेइ, × × × अंतराविय से कप्पइ, नो से कप्पइ तं रयणिं उवायणावित्तए" इत्येतत्कल्पशास्त्राज्ञाया अतिक्रमणमेव। अन्यच्च—श्रावणभाद्रपदान्यतरवृद्धौ पाश्चात्यानां सप्ततिदिनानामुल्लङ्घनमपि न दोषाय, "नो से कप्पइ तं रयणिं उवायणावित्तए" इत्येतत्कल्पसमाचारीपाठेन पौर्वात्यानां पञ्चाशद्दिनानामुल्लङ्घननिषेधवन्न क्वापि सप्ततिदिनानामुल्लङ्घननिषेधो, दृश्यते, प्रत्युत "अभिवड्ढियम्मि वीसा" इत्यनेन कल्पनिर्युक्तिवाक्येन स्पष्टैव पाश्चात्यानां सत्ता, शतदिनानां सत्ता, अतएव हि श्रीकालिकाचार्यैर्नृपशालिवाहनाभ्यर्थनयाऽप्येकपञ्चाशत्तमे षष्ठीदिनेऽकृत्वैकोनपञ्चाशत्तमे चतुर्थीदिने कृता सांवत्सरिककृत्यविशिष्टा पर्युषणा सा च शास्त्रसम्मतत्वात्तत्कालवर्त्तिसङ्घेनानुमतमिति।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्द्योतकारकाः ॥१९४॥ श्रीबप्पभट्टिसूरीशाः, सर्वविद्याविशारदाः। भविष्यन्ति पुनश्चाम-भूपतिप्रतिबोधकाः ॥१९५॥ कारयिष्यति भूपः स, तद्वाक्याद् गोपपर्वते। अर्हच्चैत्यं च विस्तीर्णं, दर्शनीयं मनोरमम् ॥१९६॥ सार्द्धत्रिकोटिसौवर्ण-दीनारद्रव्यनिर्मिताम्। जिनेन्द्रप्रतिमामाम-राजा संस्थापयिष्यति ॥१९७॥ चान्द्रे कुले भविष्यन्ति, श्रीवर्द्धमानसूरयः। तच्छिष्याश्च महाप्राज्ञाः, श्रीजिनेश्वरसूरयः ॥१९८॥ निरुद्धो वसतेर्मार्ग-श्चैत्यमठनिवासिभिः। ये चैत्यवासिनो जित्वा, दुर्लभराजसंसदि ॥१९९॥ मार्गं वाचंयमानां हि, तं वसतिनिवासिनाम्। ये प्रकटीकरिष्यन्ति, खेभखचन्द्र (१०८०) वत्सरे ॥२००॥ युग्मम्॥ ततश्च विहरिष्यन्ति, सर्वत्रास्खलितत्वतः। संविज्ञाः साधवः सर्वे, स्वसाध्वाचारपालकाः ॥२०१॥ वादाँश्च प्रतिवादाँश्च, साध्वाचाराभिधायकान्। चैत्यस्थैः सूरिभिस्सार्द्धं, विधाय राजसाक्षिकम् ॥२०२॥ प्राप्स्यति बिरुदं सूरिः, खरतराभिधं ततः। खरतरगणोऽस्माच्च, सूरीशान्निर्गमिष्यति ॥२०३॥ अभयदेवसूरीशो, नवाङ्गवृत्तिकारकः+ भावी स स्तम्भने पार्श्व-प्रतिमां प्रकटिष्यति ॥२०४॥ जिनवल्लभसूरीश-स्तस्य शिष्यो भविष्यति*।

---

+ यतः प्रोक्तं—"पुरा श्रीपत्तने राज्यं, कुर्वाणे भीमभूपतौ। अभूवन् भूतले ख्याताः, श्रीजिनेश्वरसूरयः ॥१॥ सूरयोऽभय-देवाख्यास्तेषां पट्टे दिदीपिरे। येभ्यः प्रतिष्ठामापन्नो, गच्छः खरतराभिधः ॥२॥" इत्युपदेशसप्ततिकायां तपागच्छीयश्रीसोमधर्म-गणिवरविहितायाम्। अत्र भीमभूपराज्यकर्त्तृत्वोक्तिस्तु सुचिरं राज्यशासनकालापेक्षिकैव, न तु वादकालापेक्षिका, न ह्यनेनास्तित्वाभावमपि च सिद्ध्यति तस्मिन्समये दुर्लभराजस्य, अनिर्णीतत्वादवसानकालस्य तस्येतिहासविद्भिः।

* श्रीजिनवल्लभसूरीशैरेव स्वयमुल्लिखितं तदीयोपसम्पद्ग्रहणं तेषामेव च सकाशे श्रुतग्रहणं, तथैव सद्गुरुत्वमपि तेषामेव, तथा हि—"लोकार्च्यकूर्चपुरगच्छमहाघनोत्थ-मुक्ताफलोज्ज्वल-जिनेश्वरसूरिशिष्यः। प्राप्तः प्रथां भुवि गणिर्जिनवल्लभोऽत्र, तस्यो-



For Private and Personal Use Only

दुर्द्धरशुद्धचारित्र-तपज्ञानक्रियाधरः ॥२०५॥ चित्रकूटपुरे वीरे-शाकल्याणकवादिनः । करिष्यति परास्तं यः, चैत्यस्थ-द्रव्यलिङ्गिनः ॥२०६॥ अनेकशास्त्रकर्त्ता स, सूरिः शुद्धप्ररूपकः । प्रबोध्यानेकभव्यात्मान्, धर्मे नियोजयिष्यति ॥२०७॥ श्रीजिनदत्तसूरीश-स्तच्छिष्यो जिनशासने । महाप्रभावको जैने, युगवरो भविष्यति ॥२०८॥ सच्चारित्रप्रभावेण, यस्य सेवा सुराअपि । करिष्यन्ति द्विपञ्चाश-द्वीराश्च योगिनीगणः ॥२०९॥ प्रतिबोध्यैकलक्षत्रिंश-त्सहस्रजनान्पुनः । यः स्व-देशनया जैन-धर्मे संस्थापयिष्यति ॥२१०॥ अस्यां परम्परायां च, शुद्धागामीदृशा वराः । अनेकशो भविष्यन्ति, धर्माचार्या धुरन्धराः ॥२११॥ तस्मिन्काले भविष्यन्ति, श्रीहेमचन्द्रसूरयः । वरा कुमारपालाख्य-नृपतिप्रतिबोधकाः ॥२१२॥ एवं बहव आचार्याः, श्रावकाश्च प्रभावकाः । भविष्यन्ति करिष्यन्ति, श्रीजिनशासनोन्नतिम् ॥२१३॥ अस्यां

---

पसम्पदमवाप्य ततः श्रुतं च ॥ १ ॥ इति चित्रकूटीयमहावीरप्रशस्तिपराभिधानायामष्टसप्ततिकायां । तथा "के वा सद्गुरवोऽत्र चारुचरणाः श्रीसुश्रुता विश्रुताः ?" इत्येतत्प्रश्नस्योत्तरे "श्रीमदभयदेवाचार्याः" इति जैन-श्रेयस्कर-मण्डल-महेशानाद्वारा मुद्रिते सटीक-स्तोत्ररत्नाकरे द्वितीये विभागस्थे प्रश्नोत्तरैकषष्टिशतके । यच्चोक्तं तत्रैव "ब्रूहि श्रीजिनवल्लभ ! स्तुतिपदं कीदृग्विधाः ? के सताम्" इति प्रश्नस्योत्तरे "मद्गुरवो जिनेश्वरसूरयः" इति, तथा अष्टसप्ततिकायां "जिनेश्वरसूरिशिष्यः" इति च, तत्तु स्वं गार्हस्थ्या-त्समुद्धृत्य धर्मबोधं ज्ञानादिगुणोत्कर्षं च सम्प्रापकत्वादुपकारं संस्मरद्भिश्चैत्यवासित्वगुरुत्वमधिकृत्यैवोक्तं तेभ्यः सतां स्तुतिपदत्वं, न ह्युपसम्पन्नोपसम्पदावस्थायामपि सद्गुरुत्वं, तत्तु युक्तमेव, यतो न भूयाँस्तेऽद्यकालीनक्षुद्रमनुजा इव कृतोपकारिण उपकारस्यास्म-र्त्तारः कृतघ्नाः; किन्त्वतीवोच्चत्तमाः कृतज्ञाः शिष्टाश्चापि, यदवोचुः श्रीमन्मलयगिरिसूरयः स्वयं षडशीतिवृत्तिप्रारम्भे-"न चाय-माचार्यो न शिष्टः" इति, तथा "शिष्टश्चायमप्याचार्यः" इति तस्यैवान्यवृत्तौ श्रीमद्धरिभद्रसूरयः । शिष्टानां त्वेषैव प्रणालिका-यत्कल्पान्तेऽप्यविस्मरणं कृतोपकारस्मरणस्य लवमात्रस्यापीति ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





हुण्डावसर्पिण्यां, दुष्षमकालभावतः। निर्गमिष्यन्त्यनेकानि, मतमतान्तराणि च ॥२१४॥ स्वमतरसिकाः केचित्, केचि-दुत्सूत्रभाषिणः। भविष्यन्ति करिष्यन्ति, सूत्रोत्तीर्णां प्ररूपणाम् ॥२१५॥ भविष्यन्ति पुनः केचि-च्छिथिलाः स्वक्रिया-दिषु। साधवश्च करिष्यन्त्य-सूयां ज्ञानक्रियावताम् ॥२१६॥ ज्ञानवन्तः क्रियावन्त-श्चापि केचित्तु साधवः। कषायबहुलाः क्लेशं, करिष्यन्ति परस्परम् ॥२१७॥ लोभदशां गताः केऽपि, धारयिष्यन्ति साधवः। ज्ञानद्रव्यमिषाद्द्रव्यं, ज्ञानक्रियाधरा अपि ॥ २१८ ॥ पुनर्गौतम! कालोऽसौ, यथायथा गमिष्यति। तथातथा जनो नीच-गामी कुसङ्गसङ्गतः ॥ २१९ ॥ कषायबहुलश्चोप-कारादिधर्मवर्जितः। दाक्षिण्यरहितो वक्रः, परार्थादिविनाशकः ॥२२०॥ स्वजनमातृपित्रादि-द्वेषी स्वार्थ-प्रसाधकः। मिथ्यात्वमोहितः सारा-साराज्ञश्च भविष्यति ॥२२१॥ त्रिभिर्विशेषकम्॥ महान्ति नगराण्यथ, ग्रामतुल्यानि दुष्षमे। श्मशानसदृशा ग्रामा, भविष्यन्ति भयङ्कराः ॥२२२॥ भविष्यन्ति स्वमर्यादा-लज्जादिरहिता जनाः। धन-वन्तो वणिग्लोका, निर्धना दुःखपीडिताः ॥२२३॥ मर्यादारहिता भूपाः, प्रजायाः पालने पुनः। यमतुल्या भविष्यन्ति, प्रजापीडनतत्पराः ॥२२४॥ पुनर्देवा न दास्यन्ति, मनुष्याणां च दर्शनम्। भविष्यन्ति पुनर्जाति-स्मृत्यादिज्ञानमत्र न ॥२२५॥ बहवः प्राणिनो दुष्टा, भविष्यन्त्यघकारिणः। विघ्नसन्तोषिणो गाढ-रोषादिधारिणो मिथः ॥२२६॥ धर्मिजना भविष्यन्ति, निर्द्धना दुःखिताः पुनः। सुखिनो धनिनः पापि-जना बहुकुटुम्बिनः ॥ २२७ ॥ गौतम! रम्यवस्तूनां, हानिर्भूमौ प्रतिक्षणम्। मन्त्रयन्त्रौषधिज्ञान-विद्यारत्नधनायुषाम् ॥२२८॥ फलपुष्परसस्पर्श-गन्धरूपसुसम्पदाम्। संहन-नयशःकीर्त्ति-बलवीर्यसुकर्मणाम् ॥२२९॥ गुणसत्यतपःशौच-क्षमादीनां भविष्यति। अल्पफला रसा नीरं, वनस्पतिश्च नीरसः ॥२३०॥ त्रिभिर्विशेषकम्॥ हानिर्दुष्षमकालेऽस्मिन्, भविष्यति दिने दिने। द्रव्याणां विद्यमानानां, गुण-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पर्यायधारिणाम् ॥ २३१ ॥ ज्ञानदर्शनचारित्र-वीर्यतपोव्रतादिकम्। शमसंवेगनिर्वेद-करुणाऽऽस्तिक्यपञ्चकम् ॥ २३२ ॥ स्वात्मधर्मोद्यमादीनि, दुष्षमारे प्रतिक्षणम्। यास्यन्ति हीनतां स्वर्गा-पवर्गसुखदानि च ॥२३३॥ युग्मम् ॥ भविष्यन्ति त्रयोविंश-त्युदयाः पञ्चमारके। चतुर्विधस्य सङ्घस्य, धर्मस्योन्नतिकारकाः ॥२३४॥ द्विसहस्रचतुस्सङ्ख्या, युगप्रधान-सूरयः। भविष्यन्ति क्रियाज्ञान-निष्ठा एकावतारिणः ॥२३५॥ महालोभी पुनस्तत्र, कल्कीराजा भविष्यति। दत्तनामा सुतस्तस्य, धर्मोन्नतिं करिष्यति ॥२३६॥ षोडशसहस्राधिक्यै-कादशलक्षकाः (१११६०००) पुनः। भविष्यन्ति कलौ भूपाः, श्रीजिनधर्मपालकाः ॥२३७॥ भविष्यन्त्यत्र कोटयेक-जैनधर्मप्रभावकाः। मन्त्रिणो जिनतत्त्वज्ञाः, सारासारविचा-रकाः ॥२३८॥ युगप्रधानतुल्या हि, भविष्यन्ति च सूरयः। वरैकादशलक्षैका-दशसहस्रषोडश (११११०१६) ॥२३९॥ अङ्केन्दुवेदशून्याशा-ऽग्निगुण (३३४०४१९) सङ्ख्यकाः पुनः। मध्यमगुणधर्त्तारो, भविष्यन्ति च सूरयः ॥२४०॥ बाणाक्षिबाणबाणेषु-बाणेष्विष्विषु (५५-५५-५५-५२५) सङ्ख्यकाः। भविष्यन्त्यधमाचार्या, दुष्षमपञ्चमारके ॥२४१॥ लक्षषष्टिसहस्रचतुः-शतचतुश्चत्वारिंशत्कोट्यः (६००४४४०)। भविष्यन्त्युपाध्यायाः, सिद्धान्तवाचनादायकाः ॥२४२॥ सप्तदशलक्षनवस-हस्रैकशतैकविंशतिकोटयः। लक्षषष्टिसहस्रका (१७०९०१२१ क्रोड और ६००१०००), भविष्यन्ति साधवः प्रवराः ॥२४३॥ दशकोटाकोटिद्वा-दशशतद्वानवतिकोटयः। (१० कोडाकोडी १२९२ क्रोड) द्वात्रिंशल्लक्षनव-नवतिसहस्रैकशत (३२९९१००) साध्व्यः ॥ २४४ ॥ षोडशलक्षत्रिसहस्र-त्रिशतसप्ततिकोटयः (१६०३३७० क्रोड)। चतुरशीतिलक्षा (८४ लक्ष) श्रा-त्रारे भविष्यन्त्युपासकाः ॥२४५॥ पञ्चत्रिंशल्लक्षा-द्वानवतिसहस्रपञ्चशतकोटयः। द्वात्रिं-शत्कोटयश्च (३५९२५३२ क्रोड), भविष्यन्ति श्राविकाः पुनः ॥२४६॥ (आर्यायामयं गाथापञ्चकम्) ॥ अथ च



For Private and Personal Use Only

केचिदाचार्या, एतत्सङ्ख्यप्रमाणकम्। भरतैरवतक्षेत्र-दशसु कथयन्ति च ॥२४७॥ केचित्तु भरतक्षेत्र-पञ्चसु भरतेऽत्र च। केचित्तत्त्वं पुनर्ज्ञानि-गम्यमित्यवगम्यते ॥ २४८ ॥ दुष्षमापञ्चमारान्ते, स्वर्गाच्च्युत्वा भविष्यति। श्रीदुप्पसहसूरीशो, हस्तद्वयशरीरकः ॥२४९॥ दशवैकालिकावश्यक-जीतकल्पं च नन्दिकम्। पठिष्यत्यनुयोगद्वा-रं सूत्रपञ्चकं स च ॥२५०॥ षष्ठोग्रतपः कर्त्ता च, युगवरः सुरैर्नतः। स च सूरिर्गृहस्थत्वे, यावद्द्वादशवत्सरम् ॥ २५१ ॥ साधुत्वे च चतुर्वर्षं, सूरित्वे वत्सरं चतुः। ऊषित्वा विंशतिं वर्षं, सर्वायुषं प्रपाल्य च ॥२५२॥ कृताष्टमतपाः प्रान्ते, कालं कृत्वा समाधिना। एक सिन्धूपमायुष्को, भविष्यति सुरोत्तमः ॥२५३॥ ततश्च्युत्वाऽत्र मानुष्यं, सम्प्राप्य क्षेत्रभारते। स च प्रपाल्य चारित्र-मपवर्गं गमिष्यति ॥२५४॥ दुष्षमाख्यारकप्रान्ते, धर्मः श्रुतव्रतात्मकः। श्रीदुप्पसहसूरीशः, फल्गुश्रीरार्यिका पुनः ॥२५५॥ नागिलश्रावकः श्राद्धी, सत्यश्रीश्च चतुर्विधः। सङ्घोऽयं प्रथमे यामे, विच्छेदं यास्यति प्रभोः ॥२५६॥ विमलवाहनो भूपः, सुमुखो धीसखा पुनः। मध्याह्नेऽग्निश्च सन्ध्यायां, विच्छेदं च गमिष्यति ॥२५७॥ एकविंशतिसहस्र-वर्षमानश्च दुष्षमः। पञ्चमारश्च सम्पूर्णो, भविष्यति यदाऽत्र च ॥२५८॥ तदा षष्ठारको नेष्टो, दुष्षमदुष्षमाभिधः। तावन्मात्रप्रमाणस्त-दधिकारोऽत उच्यते ॥ २५९ ॥ वासना धर्मतत्त्वस्य, गमिष्यति जनोऽखिलः। मातृपित्रादिमर्यादा-रहितश्च भविष्यति ॥२६०॥ बहुधूलियुताऽनिष्टा, निष्ठुरा वायवः पुनः। प्रवास्यन्ति दिशाः सर्वाः, सधूम्रा च भविष्यति ॥२६१॥ वर्षिष्यन्ति च षष्ठारा-रम्भे सप्त घना इमे। भस्म-ग्रावा-नल-क्षार-विष-मलाख्य-विद्युतः ॥२६२॥ एकैकोऽम्भोधरो यावत्, सप्तसप्तदिनानि च। मुशलधारया नित्यं, भस्मादि वर्षयिष्यति ॥२६३॥ यैः काशश्वासशूलाश्च, कुष्ठज्वरजलोदराः। शिरोऽर्त्तिप्रमुखा रोगा, भविष्यन्त्यतिकष्टदाः ॥२६४॥ अङ्गारसदृशा भूमि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





भविष्यति जलादिभिः । नदीपर्वतगर्त्तादि-भूमिः समीभविष्यति ॥२६५॥ पुनर्दुःखेन तिर्यञ्चो, जलस्थलखचारिणः । स्थास्यन्ति शीततापादि-पीडिता मांसभक्षिणः ॥२६६॥ क्षेत्रवाटीवनाराम-धान्यतरुतृणादिकः । सर्वो वनस्पतिर्नाशं, यास्यति सर्वथा पुनः ॥२६७॥ वैताढ्यमृषभं कूटं, गङ्गासिन्धुसरिद्द्वयम् । एतच्चतुष्टयं मुक्त्वा, सर्वः समो भविष्यति ॥२६८॥ भरतभूर्भविष्यति, क्लिन्नकर्दमभूमिभिः । ग्रावैः क्वचित्क्वचिच्चाति-संव्याप्ताऽत्यन्तदुर्गमा ॥२६९॥ ह्रस्वदेहाः कठोराङ्गाः, कुवर्णा रोगपीडिताः । निष्ठुरवचना वस्त्र-रहिता अतिकोपनाः ॥२७०॥ चिप्पटनासिका लज्जा-रहिताः पशुवत्क्रियाः । निर्विवेका दयाहीना, भविष्यन्ति नराः स्त्रियः ॥२७१॥ युग्मम् ॥ नृणां विंशतिवर्षायुः, षोडशाब्दायुरत्र च । स्त्रीणां दुष्प्रसवा गर्भान्, षड्वर्षा स्त्रीर्धरिष्यति ॥२७२॥ शकटचक्रयोर्मध्य-भूप्रमाणं वहिष्यति । गङ्गासिन्धुसरिन्नीरं, व्याप्तं मत्स्यादिजन्तुभिः ॥२७३॥ वैताढ्यपर्वतासन्न-नद्युभयतटावनौ । द्वासप्तति महादीर्घ-विस्तीर्णानि बिलानि च ॥२७४॥ उत्तरदक्षिणाशायां, नद्योः प्रतितटं पुनः । नव नव बिलानि स्युः, सङ्कलने द्विसप्ततिः ॥२७५॥ निवसिष्यन्ति तिर्यञ्चो, मनुष्यास्तत्र दुःखिताः । बीजमात्राः सदा मत्स्या-दिमांसाहारकारिणः ॥ २७६ ॥ तदानीं मनुजा गङ्गा-सिन्ध्वोर्मत्स्यादिकं जलात् । कृष्ट्वा दिननिशान्ते च, स्थले मोक्ष्यन्ति निर्घृणाः ॥ २७७ ॥ सूर्यतापेन पक्वांश्च, मोक्ष्यन्ते मच्छकच्छपान् । ते चान्यत्खाद्यवस्तूनि, तदानीं तत्र सन्ति न ॥२७८॥ भरतैरवतेष्वेवं, दशक्षेत्रेषु दुष्षमः । दुष्षमदुष्षमश्चापि, कालः समो भविष्यति ॥२७९॥ षष्ठारानन्तरं काल, उत्सर्पिण्या भविष्यति । षष्ठारकसमो भावा-त्तत्र च प्रथमारकः ॥२८०॥ भविष्यति द्वितीयारः प्रथमारे गते पुनः । पञ्चमारसमो वस्तु-तत्त्वोत्सर्पणभावतः ॥२८१॥ अथ प्रादुर्भविष्यन्ति, तस्यादौ सप्त सप्त हि । घस्रान् यावद्घनाः पञ्च, वर्षिष्यन्ति निरन्तरम् ॥ २८२ ॥

For Private and Personal Use Only

पुष्करावर्त्तमेघेन, भूमितापो गमिष्यति । क्षीरोदाख्यद्वितीयेन, धान्यनिष्पत्तियोग्यभूः ॥२८३॥ घृतोदकतृतीयेन, भूमिर्मेघेन चिक्कणा । शुद्धोदकचतुर्थेन, सर्वौषधिसमुद्भवः ॥२८४॥ रसोदकाख्यमेघेन, पञ्चमेन भविष्यति । रसोत्पत्तिश्च पञ्चत्रि-शद्दिनमेघवर्षणात् ॥२८५॥ त्रिभिर्विशेषकम् ॥ वृक्षौषधिलताधान्य-तृणादीनि तदा स्वयम् । निष्पत्स्यन्तेऽथ तान् दृष्ट्वा, यास्यन्ति ते बिलाद्बहिः ॥२८६॥ यदा भरतभूः पुष्प-फलधान्यादिसंयुता । भविष्यति तदा लोका, भक्षिष्यन्ति फलादिकम् ॥२८७॥ ततो यथायथा काल, आयास्यति तथातथा । संपत्संहनानायूंषि, बलवीर्यावगाहना ॥२८८॥ रूपगन्धरसस्पर्शा, अपूर्वाः सर्ववस्तुषु । वर्द्धिष्यन्ति नृतिर्यक्षु, धान्यफलतृणादिषु ॥ २८९ ॥ युग्मम् ॥ ऋतवः सलिला वाता, भविष्यन्ति सुखाकराः । पुनर्नराश्च तिर्यञ्चो, गतरोगाः क्रमेण च ॥ २९० ॥ तस्यादौ मध्यदेशे हि सप्तकुलकराः पुनः । भविष्यन्ति नराधीशा, राज्यनीतिप्रवर्त्तकाः ॥ २९१ ॥ विमलवाहनस्तत्र १, सुदामः २, सङ्गमस्तथा ३ । सुपार्श्वो ४ दत्तको ५ भावी, सुमुखः ६ सम्मुचिः ७ क्रमात् ॥२९२॥ जातजातिस्मृतिस्तत्र, नृपो विमलवाहनः । निवेशयिष्यति ग्राम-पुरादि राज्यहेतवे ॥ २९३ ॥ करिष्यति ततो राजा, हस्तिगोऽश्वादिसङ्ग्रहम् । व्यवहाराणि शिल्पानि, लिपिकां गणितं तथा ॥२९४॥ रन्धनादिक्रियां सर्वां, व्यञ्जयिष्यति भूपतिः । प्रजाहिताय वर्णानां, चतुष्कं स्थापयिष्यति ॥२९५॥ युग्मम् ॥ तृतीयारत्रिवर्षे च, सार्द्धाष्टमासके गते । सम्मुचिभूपतिद्वार-पुरे भद्रा प्रियाऽस्य च ॥२९६॥ चतुर्दशमहास्वप्न-सूचितो नन्दनस्तयोः । द्वासप्ततिवर्षायु-र्हेमरुक् सिंहलाञ्छनः ॥ २९७ ॥ जन्मादिभिर्महावीर-तुल्यः श्रेणिकजीवकः । भविष्यत्याद्यतीर्थेशः, पद्मनाभजिनेश्वरः ॥२९८॥ त्रिभिर्विशेषकम् ॥ ततश्च प्रातिलोम्येन, प्राग्वत्पूर्वार्हतां समाः । भविष्यन्ति तदा सर्वे, क्रमात्तीर्थङ्करा अमी ॥२९९॥ श्रेणिकभूपतेर्जीवः, पद्म-



For Private and Personal Use Only

नाभजिनेश्वरः १। ततो जीवः सुपार्श्वस्य, सुरदेवजिनेश्वरः २ ॥ ३०० ॥ कोणिकतनुजोदायि-जीवः सुपार्श्वतीर्थकृत् ३। पोट्टिलाख्याणगारस्य, जीवो जिनः स्वयम्प्रभः ४। ॥३०१॥ दृढायुः श्राद्धजीवोऽथ, सर्वानुभूतितीर्थकृत् ५। ततः कार्त्तिकजीवश्च, देवश्रुतजिनेश्वरः ६ ॥३०२॥ शङ्खश्रावकजीवोऽथ, श्रीउदयजिनेश्वरः ७। आनन्दश्राद्धजीवोऽथ, श्रीपेढाळजिनेश्वरः ८ ॥३०३॥ सुनन्दश्राद्धजीवोऽथ, श्रीपोट्टिळजिनेश्वरः ९ शतकश्राद्धजीवोऽथ, शतकीर्त्तिजिनेश्वरः १० ॥ ३०४ ॥ ततश्च देवकीराज्ञी-जीवः सुव्रततीर्थकृत् ११। श्रीकृष्णवासुदेवस्य, जीवोऽथाऽममतीर्थकृत् १२ ॥३०५॥ विद्याभृत्सत्यकीजीवो, निष्कषायजिनेश्वरः १३। बळभद्रस्य जीवोऽथ, निष्पुलाकजिनेश्वरः १४ ॥३०६॥ निर्ममाख्यो जिनो भावी, सुलसाऽम्बडबोधिका १५। रोहिणीश्राविकाजीवः, चित्रगुप्तजिनेश्वरः १६ ॥३०७॥ रेवतीश्राविकाजीवः, श्रीसमाधिजिनेश्वरः १७। शतालीश्राद्धजीवोऽथ, श्रीसंवरजिनेश्वरः १८ ॥ ३०८ ॥ द्वीपायनस्य जीवोऽथ, यशोधरजिनेश्वरः १९। ततः श्रीकरणजीवश्च, श्रीविजयजिनेश्वरः २० ॥३०९॥ यः पुरा नारदोऽभूत्स, श्रीमल्लाख्यजिनेश्वरः २१। ततश्चाम्बडजीवश्च, श्रीदेवाख्यजिनेश्वरः २२ ॥३१०॥ श्राद्धामरस्य जीवोऽथा-नन्तवीर्यजिनेश्वरः २३। स्वातिजीवश्चतुर्विंशो, भद्रङ्करजिनेश्वरः २४ ॥ ३११ ॥ एते चागामिकाले हि, चतुर्विंशतितीर्थपाः। भविष्यन्ति भवाम्भोधौ, निर्यामिकाः शिवङ्गमाः ॥३१२॥ एषां कल्याणकान्यायु-लाञ्छनान्तरवर्णकाः। अधुनार्हत्समाज्ञेयाः, पश्चादनुपूर्वितः पुनः ॥ ३१३ ॥ दीर्घदन्ताभिधो १ गूढ-दन्ताख्यः २ शुद्धदन्तकः ३। श्रीचन्द्रः ४ श्रीभूति ५ सोमः ६, पद्मो ७ महादिपद्मकः ८ ॥३१४॥ कुसुमो ९ विमलश्चक्रि १०-विमळवाहनः ११ पुनः। भरतोऽन्याभिधोऽरिष्टो १२, भाविद्वादशचक्रिणः ॥३१५॥ नन्दीश्च १ नन्दिमित्रश्च २, सुन्दरबाहु ३ नामकः। महाबाहु ४



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





रतिबलो ५, महाबलो ६ बलः ७ पुनः ॥३१६॥ द्विपृष्ठाख्य ८ स्त्रिपृष्ठाख्यो ९, भाविनश्चार्द्धचक्रिणः । तिलको १ लोहजङ्घाख्यो २, वज्रजङ्घश्च ३ केसरी ४ ॥३१७॥ बलिः ५ प्रह्लादनामा ६ चा-ऽपराजितश्च ८ भीमकः ८ । सुग्रीवाख्य ९ इमे भावी-नवक प्रतिविष्णवः ॥३१८॥ जय १ विजय २ भद्राख्य ३-सुप्रभाख्य ४ सुदर्शनाः ५ । नन्द ६ नन्दन ७ पद्माख्य ८-सङ्कर्षणा ९ बला नव ॥३१९॥ भविष्यन्त्येवमेते हि, त्रिषष्टिपुरुषोत्तमाः । भविष्यतश्चतुर्थारे, चरमौ जिनचक्रिणौ ॥३२०॥ ततः परं भविष्यन्ति, युगलिका नराः पुनः कल्पवृक्षसमुत्पत्ति-र्धर्माभावश्च पूर्ववत् ॥ ३२१ ॥ उत्सर्पिण्यवसर्पिणी, एवमेव च भारते । गताः पूर्वमनन्ताश्चा-ऽऽयास्यन्त्यनन्तशः पुनः ॥३२२॥ एवं पञ्चमषष्ठार-स्वरूपं च निरूपितम् । मयेदं गौतम ! प्राणि-वर्गप्रज्ञापनाय च ॥ ३२३ ॥ ततश्च कार्त्तिकस्यामा-वास्यारात्रेश्च पश्चिमे । समये स्वातिनक्षत्रे, निर्वाणमगमत्प्रभुः ३२४॥ इदानीं तु गतो भावो-द्द्योतोऽस्माभिरतः परम् । द्रव्योद्द्योतं करिष्यामो, जने तत्स्मृतिहेतवे ॥३२५॥ ध्यात्वेति मनुजैः स्वस्य, गृहाणा-ग्रालकादिषु । धृत्वा रत्नमयान् दीपान, विहिता दीपमालिका ॥ ३२६ ॥ ततो रूप्यमया दीपा-स्ततो जाताश्च मृन्मयाः । प्रतिपदि समुत्पन्नं, केवलं गौतमप्रभोः ॥३२७॥ भगवद्भगिनी शोकं, दूरीकर्त्तुं दिनेऽपरे । स्वगृहे भोजयामास, स्वभ्रातृनन्दिवर्द्धनम् ॥३२८॥ ततो भ्रातृद्वितीयाऽभू-दिति सुहस्तिसूरिभिः । प्रोक्तं हे सम्प्रते ! दीपा-लिका-पर्वेदमुत्तमम् ॥३२९॥ अस्मिन्दिने महावीर-प्रभुः शिवङ्गतस्ततः । गौतमस्य समुत्पन्नं, केवलज्ञानदर्शनम् ॥३३०॥ अतो राजन्निदं पर्व, समग्रसिद्धिदायकम् । शुभेच्छुभिः सफलीकार्यं, विशिष्टधर्मकर्मणा ॥ ३३१ ॥ युग्मम् ॥



For Private and Personal Use Only

## ग्रन्थकृत्प्रशस्ति :—

खरतरगणे चासन्, जिनमहेन्द्रसूरयः। तत्करदीक्षिता; श्रीमा-न्मोहनाख्यमुनीश्वराः ॥३३२॥ आद्यो जिनयश-स्सूरि-स्तेषां शिष्योऽभवद्गुणी। अपरश्च सुचारित्री, श्रीमद्राजनमुनीश्वरः ॥३३३॥ तेषां शिष्या गुणैर्युक्ताः, श्री-जिनरत्नसूरयः। तेषां शिष्यगणिप्रेम-मुनेः समाग्रहेण च ॥३३४॥ पाठकलब्धिनाऽकारि, दुष्षमारादिगर्भितम्। श्री-दीपमालिकापर्व-माहात्म्यमन्यशास्त्रतः ॥३३५॥ इदं बाणखशून्याक्षि (२००५)-वर्षाषाढस्य मेचके। सप्तम्यां मयाऽ-कार्यं-जयमेरुमहापुरे ॥ ३३६ ॥ श्रीमोहनमुनीशस्य, प्रशिष्यगुणिसत्तमाः। शिष्टाश्च गणिपंन्यास-केशरमुनयोऽ-भवन् ॥३३७॥ सूत्रानुयोगाचार्याणां, तेषां शिष्या विशारदाः। श्रीबुद्धिमुनयो गण्या-स्पदेन च विभूषिताः ॥३३८॥ तैः सुज्ञानक्रियावद्भिः, संशोधिता मुमुक्षुभिः। द्वादशपर्व-माहात्म्य-दृष्टान्ता अप्रमादिभिः ॥३३९॥ द्वादशपर्वमाहात्म्य-समारम्भः पुरेऽजनि। जयपुरे समाप्तिं चा-गमदजयमेरुके ॥३४०॥ श्लोकसङ्ख्या तु विज्ञेयै-षां सङ्कलनयाऽखिला। सप्तदशशतं पञ्च-चत्वारिंशद्युतं पुनः ॥३४१॥ न्यूनाधिकान्यथा प्रोक्तं, सन्दर्भितं मयाऽत्र च। तन्मिथ्या दुष्कृतं मेऽस्तु, जिनसिद्धादिसाक्षिकम् ॥ ३४२ ॥

॥ इति श्रीदीपमालिका-पर्व-माहात्म्यं समाप्तम्। तत्समाप्तौ च समाप्तोऽयं द्वादशपर्व-कथा-संग्रहः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीजिनाय नमः ।

प्राचीनाचार्यपुरन्दरसन्दर्भिता मौनैकादशीमाहात्म्यगर्भिता प्राकृतपद्यात्मिका—

# सुव्रतश्रेष्ठी कथा ।

अरस्य प्रव्रज्या नमिजिनपतेर्ज्ञानमतुलं, तथा मल्लेर्जन्म व्रतमपमलं केवलमलम् ।
वलक्षैकादश्यां सहसि लसदुद्दाममहसि, क्षितौ कल्याणानां क्षिपतु विपदः पञ्चकमदः ॥ १ ॥

व्याख्या—'क्षितौ' पृथिव्यां अदः कल्याणकानां पञ्चकं 'विपदः' संसारापदः 'क्षिपतु' परिहरतु। कदा तज्जातं ? तत्राह—'सहसि' मार्गशीर्षमासे वलक्षैकादश्यां-मौनैकादशीदिने, इत्यर्थः। कथम्भूते सहसि ? लसदुद्दाममहसि, लसद् 'उद्दामं' उत्कटं महस्तेज उत्सवो वा यत्र स, तस्मिन्। किं तत्कल्याणकपञ्चकं जातं ? तदाह—अरस्य अष्टादशतीर्थकरस्यात्र दिने 'प्रव्रज्या' दीक्षा समजायत, तथा पुनर्नमिजिनपते-रेकविंशतितमतीर्थङ्करस्य 'अतुलं' अनुपमं 'ज्ञानं' केवलज्ञानमत्र दिने समुत्पेदे। तथा पुनर्मल्ले-रेकोनविंशतितमजिनस्य जन्माथ 'व्रतं' दीक्षा 'अपमलं'



For Private and Personal Use Only

निर्मलं 'अलं' अत्यर्थमथवा सर्वत्रापि समर्थं 'केवलं' केवलज्ञानमिति कल्याणकत्रयमभूत्। अत्र च पूर्वोक्तश्री-अरनाथदीक्षा-नमिनाथज्ञानमिति कल्याणकद्वयमीलनेन जातं तत्पञ्चकं, अनेन विधिना पञ्चस्वपि भरतक्षेत्रेषु सर्वविधि-साम्यात्तद्गणनया जाता तेषां पञ्चविंशतिः। तथाऽनयैव रीत्या समानधर्मत्वादैरवतक्षेत्रपञ्चकेऽपि तद्भवनात्तत्रापि जाता पञ्चविंशतिरनु च तद्द्वयोर्मीलने जाता तेषां पञ्चाश[तिः] त् (?), तदनन्तरमतीतानागतवर्त्तमानकालविवक्षया त्रिगुणितानां तेषां जातं सार्द्धशतमिति कृत्वा मार्गशुक्लैकादशी महापर्वं, तीर्थङ्करस्य कल्याणकदिनत्वाद्, अतो देवानाम-प्यागमनमहोत्सवबहुमानविषयत्वादुक्तं च—

पंचसुं जिणकल्लाण-एसु महरिसितवाणुभावाओ। जम्मंतरनेहेण य, आगच्छंति सुरा इहयं ॥१॥

अत्रावसरे देवाः सम्भूय नन्दीश्वरद्वीपादावष्टाहिकामहोत्सवकरणेनाराधयन्त्येतत्कल्याणकदिनं, [अतः] साधु-श्रावकैरपीत्थं दानशीलतपोभावादिधर्मकृत्यैस्सादरमाराध्यमेतत्कल्याणकदिनमथ च मल्लिनाथस्य कल्याणकत्रयभवना-द्दीक्षादिन एव मौनव्रतविधिना केवलज्ञानप्रापणाच्च मौनैकादशीति महापर्वप्रसिद्धं। अत एतद्दिने मल्लिनाथस्य कल्या-णकविधिप्रतिपादनाय श्रीस्थानाङ्गगतसप्तमस्थानकोक्तं समूलं ससूत्रं संक्षिप्ततरमेतच्चरितं लिख्यते—

सिरिवीरजिणं नमिऊणं, पुच्छइ सिरिगोयमो समासेणं। भयवं! कहेसु इण्हिं, इक्कारसिमोणकरणं मे ॥ १ ॥
वीरो भणेइ गोयम!, निसुणसु इक्कारसीइ माहप्पं। सिरिनेमिणा वि कण्हस्स, जह कहियं तह निसामेह ॥ २ ॥
बारवईनयरीए, समोसढे नेमिजिणवरे पवरे। कण्हो वि सपरिवारो, वंदणयत्थं गओ तत्थ ॥ ३ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सुणिऊण देसणं तह, पुच्छइ कण्हो य जिणवरं नेमिं। पव्वाणि सामि! कित्तिय?, हवंति पक्खम्मि मासस्स ॥ ४ ॥
पभणइ नेमिजिणंदो, पव्वाणि य पंच एगपक्खम्मि। बीया दुविहे धम्मे, सङ्ढ जईणं जओ भणियं ॥ ५ ॥
पंचमी नाणतवम्मि य, आराहियव्वा य भत्तिपूरेणं। पंचवरिसाणि मासा, पंचेव य धम्मकम्मम्मि ॥ ६ ॥
सत्थियकरणं दीवय-वट्टिय पंचेव सप्पियमएण। फलपंचढोयणं तह, विहिपुव्वं भावपूरेणं ॥ ७ ॥
लहुपंचमी पुणो तह, पंचय मासाणि जइ य सत्तीए। कायव्वा साज्जवणा, पंच य पवरेण +भावेण ॥ ८ ॥
तह कत्तियपंचमिया, कायव्वा जावजीवपुरिसेण। एकवन्नकणाइमयं, फलाई ढोएइ सव्वंपि ॥ ९ ॥
पंचमितवं विहिपुव्वं, आराहई जो उ एगचित्तेण। सो परलोए पावई, नाणलंभोवमं सुत्तं ॥ १० ॥
तह अट्ठमीयपव्वम्मि, जीवस्स भवेइ कम्मबंधो य। नियआउयतियभाए, अहवा नवमे य भाए य ॥ ११ ॥
अहवा सत्तावीसइमे, भाए आउस्स बंधणं अत्थि। अहवा अंतमुहुत्ते, आउस्सावसेसकालम्मि ॥ १२ ॥
परभविआउं बंधइ, भाएएहिं अट्ठमीइ पुणो। तह चउदसिदिवसम्मि परभवआउं न संदेहो ॥ १३ ॥
अट्ठमि चउदसीसुं, सावओ जइ हविज्ज विरइपरो। तव पोसहाइकरणं, सावज्जं वज्जए सव्वं ॥ १४ ॥
इक्कारसी तिहिवरा, इक्करसंगस्स नामओ भणिआ। आराहउ भत्तिपरा, भविया! भावेण वरिसंता ॥ १५ ॥
इक्कारसी तिहिवरा, सविसेसाराहिया पयत्तेण। जिणकल्लाणगपन्नासं, तम्मिय दिवसम्मि य हवंति ॥ १६ ॥
पंच य भरहम्मि पुणो, पंच य एरवयम्मि समकालं। चउव्वीसं [मि] पि? जिणाणं, पंच य कल्लाणगाणि तओ ॥ १७ ॥

+ 'कम्मेण यद्वा 'ठामेण' इति प्रत्यन्तरे.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





चउद्दमी तवकरणं, आउस्स य बंधकरणहेउत्ति। तह चउदपुव्वाराहण-करणं मासा चउद्दसंपि ॥ १८ ॥
चउपव्वी विहिभणिया, अट्ठमि चाउद्दसी पुन्निमिया। अमावस्सा य पुणो, तवोविहाणं जओ दिट्ठं ॥ १९ ॥
निस्सेससिद्धिलाभो, चउमासगपज्जुसवणपव्वेसु। उत्तरकरणाइ फलो, तवोविसेसो जओ भणियं ॥ २० ॥
सुयनाणपंचमीए, सूयपूयासोहिबोहिलाभाय। कम्मक्खयट्ठमट्ठमि-उववासो चउदसीइ पुणो ॥ २१ ॥
एवं महानिसीहे, भणियं पव्वेसु तिसु य उववासो। चउमासे पुण छट्ठं, तह अट्ठमो पज्जुसवणम्मि ॥ २२ ॥
तो पुच्छइ वासुदेवो, भयवं ! कल्ले समागया य तिही। मग्गसिरसुद्धिक्कारसी, तम्मि य करणे फलं किंपि ? ॥ २३ ॥
तो जिणवरेण भणियं, निसुणसु भावेण सुद्धमणो। मग्गसिरिगारसम्मी य, कल्लाणगं हवइ पन्नासं ॥ २४ ॥
तम्मि दिणे पोसहवयं, गिण्हसु इह अट्ठपहरमाणं पि। मोणं चिय कायव्वं, आएसिग कहण मुत्तं च ॥ २५ ॥
पारणगम्मि य दिवसेसु, गुरुसमीवम्मि पारए पोसे। नाणं पूएइ तओ, फलाइ ढोइज्ज भावेण ॥ २६ ॥
तत्तोच्चिय जिणभवणे, जिणवरं वंदिऊण भत्तीए। तो गच्छइ नियगेहे, सुसंविभागेण पारेइ ॥ २७ ॥
एवं वरिसेण पुणो, सियगारिसि बारसं (?) च काऊणं, नियनिय सत्तीइ तओ, उज्जवइ तहा इमा नूणं ॥ २८ ॥
अहवा वरिसे वरिसे, मग्गसिरि सेयगारसिं कुणई। बारसवरिसेहिं तओ, उज्जवइ विऊ तवो एवं ॥ २९ ॥
कण्हो भणेइ भयवं ! नेमीसर ! कहसु इगारसीतवं। पुव्विं कइयं केणवि, पावियं तप्फलं विउलं ? ॥ ३० ॥
तो जिणवरेण भणियं, निसुणसु सम्मत्तखायपरिकलिओ। सुव्वयसिट्ठिगारसि, करणे रिद्धिं सिवं पत्तो ॥ ३१ ॥
तथाहि-धायइसंडे दीवे, इसुयारा दाहिणम्मि विक्खाओ। तम्मि य पच्छिमभाए, विजयपुरं नाम पुररयणं ॥ ३२ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तत्थऽत्थि पुहविपालो, नरचंदो नाम रायराउत्ति। नियपयपालणनिरओ, विजयी तिजयम्मि विक्खाओ ॥ ३३ ॥
चंदवई तसु भज्जा, रूवेणं लहइरूवलावण्णा। नियपइभत्ता सुद्ध-व्वया य सीलेण जुवइजणमुक्खा ॥ ३४ ॥
नयरम्मि तत्थ निवसइ, सूरो नामेण रिद्धिसंपन्नो। सिट्ठिसुएहिं बहुएहिं, परियरिओ सव्वजणमुक्खो ॥ ३५ ॥
तस्सऽत्थि लच्छिपवरा, वाहणमज्झम्मि पसरमंडणया। तीरेसु गंतु लाभं, संगहिया सिट्ठि मंड (पाया) लया ॥ ३६ ॥
तह देसेसु य बहुसगड-महिस-वेसर-बइल्ल-खरपमुहेहिं। वणिअउत्ता ववसायं कुणंति सव्वत्थ ॥ ३७ ॥
रिद्धीइ समिद्धो वि हू, जिणधम्मे सायरो सपरिवारो। जिणवरभवणे गच्छइ, जिणपूयं कुणइ भत्तीए ॥ ३८ ॥
छव्विह आवस्सयम्मि, उज्जुत्तो पइदिणं सुसंविग्गो। भावइ भावणं निच्चं, अणिच्चयाई सयाकालं ॥ ३९ ॥
सो अन्नया कयाइ, सुगुरुसमीवम्मि पुच्छए तत्तो। भयवं! किंपिय दिज्जउ, अभिग्गहं जेण कम्मक्खओ ॥ ४० ॥
गुरुणा भणियं निसुणसु, पढमं नाणम्मि उज्जमं कुणइ। नाणेण विणा जम्हा, जीवाईया न नज्जंति ॥ ४१ ॥
सिरिनाणपंचमीए, तवोविहाणम्मि उज्जमंताणं। +भवईआण हवई सिद्धी, पंचमी तेण कायव्वा ॥ ४२ ॥
सुहकम्माणं बंधणं, अट्ठमिचउद्दसीसु कायव्वं। पोसहसामाईयं, तवचरणं कुणइ सुहकज्जे ॥ ४३ ॥
सूरसिट्ठी वि पभणइ, तवोविहाणेण निम्मलं देहं। भयवं! पंचमि अट्ठमि, चउद्दसी य मए कइया ॥ ४४ ॥
इक्कारस अंगाणं, रुद्दसंखाण करणे किं फलं होइ?। तो गुरुणा भणियं पुण, माहप्पं वण्णियं सुत्ते ॥ ४५ ॥
निम्मलरूवं सुजसं, पयावसहियं च सबलसिरिं च। रज्जं पावइ पुरिसो, आरुग्गं आउयं च तहा ॥ ४६ ॥

+ "इक्कारसंगभत्ती, इक्कारसिदिणम्मि कायव्वा" इति प्रत्यन्तरे।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रिद्धीहिं संपन्नो, सुकुडुंबेणं च सयणपरियरिओ। दालिद्दं दोहग्गं, रोगाईयं च दूरओ नेइ ॥ ४७ ॥
सो सुरनरसुहमणुभविउं, कमेण सिवसंपयं च पाविज्जा। कम्मक्खय संजुत्तो, इक्कारसितवप्पभावेण ॥ ४८ ॥
तत्तो सूरेण सिट्ठं, एगारसि एगवरिसियं काउं। आराहिस्सं नाणं, चरणं चिअ तवोविहाणेणं ॥ ४९ ॥
तत्तो सूरो सिट्ठी, सकुडुंबो भावभावियस्संतो। इक्कारसिदिवसम्मि य, उववासं मोणसंजुत्तं ॥ ५० ॥
इक्कारसि इक्कारस, संखा काऊण नियमसत्तीए। इक्कारस अंगाणं, लिहावणं पूयणं च कयं ॥ ५१ ॥
एगवन्नेगारसंखा-वण्णिय इक्कारिगार संखाय। फलविगइढोयणं पुण, वच्छल्लं संघपूयं च ॥ ५२ ॥
तवोविहाणाणंतर-पन्नरसदिवसेहि भावणाजुत्तो। तक्कालं चिय सूलेणं, निहणं सूरो वि पावेइ ॥ ५३ ॥
इक्कारसितवकरणेणं, पत्तो कप्पम्मि आरणे देवो। इगवीससागराइं, पालइ देवत्तणं तत्थ ॥ ५४ ॥
चविऊणं तत्थ ठिओ, जंबुद्दीवम्मि भरहभूमीए। सोरीपुरम्मि नयरे, समिद्धिदत्तस्स सिट्ठिस्स ॥ ५५ ॥
पीइमईभज्जाए, उयरे पुत्तत्तणे समुप्पन्नो। नवमाससड्ढसत्तम, दिणम्मि जाओ य सुमुहुत्ते ॥ ५६ ॥
तह नालनिक्खणत्थं, खणियभूमीए निहाणं नीसरियं। जणएण पुत्तजम्मे, वद्धावणयं कयं रम्मं ॥ ५७ ॥
वद्धावणम्मि अक्खय-पत्ताणि समागयाणि बहुयाणि। वारविलासिणिनट्टं, गंधव्वगायणं च तहा ॥ ५८ ॥
भट्टजण जयजयारव, वादित्तरवेण वाइयं तईया। तोरणझयपडागं, दाणं दीणाण दिन्नं च ॥ ५९ ॥
बारसगम्मि य दिवसे, मायापियएहि सयणमिलिएहिं। परिभुंजाविय कहियं, एयम्मि य पुत्तगब्भम्मि ॥ ६० ॥
सो सव्वभद्दपरिणामो, जा[ओ]इ (?) गेहम्मि रिद्धि उच्छाहो। एयस्स नाम दिज्जइ, सुव्वयकुमरुत्ति नामेणं ॥ ६१ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir







तो पंचधाविसहिओ, पालिज्जंतो विवुड्ढिमुवणेइ। जाओ पंचवरिसो, नेसाले पट्ठिओ तईया ॥ ६२ ॥
सो सव्वकलाकुसलो, जाओ वरिसत्तिगम्मि तो पच्छा। साहुसमीवम्मि ठिओ, छव्विहमावस्सयं भणइ ॥ ६३ ॥
सम्मत्तं नवतत्तं, कम्मट्ठयपयडिअट्ठवन्नसयं। बारसवयाइं सम्मं, जाणई पालेइ निच्चंपि ॥ ६४ ॥
जुव्वणसमए पिउणा, महिड्ढियाणं समागया कन्ना। इक्कारस परिणाविय, तओ सुकयत्थो पिया जाओ ॥ ६५ ॥
सिरिकंता १ पउमसिरी २, पउमलया ३ गंगया ४ य तारा ५ अ।
सुज्जसिरी ६ वन्नसिरी ७, रंभा ८ पउमा ९ गउरि १० गङ्गा ११ ॥ ६६ ॥
घरभारं च समग्गं, समप्पिऊणं तओ पच्छा। चिंताव्वारविमुक्को, धम्मं सो कुणई निच्चंपि ॥ ६७ ॥
अह अन्नया कयाई, वुड्ढत्ते अणसणं च काऊणं। मरिऊणं संपत्तो, समिद्धिदत्तो दिवं तईया ॥ ६८ ॥
गिहसामी संजाओ, सुव्वयसिट्ठीय लोयमज्झम्मि। इक्कारकोडिसामी, उववुत्तो कुणइ ववसायं ॥ ६९ ॥
अह अन्नदिणे सिरिधम्म-घोससूरी वणम्मि संपत्तो। सो नयररायसहिओ, वंदणयत्थं गओ तत्थ ॥ ७० ॥
सव्वे लोया हरिसेण, पूरिया वंदणागया तत्थ। वंदणपुव्वं सव्वे, उवविट्ठा धरणिपीढम्मि ॥ ७१ ॥
तो धम्मघोससूरी, देसणदाणं करेइ भवियाणं। दाणं सीलं च तवो, भावणभावं कहइ सव्वं ॥ ७२ ॥
उवएसम्मि य मज्झे, पव्वतिहि वियारवण्णियम्मि तया। इक्कारसितववरणं, जायं सुव्वयसिट्ठिस्स ॥ ७३ ॥
तईया सुव्वयसिट्ठी, इक्कारसिं सुणिय मुच्छमावन्नो। पुव्वभवविहियगाररसिं, जाईसरणेण जाणेई ॥ ७४ ॥
तो परिवारेणं चिय, सो उवयारेणं सुत्थिओ कओ। सुव्वयसिट्ठी साहइ, भयवं! पुव्वभवं संभरियं ॥ ७५ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पुव्वभवे इगारसि-तवोविहाणं मए कयं रम्मं। तेणं चिय पुन्नेणं, आरणदेवो समुप्पन्नो ॥ ७६ ॥
सत्तोहं इह भरहे, सुव्वयसिट्ठीय रिद्धिसंपन्नो। इक्कारकोडिसामि य, सो सुयदेवी पभावेणं ॥ ७७ ॥
भयवं! कहेसु पुणरवि, इहेव जम्मम्मि किंपि तवचरणं। काहे ही सकुटंबो, परभवसुक्कयफलं होई ॥ ७८ ॥
तो गुरुणा भणियमिणं, महाणुभागोसि धम्मपरिणामो। पुव्वभवे इक्कारसि, इक्कारसंगि भत्तिकया ॥ ७९ ॥
अहुणा पुण सुयभत्ती, इक्कारसितवं करेसु मोणेणं। पोसहकरणेण पुणो, छज्जीवविवज्जणट्ठाए ॥ ८० ॥
विहिणा जइ तं गारसि, करेसि सुक्कयत्थबोहिलाभो य। केवलियनाणलंभो, परभवगहणे न संदेहो ॥ ८१ ॥
विहिपुव्वं चिय विहियं, धम्माणुट्ठाणमुज्जवणसहियं। नियसत्तिकयं जम्हा, बहुफललाभाय होइत्ति ॥ ८२ ॥
सुव्वयसिट्ठी य तओ, नियभज्जाए जुओ सपरिवारो। मोणेणेगारसितवं, वरिसेणं एगमासेणं ॥ ८३ ॥
रुद्दसंखेण मासेणं, इक्कारसितवं कयं पयत्तेणं। पारणपारणगम्मि य, नाणपूया कया रम्मा ॥ ८४ ॥
पुण्णे य तवोकम्मे, उज्जमइ नियपरिद्धिवित्थारं। इक्कारसंग लेहिय, तव्वण्णसमग्गयं होई ॥ ८५ ॥
साहम्मियवच्छल्लं, संघं पूएइ भत्तिसंजुत्तो। पुणरवि गुरूणापुच्छइ, पुणरवि इक्कारसी करणे ॥ ८६ ॥
गुरुणा भणियं निसुणसु, मग्गसिरसेयगारसी वरिसे। एगा पुण कायव्वा, कम्मक्खयबोहिलाभाय ॥ ८७ ॥
पन्नासं कल्लाणं, हवंति इक्कारसीदिणे तम्हा। एयम्मि दिणे तेणं, मग्गसिरिगारसी पवरा ॥ ८८ ॥
आरंभह भवियनरा!, मग्गसिरिगारसी महापवरा। मणवइकायविराहणं, मुत्तुं जिणवयणधम्मधरा ॥ ८९ ॥
मोणं चिय विहेयव्वं, भणणगुणणाइ मुत्तु पवरतरं। सव्वं विहिणा सूयं, सफलं चिय हवइ सयलंपि ॥ ९० ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तो सुव्वएण भणियं, सह कुटुंबेण विसुद्धभत्तीए। गहियं गारसिचरणं, मोणं सुकुटुंबमाईणं ॥ ९१ ॥
तईया बहुयजणेहिं, गहिया इक्कारसी गुरुसमीवे। नियनियगिहम्मि पत्ता, सव्वे लोया य सयमोया ॥ ९२ ॥
मिग्गसिरसेयगारसि-दिणम्मि पोसहं कुणंति सव्वे वि। मोणेणं चिय भविया, जम्मफलं सयलं गिण्हंति ॥ ९३ ॥
तो पभाए गुरुणो, पासम्मि य पोसहं च पारित्ता। सुयभत्तीए फलेणं, पूयंति तहा सुकयपुन्ना ॥ ९४ ॥
अह अन्नया कयाई, चोरा जाणंति लोयवयणेणं। मोणं सव्वकुडुंबस्स, पोसह संजुत्तया सव्वे ॥ ९५ ॥
तम्मि रत्तिम्मि चोरा, धाडिं काऊण गेहमणुपत्ता। गिहमज्झे अंधयारे, उज्जोयं कुणंति सव्वेवि ॥ ९६ ॥
तो सकुटुंबेणं चिय, काउस्सग्गो कओ समाहिपरो। अग्गीजीवाणमिणं, अभयदाणं कयं रम्मं ॥ ९७ ॥
गिहमज्झे चोरा वि हु, पासंति सुवण्णरुप्पपमुहं च। गिण्हंति जाव तईया, सासणदेवीहिं ते गहिया ॥ ९८ ॥
ते चित्तमणुय सरिसा, लिप्पमया थंभिया ठिया तत्थ। सकुटुंबोवि हू सिट्ठी, काउस्सग्गं न भंजेइ ॥ ९९ ॥
जाए पभायसमए, सकुडुंबो गओ य धम्मसालाए। गुरुणो न संति तइया, ठवणायरियस्स पासम्मि ॥१००॥
पोसहं पारियित्ता, नाणाईणं च पूयणं किच्चा। नियगेहसमावन्नो, ते चोरे तत्थ पासेई ॥१०१॥
तो लोएणं रन्नो, कहियं चोरागमणं सिट्ठिगिहे। अह रायपेरिएणं, तलायरा तत्थ संपत्ता ॥१०२॥
तइया सिट्ठिवरेणं, मणम्मि एयं च +निच्छियं कीयं। जा चोरा ता मोणं, मए वि कायव्व नियमेणं ॥१०३॥
ताव तलारेणं चिय, चोराणं बंधणं समाइट्ठं। सिट्ठी चिंतइ एवं, चोराणं दुक्खं मा होसु ॥१०४॥

+ " चिंतियं तत्थ " इति प्रत्यन्तरे।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सासणदेवीइ तओ, तळायरा थंभिया य तक्कालं। तं सुणिऊणं राया, सपरियरो आगओ गेहे ॥१०५॥
सुव्वयसिट्ठी य तओ, पवरं वत्थं निवस्स ढोइत्ता। विन्नत्तो नरनाहो, सामीहिं किं पि मग्गेमि ॥१०६॥
तो नयरसामिणा पुण, कहियं जं +माणसम्मि तं मग्ग। वाणी एसा मे पुण, जं पत्थसि देमि तं सव्वं ॥१०७॥
सिट्ठी पत्थेइ तओ, चोराणमभयं देहि दाणं च। दिन्नं चिय भूवइणा, ता चोरा सिट्ठिणा वुत्ता ॥१०८॥
भो चोरा! नियठाणं, गच्छेह समाहिणा कयपमोया। थंभियमुक्का य गया, नियनियभवणेसु रंगधरा ॥१०९॥
राया भणेइ सिट्ठिं, निसि चोरा किं न वारिया तत्थ। सुव्वय भणेइ तत्तो, नियमं नियमा न भंजेमि ॥११०॥
आणंदिओ य राया, सिट्ठिं सकुडुंबयं समाणेइ। धम्मम्मि निच्चलत्तं, सुपसंसइ सपरिवारो य ॥१११॥
नियगेहं संपत्ता, रायालोया तळायरप्पमुहा य। जिणधम्मस्स पसंसा-परायणा सव्वकालम्मि ॥११२॥
पुणरवि गारसि दिवसे, तवं च पोसहं कुणइ सिट्ठी। अग्गी लग्गो नयरे, लोया सव्वे विय रडंति ॥११३॥
पाडोसिएण तईया, बुंबा दत्ता य सिट्ठिगेहेसु। अग्गी लग्गो नीसरसु, गेहाओ पलायणं कुणह ॥११४॥
तं सुणिऊणं सिट्ठी, सकुटुंबो काउसग्गमावन्नो। ठिओ य निच्चलमणो, मणवयकाएण महादढो ॥११५॥
अग्गी वि हु सिट्ठिगिहं, हट्टं वक्खारि सिट्ठि परिभोगं। मोइत्ता सव्वं चिय, नयरं बालेइ जालाए ॥११६॥
जिणभवणं चिय पोसह-सालासाहूहिं सहिय मोइत्ता। निहणं पत्ता सममेव, जंपइ लोओ पसायम्मि ॥११७॥
सिट्ठिपभावेणं चिय, हट्टवक्खारि गिहगयं सव्वं। सिट्ठिसंबंधियं तह, न जालियं अग्गिणावि तहा ॥११८॥

+ 'मणसि' "इट्ठं" च प्रत्यन्तरे।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





रायावि तं सुणित्ता, सपमोओ सिट्ठिगेहमावन्नो । वद्धाविओ य सुव्वय-सिट्ठी सहिओ पमोयपरो ॥११९॥
इक्कार वियासहिओ, सिट्ठी राएण मंडिओ तम्हा । वत्थालंकरणेणं, धम्मपसंसं च कुणमाणो ॥१२०॥
तह भूयपेय डाइणि-सायणि पमुहेहि य छलिउमारद्धो । धम्मपभावेणं चिय, न छलंति य किण्हसप्पो वि ॥१२१॥
एवं तवंमि पुण्णे, रयण मुत्तीय पवाल रुप्पाई । सोवण्णं सव्वनाणय, इक्कारससंखपरिमाणं ॥१२२॥
लड्डूय पक्कवन्नमुहं, गंठिया कारिया सुरम्मा य । मोणं कयए घट्टी, ताओ कण्णम्मि पविसेइ (?) ॥१२३॥
इय विहिणा सव्वं पि य, इक्कारसवण्ण धन्न लक्खाइं । मेराईयं च सव्वं, उज्जवियं सिट्ठिणा तत्थ ॥१२४॥
तब्भज्जा वि य नियनिय-मुज्जवणं मंडयंति ते पिहुपिहुयं । सत्तखित्ताण पुरओ, ढोयंती य गुरुमाहप्पं ॥१२५॥
तो लोएणं पच्छा, नियसत्तिमग्गलेण भावेणं । ढोइत्ता मुज्जवणं, नीयं तवं सफलियं तम्हा ॥१२६॥
साहम्मीयवच्छल्लं, संघस्स य पूयणं कयं रम्मं । दीणाइयाण दाणं, गुरूवएसं सुणंतेणं ॥१२७॥

दानं क्षान्तिकरं सदा हितकरं संसारसौख्याकरं, नृणां प्रीतिकरं गुणाकरकरं लक्ष्मीकरं किङ्करम् ।
स्वर्गावासकरं गतिक्षयकरं निर्वाणसम्पत्करं, वर्णायुर्बलबुद्धिवर्द्धनकरं दानं प्रदेयं बुधैः ॥१२८॥
छत्रे काञ्चनकुम्भसंभवभवौ राज्ये विपक्षक्षयः, श्रीकोटौ शुभपुत्रसन्ततिफलं हारेऽपि चिन्तामणिः ।
दाने पात्रपवित्रता तनुमतां, दुग्धाब्धिमध्ये सिता, ह्युद्यापनमेवमात्मतपसि श्रेयोभिरेवाप्यते ॥१२९॥

तत्तो सुव्वयसिट्ठिस्स, पत्तेयं भारिया पसवियाओ । एगं सयं च पुत्तं, दसुत्तरं च तहा पुत्ती इगारसगं ॥१३०॥
परिणाविया य सव्वे, पुत्ता सव्वे वि कन्नवग्गं वा । कन्ना पुण दिन्नाओ महिड्ढियाणं सुयवराणं ॥१३१॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तम्मि भवे रिद्धि पुण, समज्जिया कोडि नवनउइमाणा। सत्तखित्तम्मि ववइ, माणुसजम्मं कयत्थेइ ॥१३२॥
अन्नसमयम्मि पत्तो, चउनाणि समिद्ध सयलसुत्तधरो। सिरिजयसेहरसूरि, समोसढो तत्थ उज्जाणे ॥१३३॥
तो वंदणत्थं राया, गओ वणे सयललोयपरियरिओ। तो सुव्वयसेट्ठी पुण, सकुटुंबो वंदइ गुरूणं ॥१३४॥
तो सव्वे वंदित्ता, उवविट्ठा सुगुरुपायमूलम्मि। धम्मं सुणंति तत्तो, एगग्गचित्ता सुहपसत्ता ॥१३५॥

दाणं पुण्णतरुस्स मूलमणहं पावाहिमंतक्खरं, दालिद्दद्दुमकंदलीवणदवो दोहग्गरोगोसहं।
सोवाणं गुरुसग्गसेलचढणे मुक्खस्स मग्गो वरो, तद्दायव्वमिणं जिणुत्तविहिणा पत्ते सुपत्ते सया ॥१३६॥

सुद्धं समायारमनिंदणिज्जं, सहस्स अट्ठारस भेयभिन्नं। बंभाभिहाणं च महावयं ति, सीलं तहा केवलिणो वयंति ॥१३७॥
बज्झं तहाभिंतरभेयमेयं, कसायदुब्भेयकुकम्मभेयं। कम्मक्खयत्थं कयपावनासं, तवं तवेहागमियं निरासं ॥१३८॥

चक्रे श्रीभरतो बलानुगमृगः श्रेयानिलापुत्रको, जीर्णश्रेष्ठी मृगावती गृहपतिर्यो भावदेवाभिधः।
सुश्राध्या मरुदेविका नवमुनिः श्रीचण्डरुद्रस्य चे-त्याद्याः कस्य न चित्रकारिचरिता भावेन सम्भाविताः ॥१३९॥

संसारकारागृहकर्मबद्धाः, कान्तारिणः शृङ्खलबद्धपादाः।
पुत्रादिपाशैश्च गले निबद्धा, मुग्धा मनुष्या स्पृहयन्ति मुक्तिम् ॥१४०॥

गिहवावारं मुत्तुं, सव्वं विरइं पवज्जह नरा भो!। जं कम्मक्खयं काउं, सिद्धिपुरिं झत्ति पावेह ॥१४१॥
सुव्वयसिट्ठी पभणइ, भयवं! मम दिक्खं संपयं देह। घरवावारं पुत्ते, ठविऊणं झत्तिमागच्छे ॥१४२॥
उट्ठित्ता गिहपत्तो, पुत्तस्स भलाविऊण घरभारं। नियदव्वं दाऊणं पिया सहिओ य निक्खंतो ॥१४३॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





इक्कारसहि पियाहिं, पव्वज्जं अणसणं च गिण्हित्ता। मासेणं भत्तेणं, केवलनाणेण मुक्खं च ॥१४४॥
सुव्वयरिसि चारित्तं, पालइ सुद्धं विसुद्धचित्तजुयं। छट्ठऽट्ठमाइकरणे, इक्कारसि मोणतवचरणे ॥१४५॥
दोसय छट्ठाणि तओ, एगसयं अट्ठमाइतवरत्तो। चोमासी चउ नवरं, छम्मासी य एगवारं च ॥१४६॥
अन्नदिणे इक्कारसि-दिणम्मि मोणेण संठिए तत्थ। एगस्स य साहुस्स य, कण्णेसु य वेयणा जाया ॥१४७॥
मिच्छादिट्ठी य एगो, विंतरो चिंतेइ रिसिं तवाउ चालेमि। रयणिमज्झे य तओ संकमिओ साहुदेहम्मि ॥१४८॥
तेणुत्तो सुव्वयरिसी, गच्छह सावयगिहम्मि दुक्खमिणं। कहियव्वं च जहा ते, तिगिच्छं कुणंति भावधरा ॥१४९॥
चिंतेइ सुव्वयरिसी, इण्हिं मोणं मए कयं अत्थि। उवस्सयाओ बाहिं, गमणं च निसिद्धयं जं मए ॥१५०॥
चिंताए परिकलिओ, जा अच्छइ साहुवेयणाकलिओ। धम्मज्झाएण मत्थए, ताडइ य रिसिं च कोवेणं ॥१५१॥
अह चिंतेइ तहिं चिय, एसो य रिसी वेयणाकलिओ। मम दोसच्चिय एसो, कहियं एयस्स जं न कयं ॥१५२॥
तह भावंतो भावण कम्मट्ठगंठिमूरणं काउं। केवलनाणं पत्तो, दढो कयत्थो महासत्तो ॥१५३॥
तो नयरदेवयाए, केवलमहोच्छवे समाइण्णे। भव्वाण बोहणत्थं, देसणधम्मं कयं रम्मं ॥१५४॥
पडिबोहिय भवियजणं, अंते संलेहणं च काऊणं। केवलनाणेण समं, पत्तो मुक्खं अणंतसुहं ॥१५५॥
सुणिऊणं कण्हो विहु, इक्कारसिपमुहतवस्स माहप्पं। पालित्ता जह सत्तिं, तित्थयरत्तं लभिस्सेही ॥१५६॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





एवं वीरेण कहियं, गोयमपमुहाण सव्वजीवाणं। सव्वे भावसमेया करंति इगारसितवं च ॥१५७॥
सुणित्तु सुव्वयरिसिगं कहाणयं, इगारसीराहणगं मणोमयं।
भव्वा! सयाराहणगा भवंतु, लहेउ रिद्धिं तह मुक्खसुक्खं ॥१५८॥

॥ इति श्रीमौनैकादशीमाहात्म्ये श्रीसुव्रतश्रेष्ठिकथा समाप्ता।

॥ इति श्रीद्वादशपर्वकथा-संग्रह समाप्तः ॥

卐 卐 卐 卐



For Private and Personal Use Only